नं॰ २६ / घ

महाभाष्य प्रदीपः ६ अध्याय)
१८६ पत्राणि सं॰ १८२६
व्याकरण



भा० कै० ६
१

श्रीगणेशाय नमः ॥ एकाचो द्वे प्रथमस्य एकाच इति किमयमिति निर्देशस्य समानत्वात् भिन्नार्थत्वाच्च एकवचननिर्देशाच्च द्वयोर्युगपदाश्रयितुमशक्यत्वाद्धलादिःशेष
इत्यादेर्वद् बहुव्रीहिलिंगस्य दर्शनाद्दीर्घ इणः कितीति तत्पुरुषलिंगोपलंभात्स्वरस्य उरवधारणत्वादेकश्रुत्या सूत्रपाठात्स्वरान्निश्चयाभावात्प्रश्नः बहुव्रीहितत्पुरुषयो
र्विग्रहप्रदर्शनं विरुद्धार्थप्रतिपादनार्थं नहि संज्ञाभेदमात्राद्दोषः किंतु विरुद्धार्थप्रतिपादनात् किंचात इति द्वयोर्विशेषं पृच्छति सिद्धं पपाचेति प्रथमत्वाभावेप्यपदेशि
वद्भावाद्वक्ष्यमाणाद्योगविभागाद्वा बहुव्रीहिपक्षे पचेर्द्विर्वचनं सिध्यति न तु तत्पुरुषपक्षे बहुव्रीहिनिर्देश इति बहुव्रीहेर्निर्देश उच्चारणां बहुव्रीहिणाचार्यस्य निर्देशः

श्रीगणेशाय नमः ॥ एकाचो द्वे प्रथमस्य एकाच इति किमयं बहुव्रीहिः एकोऽच् यस्मिन्स एकाच् एकाच इति आहोस्वित्तत्पुरुषोऽयं समानाधिकरणः
एकोऽच् एकाच इति किंचातः यदि बहुव्रीहिः सिद्धं पपाच पपाठ इयाय आरेति न सिध्यति अथ तत्पुरुषः समानाधिकरणः सिद्धमियाय आरेति पपाच पाठे
ति न सिध्यति अत उत्तरं पठति एकाचो द्वे प्रथमस्येति बहुव्रीहिनिर्देशः एकाचो द्वे प्रथमस्येति बहुव्रीहिनिर्देशोऽयं एकवर्णेषु च कथं एकवर्णेष्वपदेशिव
द्वचनात् अपदेशिवदेकस्मिन्कार्यं भवतीति वक्तव्यं एवमेकवर्णेषु द्विर्वचनं भविष्यति एकाचो द्वे भवत इत्युच्यते तच्च न ज्ञायते कस्य एकाचो द्वे भवत इति ॥०॥

प्रतिपादनमित्यर्थः आप्तिन्यायाश्रयेण बहुव्रीहिराश्रीयते वक्ष्यमाणाद्यपदेशिवद्भावात्तत्पुरुषफलस्य बहुव्रीहिणाकृतत्वादत एव प्रयोजनाभावान्नतंत्राद्वसेकशेषा
णामन्यतमाश्रयणं लिंगमप्यनेकं बहुव्रीहेरस्ति हलादिशेषः शर्पूर्वाः खयः लिट्यभ्यासस्योभयेषामिति अच्मात्रस्य द्विर्वचनेऽभ्यासस्य हलभावाच्छेषसंप्रसारणाद्ययोगा
त् एकवर्णेषु चेति मुख्य एकाज्व्यपदेशो येषामस्ति ते व्यपदेशिनः पचादयस्तेषां यथा द्विर्वचनं प्रतिपद्यंते तथैकवर्णा अपि कस्यैकाच इति विधिं मत्वा विशेषानुपादाना ण्म०
॥ पृच्छति ॥०॥ ॥५॥ ॥७॥ ॥७॥ १

वक्ष्यतीति नायं विधिः किन्तर्ह्यधिकार इत्यस्यातं त्र्यादस्यो नरवाक्ये ष्यर्थे विशेषस्यावस्थापनं धातोरेकाच इति वैयधिकरण्येन संबंधोभिमतो धातोरवयवस्यैकाचो द्वे भवत इत्यर्थः इतर
स्तु सामानाधिकरण्येन संबंधं मत्वाह यदि धातोरिति नैषेति सर्वानुग्रहाय वैयधिकरण्यमाश्रीयते तस्मिन्ननेकविषयत्वाल्लक्षणस्य प्रथमग्रहणाच्च सामानाधिकरण्ये हि व्यवच्छे
द्याभावात् प्रथमग्रहणमनर्थकं स्यात् यत्रैव प्रथमश्चेति प्राथम्यस्य द्वितीयाद्यपेक्षत्वात् अवचनादिति वचनरहितं यल्लोकविज्ञानं वचनेनानिवृद्धं लोकव्यवहारात्मकं तस्मा
त्सिद्धमित्यर्थः तथाहि लोके शिलापुत्रकस्य शरीरमिति बहिर्वस्तुभेदे सत्यपि भेदस्य व्यवहारोवस्थाभेदाश्रयो दृश्यते शिलापुत्रः विक्रीयमाणत्वाद्यनेकावस्थायुक्तो यो दृष्ट
स्तस्येदं शरीरमिति परिदृश्यमानावस्थाभेदेन निर्दिश्यते एकमेव हि स्तम्भ तदेवेदमिति प्रत्यभिज्ञानादेकत्वमस्य जद्यप्यवस्थाभेदान्नानारूपमवभाति तथाहं स्वात्मानमात्मने

वक्ष्यतीति लिटि धातोरनभ्यासस्येति तेन धातोरेकाच इति विज्ञायते यदि धातोरेकाच इति सिद्धं पपाच पपाठ जजागार पुपुत्रीयिषतीति न सिध्यति नैषैकाच समा
नाधिकरणा षष्ठी धातोरेकाच इति किं तर्हि अवयवयोगे षष्ठी धातोर्य एकाजवयव इति अवयवयोगे षष्ठी चेत् सिद्धं जजागार पुपुत्रीयिषतीति पपाच पपा
ठेति न सिध्यति एषोपि व्यपदेशिवद्भावेन धातोरेकाजवयवो भवति। एकाचो द्वे प्रथमस्येत्युच्यते तेन यत्रैव प्रथमश्चाप्रथमश्चास्ति तत्र द्विर्वचनं स्यात् जजागार पुपु
त्रीयिषतीति पपाच पपाठेत्यत्र न स्यात् प्रथमत्वे चाप्रथमत्वे च किं व्यपदेशिवद्वचनात् सिद्धमिति एवं सति हि व्यपदेशिवद्भावो वक्तव्यः न वक्तव्यः उक्तं वा किमुक्तं तत्र
॰ व्यपदेशिवद्वचनमेकाचो द्वे प्रथमार्थं षत्वे चादेशसंप्रत्ययार्थं नैष दोषः अवचनाल्लोकविज्ञानात्सिद्धमिति सेव॥ ०॥ ॥

सेकस्यापि बुद्ध्यवस्थाभेदाश्रयः कर्तृकर्मकरणभावः इत्याये तत्रापि प्रयोगभेदादेतिद्वितोयं ति आयन् जिगमिषतीत्याद्यनंतरूपस्याण एकोयमिकारो ऽजिति व्यपदिश्यते अथ
वान्वयव्यतिरेकाभ्यां परिकल्पितार्थत्वाच्छब्दार्थसमुदायस्याविवक्षितार्थ एको वर्णोऽजिति व्यपदिश्यते एवं पचेरनंतप्रयोगविषयस्य प्रयुज्यमानं लिडादिपरं रूपमवयव इति व्यपदि
श्यते प्रथमव्यपदेशोपि प्रयोगभेदादेवेति प्रथमगर्भेणाह नेत्यादि लोकव्यवहार एकस्मिन्नपि दृश्यते असतोपि द्वितीयादीन् बुद्ध्या परिकल्प्य व्यवहारान्मुख्यप्रथमसाधर्म्याद्वा प्रसि
द्धत्वाच्चैवं विधस्य व्यवहारस्य नास्ति गौणत्वं सत्यपि वा गौणत्वे लिट्यभ्यासस्योभयेषां दीर्घ इणः किती त्यादेर्ज्ञापकाद्भवति शास्त्रीयकार्यप्रवृत्तिः ॥ ॥ ॥

योगविभागो वेति तेन प्राथम्यार्थो व्यपदेशिवद्भावो नाश्रयितव्यः तत्र हि योगविभागसामर्थ्यो ज्ञि टि धातोरनभ्यासस्येत्याद्यावेकाच इति प्रथमस्येति च वाक्यभेदेन संबध्यते एकवाक्यतायां तस्यैव शेषस्य प्रसंगात् तस्मादेतस्माद् उद्दात्त वाक्यात्त्र क्रियावाक्यानि लक्ष्यसंस्कारकाणि उपपन्नवंते धातोरवयवस्यैकाचो लिटि द्वे भवत इत्येकं वाक्यं धातोः प्र

योगविभागो वा एकाज्मात्रस्य द्विर्वचनार्थं अथवा योगविभागः करिष्यते एकाचो द्वे भवतः किमर्थो योगविभागः एकाज्मात्रस्य द्विर्वचना र्थं एकाज्मात्रस्य द्विर्वचनं यथा स्यात् इयाय पपाच ततः प्रथमस्य प्रथमस्यैकाचो द्वे भवतः इदमिदानीं किमर्थं नियमार्थं यत्र प्रथमश्चाप्र थमश्चास्ति तत्र प्रथमस्यैवैकाचो द्विर्वचनं यथा स्यात् अन्यस्य माभूत् जजागार उपुत्रीयिषतीति एकाचोवयवैकाचत्वादवयवानां द्विर्वच नप्रसंगात् एकाचोवयवैकाचत्वादवयवानां द्विर्वचनं प्राप्नोति॥ ॥ ॥श्री॥ ॥०॥

थमस्यैकाच इति नियमार्थं द्वितीयं अजादेर्धातोर्द्वितीयस्यैकाच इति तृतीयम् एकाच इति अवयवा अप्येकाचः समुदायोपि व्यपदेशिवद्भावाद्धातोरवयवश्च ततो विशे षानुपादानात्सर्वेषां द्विर्वचनप्रसंगः॥ ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥०॥

=भेदेति·शास्त्रे हि व्यपदेशिवद्भावयोजनाय शब्दार्थे समुदायमात्रे अभिन्नत्वेऽप्येकदेशः शब्द इति सुगादनायेति भावः।२=

निज् शब्दोपीति यथा येनैव हस्तेन बाहुर्हेस्त ग्रानुच्यते तेनैव देवदत्तोप्येवमिकारेण सर्व एकाज्व्यपदेशभाजइति भावः इकारोपीति व्यपदेशिवद्भावादिति भावः अर्थवता व्यपदेशिवद्भावइत्स नाश्रित्येकारोपीत्युक्तं न त्वेतद्वचनमपितु न्यायः अर्थवतो भेदकत्स्यन संभवादनर्थकोपि यदि भेदेनाश्रयितुं शक्यते तेत तत्त्रापि भवत्येव व्यपदेशिवद्भावः शक्यते चेकारोप्यनेकसमुदायांतर्भावान्नानारूपइवोपलभ्यमानेन रूपेणोकाजितिव्यपदेष्टुं ननु अर्थवत्वात्समुदायस्यैव द्विर्वचनं भविष्यति नावयवानामनर्थकानां नैतदस्ति यत्र विशिष्टं स्वरूपमुपादीयते तत्रार्थवद्ग्रहणपरिभाषोपतिष्ठते यथा शेइत्सत्र अन्यथार्थवद्धातुरित्सत्रार्थवद्ग्रहणमनर्थकं स्यात् अधातुरप्रत्यय इति प्युदासाश्रयणात् तत्सदृशशब्दग्रहणदर्थवत्परिभाषोपस्थानादनर्थकस्य ग्रहणप्रसंगाद्धातोरवयवस्यैकाच इति अवयवत्वेनाश्रयणाच्चानर्थकस्यापि अंगीकारान्नास्तीहे

इकारोप्येकाच्

नेनिजतीत्यत्र निज् शब्दोप्येकाच् इज् शब्दोप्येकाचं निश्शब्दोपि तत्र निज् शब्दस्य द्विर्वचने रूपं सिद्धं दोषाश्च न संति इज् शब्दस्य द्विर्वचने रूपं न सिध्यति दोषा अपि न संति इकारस्य द्विर्वचने रूपं न सिध्यति दोषाश्च संति निश्शब्दस्य द्विर्वचने रूपं सिद्धं दोषास्तु भवंति तत्र को दोषः तत्र जुसभाववचनं तत्र जुसभावो वक्तव्यः अनेनिजुः पर्यवेविषुः अभ्यस्तात् झेर्जुस् भावो भवतीति जुस्भावो न प्राप्नोति जकारेण व्यवधानात्॥ ॥ श्री

[redacted] =युगपदनुष्ठानासंभवात् विपर्यायप्रसंगरूपाह एकस्येति·२३

न सरिभाषोपस्थानं अत्र च पर्यायेण सर्वेषां द्विर्वचनप्रसंगश्चोद्यते न तु युगपत् न ह्येकोवयवो युगपदनेकस्यावयविनोऽवयवत्वेन शक्योऽपेक्षितुं अवयवस्य गुणत्वात्परार्थत्वादेकं प्रतिगुणभावादपरं प्रतिगुणभावायोगात्पर्यायेणापेक्षाया अविरोधात्सर्वप्रसंग उच्यते एकस्यैकाचो द्विर्वचने कृते एकाच्व्यपदेशहेतोरचोपि द्विरुक्तत्वात्स्मिन्नेव प्रयोगेऽपरस्यैकाचो द्विर्वचनाप्रसंगः प्रवृत्तत्वाल्लक्षणस्य तस्मात्प्रयोगांतरे पर्यायेण सर्वेषां द्विर्वचनप्रसंगः इज् शब्दस्येति इकारस्य लघूपधगुणे सत्यभ्यासस्य सवर्णइतीकारस्य यदि·नियेजेतिरूपं स्यात् इकारस्यापि द्विर्वचने एतदेव रूपं दोषा अपि न संतीति रूपसिद्धेरन्यस्य जुस्भावाद्यसिद्धिदोषस्याप्रसंगात्॥ ॥ ॥

=एकोवयवः इकारादिः अनेकेति·निज् इज् निशादेः।२४=

स्वर इति स्वरविधौ व्यंजनस्याविद्यमानत्वात्स्वरसिद्धिरिति चेत् तन्न हल्स्वरप्राप्तौ व्यंजनमविद्यमानवदिति सेवव्यवस्थापनात् यत्सरि वेविषतीति यङ्लुक्प्रयोगे निपातैर्यद्य
दि हन्तेति निघातप्रतिषेधार्थं शास्त्रहानिस्स्येति एकस्मिन्नेकाच्यवयवे द्विरुच्यमाने पूर्वोक्तेन न्यायेनान्येषां तस्मिन्नेव प्रयोगे द्विर्वचनाभावान्नेदिषयं शास्त्रं स्पष्टं स्यात् सिद्धं त्विति
समुदाये द्विरुच्यमानेऽवयवानामपि तत्रांतर्भावाद्द्विर्वचनसंबंधान्न कस्मिंश्चिच्छास्त्रहीनमिसर्थः नन्विति शास्त्रेणसाक्षात् समुदाय एवानुगृहीतः स्यात् न त्वव

यवा इति प्रश्नः नहीयत इति यद्यपि समुदाये द्विरुच्यमाने साक्षादवयवेषु शास्त्रं न प्रवृत्तं तथापि शास्त्रीयफलसंपत्त्या हानिरुच्यते अवयवे तु द्विरुच्यमाने तस्मिन् प्र
योगेऽवयवांतराणां समुदायस्य च शास्त्रीयफलसंबंधाभावाद्धीनमेव शास्त्रं स्यात् अनच्कस्येति एकस्य वाऽनेकस्य वा हल एव द्विर्वचनप्रसंगः॥ ॥

स्वारश्च स्वरश्च न सिद्ध्यति नेनिजति यत्सरि वेविषतीति अभ्यस्तानामादिरुदात्तो भवती त्यजादौ लसार्वधातुक इत्येष स्वरो न प्राप्नोति अज्ञावश्च अज्ञाव
श्च न सिद्ध्यति नेनिजति परि वेविषतीति अदभ्यस्तादिसज्ञावो न प्राप्नोति नुम्प्रतिषेधश्च नुम्प्रतिषेधश्च न सिद्ध्यति नेनिजत् परिवेविषत् नाभ्य
स्ताच्छतुरिति नुम्प्रतिषेधो न प्राप्नोति जकारेण व्यवधानात् शास्त्रहानिश्च शास्त्रहानिश्च भवति समुदाये काचः शास्त्रं हीयते सिद्धं तु तत्समु
दायैकाच्त्वात् शास्त्राहानेः सिद्धमेतत्कथं तत्समुदायैकाच्त्वात् किमिदं तत्समुदायैकाच्त्वादिति तस्य समुदायस्तत्समुदायः एकाज्भावए
काच्त्वं तत्समुदायस्यैकाच्त्वं तत्समुदायैकाच्त्वं तत्समुदायैकाच्त्वादिति तत्समुदायैकाचो द्विर्वचनं भविष्यति कुत एतत् शास्त्राहानेः एवं हि शा
स्त्रमहीनं भवति ननु समुदायैकाचो द्विर्वचने क्रियमाणे अवयवैकाचः शास्त्रं हीयते न हीयते किंकारणं अवयवात्मकत्वात्समुदायस्य अवय
वात्मकः समुदायः अभ्यंतरो हि समुदायेऽवयवः तद्यथा वृक्षः प्रचलन्सहावयवैः प्रचलतीति तत्र बहुव्रीहिनिर्देशे अनच्कस्य द्विर्वचनमन्यपदार्थत्वात्०॥

=समुदाये एकाचः तद्विषयं शास्त्रं
=एकस्मिन्नेकाचि निहतं अन्ये [illegible]काः
=स्वप्रवृत्ता हीयेते सर्पः ।३ = तस्येति ज्ञा
=तादेकवचनं तेषां समुदायस्य सर्पः ।४ =

=नसंबन्धोमनोऽर्थबहुव्रीहेरन्दिविषयाइतिभावः ।२=

तद्यथेति चित्रगुशब्दस्यान्यपदार्थ एव वाच्यो न तु वर्तिपदार्थ इति न तस्य कार्येण संबन्धः सिद्धस्त्विति तस्यान्यपदार्थस्य गुणो विशेषणं तस्य संविज्ञानं सह वर्तिपदार्थो गुणो वाच्य
स्यान्यस्य पदार्थस्य संविज्ञानं संनिहितविशेषणस्यान्यपदार्थस्य विशिष्टसंबन्धाश्रयेणाकेनचिद्बहुव्रीहिणाभिधानादित्यर्थः शुक्लवाससमिति अससपि स्वस्वामिभावे वा
सः संयोगाश्रयो बहुव्रीहिरिति शुक्लवासः संयुक्तपुरुषानयने पृथगचोदितान्यपि वासांसि सामर्थ्यादानयनेन संबध्यन्ते इह तु यः शुक्लवासा दृष्टस्तमानयेति

तस्य२ =संयोगसमवायान्यतरसंबन्धेनसमवेतस्य१= =आनयनाद्यन्वयित्वेनज्ञानविसर्पः ।२= =वासःसंविज्ञानमिशुतरांबोध्यः ।२=

तत्र बहुव्रीहिनिर्देशे अनच्कस्य द्विर्वचनं प्राप्नोति आह तु आदुः किंकारणं अन्यपदार्थत्वाद्बहुव्रीहेः अन्यपदार्थेन बहुव्रीहिर्वर्तते तेन यद
न्यस्य च तत्र स्याद्द्विर्वचनं स्यात् तद्यथा चित्रगुरानीयतामित्युक्ते यस्य ता गावः सन्ति स आनीयते न गावः सिद्धं तु तद्गुणसंविज्ञानात्पाणिनेर्यथा लो
के सिद्धमेतत्कथं तद्गुणसंविज्ञानाद्भगवतः पाणिनेराचार्यस्य यथा लोके तद्यथा लोके शुक्लवाससमानय लोहितोष्णीषाः प्रचरन्तीति इति तद्गुण आनी
यते तद्गुणाश्च प्रचरन्ति एवमिहापि ॥८॥ ॥७॥ अस्ति ॥

दर्शनक्रियायां वाससामुपलक्षणत्वेनोपात्तानि तथा च तानि युक्तान्येव दर्शनक्रियात्वानयनोपलक्षणत्वेन निर्दिष्टेतिनावश्यं तत्र शुक्लानां वाससां संविज्ञानं
चित्रगुशब्दस्तु स्वस्वामिभावविशिष्टमन्यपदार्थमाहेति नास्त्यानयने वर्तिपदार्थसंनिधा इह तु एकोऽच् यस्य स एकाजिति विशिष्टावयवोपलक्षितस्यावयवि
नोऽन्यपदार्थत्वादवयवपरित्यागे नावयविनोऽभावात्तस्य कार्यं विधीयमानं तत्रान्तर्भावात्संनिहितोऽवयव उपलक्षणभावेनाप्युपादीयमानः प्रतिपद्यते ॥ ० ॥

भा०कै० ६
४

अथ्ययस्येति सोपस्कारत्वात् सूत्राणां तन्निबंधनानित्यस्य संस्कारकाणि वाक्यांतराण्युपलभ्यंते तत्रादेः इत्येतत्संख्ये[illegible]येवर्तते तच्च संख्येयं शब्दानामन्वाख्येयत्वेन प्रस्तुतत्
त्वाच्छब्दरूपं वा स्यात् तत्संबंधिवोच्चारणं तत्र यदा शब्दरूपं संख्येयं तदैकाचइति स्थानेयोगाषष्ठी षष्ठीस्थानेयोगेति परिभाषोपस्थानात्तदा स्थाने द्विर्वचनमित्येष पक्षो भव
ति यथास्तेर्भूरिति यदा तूच्चारणं संख्येयं तदा तस्य क्रियारूपत्वात् क्रियायाः शब्दस्य च स्थान्यादेशभावायोगादेकाच इति कर्मलक्षणा षष्ठी विज्ञाने उच्चारणशब्दाध्या
हारेण शेषलक्षणा वा यथा मातुः स्मरतीति द्विः प्रयोगो द्विर्वचनमित्येष पक्षो भवति तत्र गुणदोषपरीक्षार्थो विचारः क्रियते आटटइति प्रागिद्विर्वचनं भवति द्वि

अथ यस्य द्विर्वचनमारभ्यते किं तस्य स्थाने भवति आहोस्विद् द्विः प्रयोगइति कश्चात्र विशेषः स्थाने द्विर्वचने णिलोपवचनं समुदायादेशत्वात्
स्थाने द्विर्वचने णिलोपो वक्तव्यः आटिटत् आशिशत् किं कारणं समुदायादेशत्वात् समुदायस्य समुदायआदेशः तत्र संप्रमुग्धत्वात् प्रकृति
प्रत्ययसमुदायस्य न श्रेणिर्भवतीति णेरनिटीति णिलोपो न प्राप्नोति॥ ॥ ॥श्री॥ ॥

र्वचनं पणपवायावैकादेशाल्लोपोपधालोपणिलोपकिकिनोरुत्वेभ्यः इति अथ वाकृतेपि णिलोपे द्विर्वचने चौतिरूपस्थानिवद्भावात्कृताकृतप्रसंगित्वान्नित्यत्वाद्द्वि
र्वचनं तच्चैकस्य शब्दांतरं समुदायरूपमादेशस्तत्र णेरभावादिकारलोपाप्रसंगः न च स्थानिवद्भावास्ति ग्रहणेना[illegible]देशस्य ग्रहणं न ह्ययं णेरादेशः किं तर्हि समुदायस्य शि
ब्दस्य यत्र च द्वौ स्थानित्वेन शब्देन निर्दिष्टौ यथैकः पूर्वपरयोरिति तत्रान्यतरेणादेशस्य व्यपदेशो भवति खट्वर्श्य इति इह तु समुदाये णिरंतर्भूतत्वात् देशो न संबध्यते न तु सा राम०
र्वक्षादिस्स विषयोयं स्थानिवद्भावस्य॥ ॥ ॥श्री॥ ॥ ४

= एवं चाच्कृतवर्णादेशत्वादुपसंख्यानवती भावः। २ =

अनित्यं द्विर्वचनमिति द्विर्वचनेऽचीति कार्यस्थानिवद्भावं मन्यते अशोः सन्यनिटः इत्यादिसन्यङोरित्यत्र व्याख्यास्यते नेमतुरित्येणैन इति न त्वे धातुरादेशादिर्भवति ततो द्विः
प्रयोगेप्यादेशादित्वं न व्यावर्तते [redacted] स्थाने द्विर्वचने तु शङ्कां तत्वादादेशादित्वाभावः आदेशादित्वपरे शस्य चात्रात्वा

=ननु समुदायादेशस्य आदेशान्तरत्वादादेशादित्वाभावे पि स्थानिवद्भावात्सादेश आह: आदेशादीति यथाप्राप्ते

इदमिह संप्रधार्यं द्विर्वचनं क्रियतां णिलोप इति किमत्र कर्त्तव्यं परत्वाण्णिलोपः नित्यं द्विर्वचनं कृतेपि णिलोपे प्राप्नोत्यकृतेपि द्विर्वचनमप्यनित्यं
अन्यस्य कृते लोपे प्राप्नोत्यन्यस्याकृते शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति नित्यमेव द्विर्वचनं कथं रूपस्थानिवत्वात् यच्चास्य मत्वं. तस्य द्विर्वचने
चोद्यं तदिहापि योज्यं किं पुनस्तत् सन्यङोः तस्येति चेद् अशोः सन्यनिटः दीर्घकुत्वसंप्रसारणापत्वमधिकस्य द्विर्वचनात् अपरथ्यो श्चाप्यभ्यस्तविधिप्रति
षेधः सन्दशब्ये च समुदाये समुदायादेशत्वात् स्यलाश्रये चाव्यपदेश आमिश्रत्वादिति अस्मिन्नर्हि द्विःप्रयोगो द्विर्वचनं द्विःप्रयोग इति चेत् सकारषका
रादेः शादेरिति प्रतिषेधः प्राप्नोति स्थाने पुनर्द्विर्वचने सति समुदायस्य समुदाय आदेशः तत्र संप्रमुग्धत्वाल्लक्षितिमत्यस्य नष्टः स आदेशादिर्भवति
द्विःप्रयोगे चापि द्विर्वचने सति न दोषः च स्थाने तत्र लिङ्ग्रहणसप्रयोजनं लिटीय आदेशादिस्तदादेर्नेति इडुच्चनं चय इ. लोपे इड्भावश्चयड्.

शादेरेव वचनं लिटि द्विःप्रयोग इति चेत् सकारषकारादेरेत्वं लिटि वक्त (९ लोपे वक्तव्यः॥ ॥श्री॥ ॐ ॥
व्यं नेमतुः नेमुः सेहे सेहाते सेहिरे अनादे २४ देश

=प्रकृतिः पूर्वभागोऽन्त्यः तिङन्तकार्यादेशरूपः प्रत्ययः उत्तरभागः न प्रत्यत्रान्तिमे लिटीत्यं कृतः॥ २=

अयत्वात्स्थानिवत्वाभावः लिटीति नेमतुस्त्वयोरनैमित्तिकत्वाच्छिणिनिमित्तत्वाभावः॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

भा० कै० ६
५

वेमिरिति तेति । वेमिघ शब्दान्तत्वस्य छ्वोपयत्नोपयोः कृतयोरिट्प्रतिषेधः प्राप्नोति पूर्वस्मादपि विधौ स्थानिवद्भाव इत्यनाशङ्क्य चोद्यप्रतिसमाधाने एकाचोंगादिति उपदेशग्रहणो नानुदात्त एव विशेष्यते न त्वेकाज्जिति भावः आवृत्तिसंख्या चैतद्यजंगने काच नन्वेकैकमिति एकमेव द्विरुच्यते इत्येकस्मा धः प्रत्ययविधिः सोऽपरस्मादपीति दे

वेमिरित्ता वेमिरि इतुं एकाच उपदेशेनुदात्तादित्ती ट्प्रतिषेधः प्राप्नोति स्थाने पुनर्द्विर्वचने सति समुदायस्य समुदाय आदेशः तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य न ष्टः सम्भवतिय एकाजुपदेशेनुदात्तः द्वि प्रयोगे चापि द्विर्वचने न दोषः एकाज्ग्रहणेनांगं विशेषयिष्यामः एकाचोंगादिति नन्वेकैकमत्रांगं समुदाये यावाक्यपरिसमाप्तिस्तयांगसंज्ञा भविष्यति कुत एतत् शास्त्राहानेः एवं हि शास्त्रमहीनं भवति इउदीर्घप्रतिषेधश्च इटो दीर्घत्वस्य च प्रतिषेधो वक्तव्यः जरीगृहिता जरीगृहि तुं ग्रहोलिटि दीर्घ इति दीर्घत्वं प्राप्नोति स्थाने पुनर्द्विर्वचने सति समुदायस्य समुदाय आदेशः तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य न ष्टो ग्रहिः प्रयोगे चापि द्विर्वचनेन दोषः ग्रहिणांगं विशेषयिष्यामः ग्रहेरंगादिति नन्वेकैकमप्यत्रांगं समुदाये यावाक्यपरिसमाप्तिस्तयांगसंज्ञा भविष्यति कुत एतत् शास्त्राहानेः एवं शास्त्रमहीनं भवति पूर्वादिविधिप्रतिषेधश्च पूर्वादित्वलक्षणाविधेः प्रतिषेधो वक्तव्यः ॥ श्री

= नत्वृद्विंश्वेयोगेजरीगृहिर्ग्रहि हिरेवएकदेशविकृतन्यायेनचांगत्वमपीति शेषः कृदवस्य एवेत्यत आह· विशेषणेति· अंगस्य विभक्तिविपरिणामेन विशेषणसामर्थ्यादित्यर्थः ॥ २ =

त्संगे भवत स्तत्र परंपदे काजंगं तदाश्रय इट्प्रतिषेधः प्राप्नोतीत्यर्थः आवृत्तिसंख्याश्रया चैकैकमिति वीप्सा समुदाय इति एकैकांगसंज्ञा समुदायस्य ननु पृथगवयवयोः समुदायस्य प्राधान्यात्प्रधाने कार्यसंप्रत्ययात्समुदायव्यवहारो प्राप्त इति संख्याश्रयः जरीगृहितेति जरीगृह्य पाठात् च ग्रहिणांगमिति अत्र तच्चोज्जरीगृहि संगं न तु ग्रहिः विशे ए०म०
षणसामर्थ्याद्धि यथा श्रुत रूपांगी करणां ॥ ॥ ॥ श्री ॥ ॥ ५

सिषेचेति सिचेर्लिङ् विहित इति तिङ्. तं पदमिति तदादेरेव पदत्वात्तदादि सकार इति षत्वप्रतिषेधप्रसंगः प्रकृतिप्रत्ययस्येति प्रत्यययोस्तानं प्रकृतिविज्ञानस्ये
त्यर्थः तावेवेति परिहारान्तरं उच्चारणक्रियाया एव द्वित्वं न तूच्चार्यमाणस्य शब्दस्य ततश्चैकस्मादेव प्रत्ययविधिः ननु द्वाभ्यामित्येकैवांगसंज्ञा चेति नास्ति दो
षः आदिग्रहणं चेति प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदंतस्य ग्रहणं भवतीत्यत्र समुदायपदत्वमिति सिषेच शब्दस्य पद[redacted]

=उच्चारणक्रियाद्वयविशिष्टेसर्वः।२=

सिषेच सुष्वाप सात्पदाद्योरिति षत्वप्रतिषेधः प्राप्नोति स्थानेपुनर्द्विर्वचने सति न दोषः समुदायस्य समुदाय आदेशः तत्र संप्रमुग्धत्वा
त्प्रकृतिप्रत्ययस्य नष्टः सपदादिर्भवति द्विः प्रयोगे चापि द्विर्वचने न दोषः सुप्तिङ्भ्यां परं विशेषयिष्यामः सुप्तिङं तं परं यस्मात्सुप्तिङ् विधिः
तदादि सुवं तं तिङं. तं च ननु चैकैकस्मादप्यत्र सुप्तिङ् विधिः समुदायेयावाक्यपरिसमाप्तिः तया पदसंज्ञा भविष्यति कुत एतत् शास्त्रहा
नेः एवं हि शास्त्रमहीनं भवति तावेव सुप्तिङौ यो ततः परौ सैव च प्रकृतिराद्या आदिग्रहणं च कृतं समुदायपदत्वमेतेन अजादेः द्वितीयस्ये

१ त्यवचनमजादेरिति कर्मधारयात्पंचमी॥ ॥ श्री

संज्ञा न तु सेचशब्दस्य तद्व्यवस्य नन्वेवं वेभिदितेतिस एवैकाज्धातुरितीट्प्रतिषेधः प्राप्नोति नैष दोषः उच्चारणभेदाद्विरोधि संज्ञाप्रादुर्भावात्पूर्वे संख्याकृतव्यपदेशनि
वृत्तेर्नात् तथा च गिरिरोत्सादौ सावेकाच इति विभक्तेरुदात्तत्वं न भवति तदत्रा वृत्तिभेदाद्रूपद्वयमाश्रित्य समुदायेवाक्यपरिसमाप्तिरिति परिहार उक्तः रूपभेदानंगीकर
णेन तु [redacted] तावेव सुप्तिङाविति द्वितीयपरिहारः॥ अजादेर्द्वि॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ०

भा०कै०६ द्वितीयस्येति शक्यमवक्तुमिति अजादेरिति बहुव्रीहिपक्षे सामर्थ्यादसमर्थ्यमार्थे प्रारंभे विज्ञायमाने तृतीयानामप्येकाचो द्विर्वचनप्रसंगात् द्वितीयस्येति वक्तव्यं कर्मधारय
६ पक्षे त्वजादेरिति पंचमीनिर्देशात् तस्मादित्युत्तरस्येति परिभाषोपस्थानादनंतरस्यैव कार्यलाभाद्व्यवहितस्येति नार्थो द्वितीय ग्रहणेन तत्र व्याख्यानात्तु पदार्थप्रधान
त्वादंतरंगत्वाच्च कर्मधारय एवाश्रयितव्य इति भावः प्राप्तत्वादिति यद्यपि तत्सामेव प्राप्तो निवृत्तिः कृत्यतेन तत्सत्संतथापि विशिष्टप्राप्तिरिहहेतुत्वेन विवक्षिता प्राप्तेर्वि

= विपर्यकांतरप्राप्यविशिष्टेत्यर्थः। यथा कारणेः परदेशास्येकेनाक्रांतत्वात् द्वितीयस्य परत्वयोगादित्यर्थः।

द्वितीयस्येति शक्यमवक्तुं कथं अजादेरिति नैषा बहुव्रीहेः षष्ठी अच् आदिर्यस्य सोयमजादिः अजादेरिति किं तर्हि कर्मधारयात् पंचमी अच्
आदिः अजादिः अजादेः परस्येति तत्रांतरेण द्वितीयग्रहणं द्वितीयस्यैव भविष्यति तत्र द्वितीयद्विर्वचने प्रथमनिवृत्तिः प्राप्तत्वात् द्वितीयद्वि
र्वचने प्रथमस्य निवृत्तिर्वक्तव्या अटिटिषति अशिशिषतीति किं कारणं प्राप्तत्वात् प्राप्नोत्येकाचो द्वे प्रथमस्येति ननु च द्वितीयद्विर्वचनं प्रथ
मद्विर्वचनं वा धिष्यते कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात् असति खल्वपि संभवे बाधनं भवति अस्ति च संभवो यदुभयं स्यात्॥ ॥

घातकाभावादित्यर्थः ननु चेति येन नाप्राप्तिन्यायात् कथमन्यस्येति विरोधाद्धि बाध्यबाधकभावं मन्यते यथा कारणैः इह च विरोधाभावः अविरोधे हि समुच्चयो दृश्यते य राम०
थाकृत्तसप्रत्ययसंज्ञानां तासमुच्चय इति चेदिहाप्यस्त्वेव फलभेदश्च केन प्रथमस्य द्विर्वचनविधानात् अजादेर्द्वितीयस्येत्यनेन तु द्वितीयस्य॥ ॥ श्री ६
॥श्री॥ ×भिन्नफलत्वात्संज्ञा ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

नवेति अनेनासंभवः प्रदर्श्यते यस्य द्वितीयस्यैकाचो द्विर्वचनं विधेयं तस्य प्रथमद्विर्वचने कृते द्वितीयत्वात् द्वितीयद्विर्वचनं न प्राप्नोतीत्यर्थः ननु यदि नियोगतः प्राक् प्र
थमद्विर्वचनं स्यात्तदायं विरोधः स्यात् यदा तु पूर्वं द्वितीयद्विर्वचनं तदा विरोधाभावात्स्यादेव प्रथमद्विर्वचनं नैतदस्ति नित्यत्वात्प्राथम्यात् क्रमव्यतिक्रमे त्वभावात् पूर्वं प्रथम
द्विर्वचनं तत्र कृते द्वितीयत्वात् द्वितीयद्विर्वचनाप्रसंग इत्यनवकाशत्वात् द्वितीयद्विर्वचने न प्रथमद्विर्वचनं बाध्यते तद्यथेत्युदाहृ द्वयोः पुरस्तान्मध्ये वा तृतीय उपजाय
ते तदायं दृष्टान्तो यदा तु परत उपजायते तदा द्वितीयो द्वितीय एव भवति नहि किंचिदस्ति द्वितीयत्व[तत्सामा] निर्देशात् विशेषानुपादानात् सामर्थ्याद्दत्र विशेषः आश्रीयत इति मत्वाह
अनारंभसममिति अटिस इति [स्थिते] प्रथमद्विर्वचनं अट् अट् हलादिः शेष इति टकारस्य निवृत्तिः द्वितीयद्विर्वचनमट् अट् ततो हलादिः शेषः तत्र द्वयोस्त्रयाणां वा ऽकाराणां प

नवा प्रथमविज्ञाने हि द्वितीयाप्राप्तिर्द्वितीयत्वात् नवा वक्तव्यं किं कारणं प्रथमविज्ञाने हि सति द्वितीयस्याप्राप्तिः स्यात् किं कारणं अद्वितीयत्वात् नहीदानीं
प्रथमद्विर्वचने कृते द्वितीयो भवति कस्तर्हि तृतीयः तद्यथा द्वयोरासीनयोस्तृतीय उपजायमाने न द्वितीयो द्वितीयो भवति कस्तर्हि तृतीयः नहि किंचिदुच्यते अकृ
ते द्विर्वचने यो द्वितीयस्तस्य भवितव्यमिति किं तर्हि कृते द्विर्वचने यो द्वितीयस्तस्य द्विर्वचनं भविष्यति अनारंभसममेवं स्यात्॥ ॥ ॥

रूपे विशेषाभावात् द्वितीयद्विर्वचनमनर्थकं स्यादित्यर्थः हलादिशेषो द्वितीयद्विर्वचनमित्ययं क्रमः कथं लभ्यते विपरीतक्रमः कस्मान्न भवति उच्यते नित्यत्वात्पूर्वं हला
दिःशेषो भवति द्वितीयद्विर्वचनं शब्दान्तरप्राप्त्या अनित्यं तद्द्विः कृते हलादिः शेषे टः प्राप्नोति अकृते तु टट् शब्दस्यान्तरंगत्वादतो गुण इति पररूपं सम्पद्यत इतीत्वस्य बाधकं मन्यते
इत्वं हि सनमभ्यासं चापेक्षत इति बहिरंगं प्रागभ्यासविकारेभ्योंगाधिकार इति पक्षे इत्वमांगं न भवतीति वाणो ह्यांगं बलं न विद्यस्यापि नास्ति यस्य पित्वेत्वस्यांगत्वेनानाश्रयत्वाद्धांगबाणेयो
रत्र परिभाषानुपस्थानमिति भावः तस्मात्सामर्थ्याद्दत्राकृते प्रथमद्विर्वचने यो द्वितीयस्तस्य द्विर्वचनेन भाव्यं॥ ॥ ॥ ॥ ः

चनं द्वितीयद्विर्व-

भा०कौ०६ सच प्रथमद्विर्वचने कृते द्वितीयो न भवतीति सामर्थ्यात्प्रथमद्विर्वचनेन वाध्यते कृतेपि प्रथमद्विर्वचने यो द्वितीयस्तस्य द्विर्वचनं नानर्थकमिति मत्वाह नानारंभसममिति इत्वमिति

७ आसन्नमपि समाप्तेरंगाधिकारादंगमित्वं सामान्येन च वार्णादांगं बलवदित्याश्रीयते न समानाश्रयांगवार्णविषयमेवेति इत्वमेव प्रवर्तते न परूपं तत्र कृते द्वितीयद्विर्वचनं प्राप्नो

सम्प्रसारणासवर्णे इतीयङादेशश्च तत्र नित्यत्वाद्द्वितीयद्विर्वचनमियङादेशाद्धि नित्यः कृते द्वितीयद्विर्वचने नित्यत्वादित्वे चासवर्णे इति वचनादियङोऽप्रसंगात् ननु परस्य

कृतेपीत्वे तस्य स्थानिवद्भावात्पूर्वस्येयङ् प्राप्नोति नैष दोषः सवर्णे न भवतीति प्रसज्यप्रतिषेध आश्रीयते सवर्णे चयो विधिः स सवर्णस्य विधिर्भवतीति सवर्णविधौ

=वस्तुतस्त्वभ्यासस्यासवर्णे इति निर्देशारंभसामर्थ्यादेतद्विषये स्थानिवद्भावो न प्रवर्तते १=

अटेः प्रथमस्य द्विर्वचनं स्यात् हलादिः शेषः द्वितीयस्य द्विर्वचनं हलादिः शेषः त्रयाणामकाराणां पररूपत्वे अटिटिषतीत्येवं रूपं स्यात् नानारंभसा

मं अटेः प्रथमस्य द्विर्वचनं हलादिः शेषः इत्वं द्वितीयस्य द्विर्वचनं हलादिः शेषः इत्वं द्वयोरिकारयोः सवर्णदीर्घत्वं अभ्यासस्यासवर्णे इतीयङादेशः

१ इयटिषतीत्येतद्रूपं यथा स्यात् ओणेश्चोवोणिषतीति॥ ॥ ॥श्री॥ ॥

=इदं न पश्यंतस्तत्र भाष्यासंवादिः पूर्वत्रासिद्धेन स्थानिवदिति सामिसवर्णग्रहणमसमासव्याख्यानात् १ = मन्यन्त इति · वार्णादांगमिति च समानाश्रयविषयमिति निमन्यन्त इति भावः १ = भाष्य इति · समानाश्रयत्वेनैतस्मिन्निति तु निर्मूलमिति भावः २ =

स्थानिवत्त्वप्रतिषेधादियङोऽप्रसंगात् द्वयोरिकारयोरिति॥ अथ परस्येयङादेशः कस्मान्न भवति अंतरंगत्वात्पूर्वमेकादेशं मन्यते एकादेशस्य त्वभ्यासह्रस्वत्वं विशेषाभावान्नो

क्तं इयटिषतीति अस्यामपि प्रक्रियायां नास्ति द्वितीयद्विर्वचने विशेषः अकृतेपि तस्मिन्नेतद्रूपभावात् प्रथमद्विर्वचने कृते हलादिः शेषः इत्वं इयटिषतीति कार्यप्रवर्तनाद्दत एवान्ये संग्र

थ इत्वं परस्येयङादेशो द्वयोरिकारयोः सवर्णदीर्घेनाईयटिषतीत्येतद्रूपं यथा स्यादिति युक्त एवायं ग्रंथो वार्णादांगं बलवदिति परस्येयङा भाव्यं न त्वेकादेशो न तस्मिन्

कृते एकादेशस्तस्य त्वं तद्भावात् ह्रस्वत्वं न भवति नाभ्यासादीनां ह्रस्वत्वमित्यादिवद्भावप्रतिषेधात् ओणेश्चेति अत्रापि उवोणिषतीति पाठेन भाव्यं उवोणिषतीत्येतस्या एम० ७

१ कृते द्वितीयद्विर्वचने सिद्धत्वात्॥ ॥श्री॥ ॥

नानिष्टार्थेति द्वितीयस्येति व्यक्तिराश्रीयते न जातिः पाचाकृते द्विर्वचने द्वितीयव्यक्तिः साकृतेतस्मिन् द्वितीयान भवतीति विशेषात् द्वितीयद्विर्वचनेन प्रथमं द्विर्वचनं वाध्यते
यथा वेति भवतु द्वितीयस्येति जाति निर्देशस्तथापि सामान्यविहितस्य विशेषविहितमसत्यपि विरोधे वाधकं भवति यथा द्वीपमित्यादाववादेः परस्येत्यादेर्विधीयमानमपीत्वमं

=व्यक्तिरिति-व्यक्तिविशेषइत्यर्थः। नजातिरिति-व्यक्तिसामान्यमित्यर्थः।१८=

नानिष्टार्थाशास्त्रप्रवृत्तिर्भवितुमर्हति यथा वादिविकारेऽलोन्त्यविकाराभावः यथा वा आदिविधावलोन्त्यविधिर्न भवति एवं द्वितीयद्विर्वचनेप्रथमद्विर्व
चनं [redacted] न भविष्यति विषमउपन्यासः नाप्राप्ते लोन्त्यविधाने आदिविधिरारभ्यते स तस्य बाधको भविष्यति इदमप्येवं जातीयकं नाप्राप्ते प्रथम
द्विर्वचने [redacted] द्वितीयद्विर्वचनमारभ्यते तद्बाधकं भविष्यति यदप्युच्यते असत्यपि त्वविसंभवे बाधनं भवति अस्ति च संभवो यदुभयं स्यात् नैतद
स्ति असत्यपि संभवे बाधनं भवति तद्यथा दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि दधिदानस्य संभवे तक्रदानं निवर्तकं भवति एवमिहापि
सत्यपि संभवे प्रथमद्विर्वचनस्य द्वितीयद्विर्वचनं बाधिष्यते तत्र पूर्वस्याचो निरन्तरौ व्यंजनस्यानिरन्तरं द्विर्वचनं यथा अरिरिषतीति॥

=अयंभावः। विरोधेबाध्यबाधकभावोनहि किन्तुः समानफलकत्वेऽपि। तथा चालोन्त्यस्यादेः परस्यस्थानयोर्द्वित्वाभेदेनसंस्कारजातविशेषाभावेपिषष्ठीसंस्कारमात्रेणोभयोः समानफलकत्वं। दधिब्राह्मणेभ्योदीयतां तक्रं कौण्डिन्यायेत्यत्रौदनसंस्कारमात्रेण दधितक्रयोर्बाध्यबाधकता

शेधाभावे पिधानुसंस्कार

त्यस्य न भवत्येवमिहापि द्वितीयद्विर्वचनं विधीयमानं प्रथमस्य न भवति ननु चापवादेनैकदेशस्यादेः परस्येत्यादिमलमनुसंहृतेति कुतो लोन्त्यस्य प्रसंगः इह तु प्रथमस्य द्विती
यस्येति च षष्ठीद्वयसंभवादुभयोः प्रसंगः नैतदस्ति अपवादेनैकापि षष्ठीवचनद्वयप्रामाण्यादर्थं तावदुपसंह्रियेत अपवादाद्यं तयोरीत्वं भवतीति एकस्माद्वियहणकवाक्या
(२ दन्त्र्यूपसंस्कारकमनेकं प्रक्रियावाक्यमुपप्लवते॥ ॥ ॥श्री॥ ॥

भा० कै० ६ यथैवाचो निवृत्तिरिति यथाभूतस्य प्रथमैकाचो द्विर्वचनं प्राप्तं तथाभूतस्य द्वितीयद्विर्वचनेन बाधः । सव्यंजनस्य चप्राप्तमिति व्यंजनानामपि द्विर्वचनबाधप्रसंग इत्यर्थः अ
८ भ्यासनात्पूर्वस्येति अप्राप्तनुमानं बाधोन हि प्रमाणेन प्राप्तं बाधितुं शक्यते प्रमाणत्वाविशेषात् तस्मादजादिधातुद्वितीयद्विर्वचनविषये प्रथमद्विर्वचनं न विहितं न प्रति
षिद्धं न दभायीवच्च व्यंजनानि भवंतीति द्वितीयैकाजंतर्भावान्नानिर्दिष्टत्वं तत्र इत्यर्थः न्यायसिद्धेऽर्थे लिंगदर्शनमाह न्द्राः इति प्रतिषेधाच्चेति न्द्रा प्रयुते आरदयस्ते षां द्विर्व

=न प्रतिषिद्धमिति शब्दतः प्रतिषेधो हि तथायां =एकाच इत्यत्र कुतो हि इति भावः।३=अप्राप्तीति द्वितीयैकाच्त्व तजादिधातनि मिर्दिष्टविषयमेकाचो इतीति भावः।२=
=किंतु न विशंकतेति भावः।८=

यथैवाचो निवृत्तिरेवं व्यंजनस्यापि प्राप्नोति तत्र पूर्वस्याचो निवृत्तौ व्यंजनस्यानिवृत्तिरभ्यासनात्पूर्वस्य तत्र पूर्वस्याचो निवृत्तौ व्यंजनस्यानिवृ
त्तिः सिद्धा कुतः अभ्यासनात्पूर्वस्य नेह वयं पूर्वस्य प्रतिषेधं शिष्मः किं तर्हि द्वितीयस्य द्विर्वचनमारभामहे व्यंजनानि पुनर्नदभायीव
त् तद्यथा नराणां स्त्रियो रंगगता यो यः पृच्छति कस्य यूयमिति तं तं तव तवेत्याहुः एवं व्यंजनान्यपि यस्य यस्याचः कार्यमुच्यते तं तं भजंते न्द्राः इति प्र
तिषेधाच्च यरव्यंजनं न्द्राः संयोगादय इति प्रतिषेधं शास्ति तत् ज्ञापयत्याचार्यः पूर्वनिवृत्तौ व्यंजनस्यानिवृत्तिरिति तत्र द्वितीयाभावे प्रथमाद्विर्वचनं
प्रतिषिद्धत्वात् तत्र द्वितीयस्यैकाचो भावे प्रथमस्य द्विर्वचनं न प्राप्नोति आटतुः आटुः किं कारणं प्रतिषिद्धत्वात् अजादेर्द्वितीयस्येति प्रतिषेधात्॥

चनप्रतिषेधादन्यानि द्वितीयेनाचा सहद्विरुच्यं तेन तत्र द्वितीयाभाव इति इहाजादेरिसजादेः सामान्यनिर्देशात्तत्र द्वितीयद्विर्वचनमारभ्यमाणं प्रथमद्विर्वचनस्य बाधकमि
ति यस्यामप्यजादित्र्यक्तौ द्वितीयाभावात् द्वितीयद्विर्वचनाभावस्तस्यामपि प्रथमद्विर्वचनाप्रसंगः अरिरिषतीत्यादावजाद्यात्मनो विधीयमाने द्वितीयद्विर्वचनमारतुरित्या राम०
दावपि प्रथमद्विर्वचनं बाधेतेत्यर्थः अप्राप्तेरेवात्र प्रतिषेधफलेन विवक्षिता॥ ॥ ॥ ॥ ८

सति तस्मिन्निति अजादेरिति व्यक्तिनिर्देशो न त्वाकृतिनिर्देशः अतो नायमपवादोऽजादिमात्रनिबंधनः द्वितीयस्यैकाचः संभवमभिसमीक्ष्य प्रवर्त्तते यत्रेदानीं द्वितीयो नास्ति तत्रानु
पजातनिमित्तोऽपवाद एव न प्रवर्त्तत इति प्रथमैकाचो द्विर्वचनमुत्सर्गः प्रवर्त्तत एव तेन यस्यामेवाजादिव्यक्तौ द्वितीयद्विर्वचनं प्रवर्त्तते तस्यामेव प्रथमद्विर्वचनं बाध्यते नान्यस्या

नैष दोषः सति तस्मिन् प्रतिषेधः सति द्वितीयद्विर्वचने प्रथमस्य प्रतिषेधः सति तस्मिन् प्रतिषेध इति चेद्धलादिःशेषे दोषः सति तस्मिन् प्रतिषेध इति चेद्धलादिःशेषे
दोषो भवति हलादिःशेषे सत्याद्ये हल्यनाद्यस्यालोपः स्यात् इहैव स्यात् पपाचेति इह न स्यात् आटतुः आटुरिति लोकवद्धलादिःशेषे लोकवद्धलादिःशेषेपि दु
तद्यथा लोके ईश्वर आज्ञापयति ग्रामाद्ग्रामान्मनुष्या आनीयंतां प्रागंगंग्रामेभ्यो ब्राह्मणा आनीयंतामिति येषु तत्र ग्रामेषु ब्राह्मणा न संति न
तर्हीदानीं ततोऽन्यस्यानयनं भवति यथा तत्र क्वचिदपि ब्राह्मणस्य सत्ता सर्वत्र अब्राह्मणस्य निवृत्तिका भवति एवमिहापि क्वचिदपि हलाद्यः सत्सु सर्वस्या
नाद्यस्य हलो निवर्त्तको भवति क्वचिदन्यत्र लोप इति चेद्द्विर्वचनं क्वचिदन्यत्र लोप इति चेत् द्विर्वचनमप्येवं प्राप्नोति क्वचिदपि द्वितीयः सत्सु सर्वस्य प्रथमे निवर्त्त
कः स्यात् [redacted]

मिसर्थः जात्युपलक्षिता व्यक्तिः प्राधान्येनाश्रीयते न तु जातिः तेन सर्वस्यामेवाजादिव्यक्तौ द्वितीयवत्सामिदं शास्त्रं प्रवर्त्तते व्यक्तिपदार्थाश्रयणे दोषमाह सति तस्मिन्निति लो
कवदिति तत्राकृतिः पदार्थ आश्रीयत इति प्रागंगमिति यथा ग्रामाकृतेराश्रयणात् क्वचिदपि ग्रामे वर्त्तमानो ब्राह्मणो मनुष्यांतरानयनं निवर्त्तयति तथाभ्यासजातेरा
श्रयणात् क्वचिदप्यभ्यासे वर्त्तमानो हलादिः सर्वत्रानादेर्हलो निवृत्तिं करोतीत्यर्थः ॥ ॥ ०

तस्मादस्त्विति इह व्यक्तिपक्ष आश्रीयते हलादिः शेषे तु जातिपक्षो व्यक्तिपक्षेपि वा प्रतिविधास्यते हलन्भ्यासो भवति ततत आदिः शेष इति नन्द्राः किमर्थमिति पूर्वे स्याचो
व्यंजनानीति पूर्वपक्षो नदमायविद्व्यंजनानीत्युत्तरः पक्षः पूर्वोभ्यासः कस्य पूर्व इति अवध्यवधिमत्त्वं षष्ठे द्विर्योगलक्षणा पंचमी भवति यथा ग्रामात्पूर्वः इ हलवयवा
=नहल्यत्रताडणाभ्यासो भवतीति सामान्येनाभ्यासहलां निवृत्तिः आदिःशेषइत्यनेनतादेःशेषःक्रियते·२=

तस्मादस्तु सतितस्मिन्प्रतिषेधइत्येव ननु चोक्तं सति तस्मिन्प्रतिषेध इति चेत् हलादिः शेषे दोष इति॥ प्रतिविधास्यते हलादिः शेषे नन्द्राः किम
र्थमिदमुच्यते न्द्रादेर्द्विर्वचनप्रसंगस्तत्र न्द्राणां प्रतिषेधः न्द्रादेरेकाचो द्विर्वचनं प्राप्नोति तत्र न्द्राणां संयोगादीनां प्रतिषेध उच्यते ईर्ष्यतेस्तृ
तीयस्य द्वे भवतः ईर्ष्यतेस्तृतीयस्य द्वे भवत इति वक्तव्यं केचित्तावत् एकाचः ईर्ष्यिषिषति अपर आह व्यंजनस्येति ईर्ष्यियिषति कंड्वादीनां च तृ
तीयस्य द्वे भवत इति वक्तव्यं कंडूयियिषति असूयियिषति वा नामधातूनां तृतीयस्य द्वे भवत इति वक्तव्यं अश्वीयियिषति अशिश्वी
यिषति अपर आह यथेष्टं वा यथेष्टं वा नामधातूनामिति पुपुत्री यिषति पुतित्रीयिषति पुत्रीयियिषति पूर्वोभ्यासः पूर्वोभ्यास इत्युच्यते
कस्य पूर्वोभ्यासः संज्ञो भवति द्वे इति वर्तते द्वयोरिति वक्तव्यं सत्यं हि तथा निर्देशः कर्तव्यः न कर्तव्यः अर्थाद्विभक्तिविपरिणामो भविष्यति
तद्यथा उच्चानि देवदत्तस्य गृहाणि आमंत्रयस्वैनं देवदत्तमिति गम्यते देवदत्तस्य गावो अश्वा हिरण्यं आढ्यो वैधवेयः देवदत्त इति गम्यते पुरस्तात्
षष्ठीनिर्दिष्टः सदर्थात्प्रथमानिर्दिष्टा द्वितीया निर्दिष्टं च भवति एवमिहापि पुरस्तात्प्रथमानिर्दिष्टः सदर्थात् षष्ठीनिर्दिष्टो भविष्यति॥ ॥

वयविसंबंधो विवक्षितः कस्य पूर्वोवयव इति पंचम्यभावो यथापूर्वकायस्येति विभक्तिविपरिणाम इति पूर्वविभक्तित्यागेन सामर्थ्याद्विभक्त्यंतरस्योह इत्यर्थः प्रम०
॥ श्री॥ ॥१॥ ॥१॥ ॥१॥ ॥ १

उभे सहग्रहणमिति सहभूतयोः परस्परापेक्षयोरेकाभ्यस्तसंज्ञा यथा स्यादित्येवमर्थं सहेति वक्तव्यं आद्युदात्तत्वइति यस्यानुदात्तत्वे क्रियमाणे उदात्तस्वरितविधान
मर्थेकमापद्यते सवर्ज्य इति व्याख्याने प्रधानवाचिन्येकशब्दे योगपद्यप्रसंगः एकवर्जमिति संख्यावचनेन विरोधाद्यौगपद्यासंभवात्पर्यायप्रसंगः उभेग्रहणमि

=अयमिदित्वसार्वधातुकेपरतोऽभ्यस्तानामादिरित्यस्य विधानादित्भावः॥२= =प्रधानं उदात्तस्वरितोद्देश्यं वर्जयित्वा शिष्टमनुदात्तमिति तदर्थः॥१= =नन्वनुदात्तं पदमेकवर्जमितिवचनात्कथं द्वयोरुदात्तत्वमत आह॰ यस्मेति॰२= =३॰ [illegible]

उभेऽभ्यस्तं अभ्यस्तसंज्ञायां सहग्रहणं उभेऽभ्यस्तं सहेति वक्तव्यं किं प्रयोजनं आद्युदात्तत्वे पृथगप्रसंगार्थं आद्युदात्तत्वं सहभूतयोर्यथा स्यात्
एकैकस्य मा भूदिति यस्मिन्नेवाभ्यस्तकार्ये दोषस्तदेवं पठितं अनुदात्तं पदमेकवर्जमिति नास्ति यौगपद्येन संभवः पर्यायस्तर्हि प्रसज्येत [redacted]
[redacted] पर्यायश्च पूर्वस्य तावत् परेण रूपेण व्यवहितत्वान्न भविष्यति परस्य तर्हि स्यात् तत्राचार्यप्रवृत्तिर्ज्ञापयति न परस्य भवतीति यदयं भिमेस्यादीनां
पित्ति प्रत्यये पूर्वमुदात्तं भवतीत्याह एवं व्यवधानान्न पूर्वस्य ज्ञापकान्न परस्य उच्यते चेदमभ्यस्तानामादिरुदात्तो भवतीति तत्र स एव दोषः पर्यायः
प्रसज्येत तस्मात्सहग्रहणं कर्तव्यं न कर्तव्यं उभेग्रहणं क्रियते तत्सहार्थं विज्ञास्यते अस्त्वन्यदुभेग्रहणे प्रयोजनं किं उभेग्रहणं संज्ञिनिर्दे
शार्थं अन्तरेणाप्युभेग्रहणं प्रकृतः संज्ञिनिर्देशः कथं द्वे इति वर्तते इदं तर्हि प्रयोजनं यत्रोभे शब्दरूपे श्रूयेते तत्राभ्यस्तसंज्ञा यथा स्यात् इह
मा भूत॥ ॥ ॥

=अविद्यमानोदात्तेऽलसार्वधातुके परेऽभ्यस्तानामादिरुदात्तः इत्यर्थकेनानुदात्तेवस्तेनैव सिद्धेरिति भावः। एवमेकैकस्याभ्यासपर्याये तद्दूषितं न समर्थयितुमाह॰ एवमित्यादि॰ [illegible]

ति सहभागोपसर्जनं नद्धित्वमुभशब्दस्यार्थ इति भावः द्वे इत्यनुवृत्ता द्वित्वस्याभ्यस्तसंज्ञायां लब्धायामुभेग्रहणं सहभूतयोरेकाभ्यस्तसंज्ञार्थं॥ श्री

=उक्तार्थमानमाह॰ द्वे इतीति॰१= ॥श्री॥ ॥श्री॥ ॥ ॥

भा०कौ०६ ईर्त्सतीति कृते द्विर्वचने ऽकृत एवाभ्यासलोपे ऽन्तरंगत्वादुभयोः प्रत्येकं प्रवृत्ताभ्यस्तसंज्ञा कृते भ्यासलोपे परस्य ननिवर्त्तेत उभे ग्रहणेन तु निरस्य तदिति भावः ऋध
१० आपश्च ससन्नीर्वतर्द्धेतो उभावपक्षे द्विर्वचनात्परत्वात्प्रतिपदविधेर्बलवत्त्वाद्यापृत्तपृ धामीदितीत्वं रपरत्वं च नन्द्राः संयोगादय इति रेफस्य द्विर्वचनप्रतिषेधः पूर्वं
वासिद्धीयमद्विर्वचन इति वचनात् धकारस्य चर्त्वे तकारे कृते त्स इत्यस्य द्विर्वचनमन्येत्वाहुः अभ्यासलोपसंनियोगेनेत्वमुच्यमानं प्रतीक्षत इति प्रागेव द्विर्वचनं त
च यद्यप्यर्वं वासिद्धीयमद्विर्वचन इत्येतदुभौ साभ्यासस्येति सूत्रारंभादनित्यत्वान्नाश्रीयतेन राधस इत्यस्य तदाश्रयणे तु त्स इत्यस्य ततः ईत्वाभ्यासलोपौ ईर्त्स
इतिस्थिते लटः स्ति अट्भावश्चप्राप्नोति शप्च कृताकृतप्रसंगित्वान्नित्यत्वाच्छ आड्वा वस्तु शपि कृते तेन व्यवधानान्न प्राप्नोतीत्यनित्यः ततो लोन्त इत्यन्तादेशश्चमा
न द्विर्वच०२
ईर्त्सतिर्ईप्सतीति ईर्त्सन्ईप्सन् ऐर्त्सन् किं च स्यात् अड्वानुम्प्रतिषेधो जुसभाव इत्येते विधयः प्रसज्येरन् अड्वा तावन्न दोषः सप्तमे
=उभयत आश्रयणेऽन्तादिवत्प्रति= योगविभागः करिष्यते इदमस्त्यसदभ्यस्तादिति ततत्रात्मनेपदेषु आत्मनेपदेषु चाड्वति अन्तत इत्युभयोः शेषः यदप्युच्यतेनुम्प्रति
=षेधात्वविधेरन्यनिवर्त्तनसमर्थत्वे= षेध इति एकादेशे कृतेऽव्यपवर्गाभावान्न भविष्यति इदमिह संप्रधार्यं नुम्प्रतिषेधः क्रियतां एकादेश इति किमत्र कर्त्तव्यं परत्वान्नुम्प्रतिषेधः
नित्य एकादेशः कृते ऽपि नुम्प्रतिषेधे प्राप्नोत्यकृतेपि एकादेशो ह्यनित्यः अन्यस्य कृते नुम्प्रतिषेधे प्राप्नोति॥ ॥ ॥
=शब्देति एकादेशस्त्वपरं तत्र विशिष्टं पूर्वम कारं गुणसंज्ञकमुत्तरं चापेक्षत इति भावः॥१=
=यद्यपीत्यादिः॥१= =तथापि द्वितीयः॥२=
प्नोति शपय एकादेशश्च तत्रवर्णाश्रयत्वादंतरंगत्वादेकादेशस्ततो ऽड्वा वः प्राप्नोति अथवा शपः प्रागेव परत्वादम्भावः प्राप्नोति सोपि हि नित्यः शपय एकादे
शे कृते तदड्वा तस्य प्रसंगात् ईर्त्सन्निति शतरि कृते शप् च प्राप्नोति एकादेशश्च तत्र वर्णाश्रयत्वादंतरंगत्वादेकादेशे कृते धातुसार्वधातुकयोर्व्यपवर्गाभावाच्छपो प्राप्निः
तत्र सार्वधातुकमात्रापेक्षत्वाच्छवेवांतरंगत्वात्पूर्वं भवति तत्र शब्द परविप्रतिषेधात्परयोरकारयोः पूर्वमेकादेशः ततः पूर्वैरोति प्रक्रियाश्रयः सिद्धांतो भविष्यति राम०
पूर्वयोरकारयोरेकादेशे कृते नुम्प्रतिषेधप्रसंगश्चोद्यते ऐर्त्सन्निति ईर्त्सलङ् झिशप् अकारयोः पररूपएकादेशे कृते तस्मात्तदड्वाड्जुस प्राप्नोति॥ ॥ ॥ १०
=पूर्वपक्षसिद्धांतयोराशयं दर्शयति तत्र ति अयं भावः ईर्त्स अन्त इति स्थिते एकादेशद्वयं प्राप्नोति नुम्प्रतिषेधश्च तत्र प्रथमैकादेशोऽन्तरंगो ... बाधितात्प्रतिषेधः स्यात् न तत्साधनं तरंगः अंगांतर्गतानि नित्यत्वस्य प्रतिषेधे पितुल्यत्वात् तस्मा ...=
=परविप्रतिषेधात्परएकादेशः तदानुम्प्रतिषेधः प्राप्नोति तदंतरंगत्वात्प्रथमैकादेशेन बाध्यते नास्मिंस्तु व्यपवर्गाभावान्न भवतीति भाष्यकारस्तु कृते विप्रत्यये कादेशे नुम्प्रसंगप्रतिषेधात्तस्यापि सर्वनाम स्थानापेक्षत्वाद्बहिरंगत्वादंतरंगो हि तीकादेशे कृते व्यपवर्गाभावान्न भवतीति सदृशेति दर्शयति॥२=
सति

=वस्तुतोपसर्गविहितत्वस्यैवाव्ययदइतिसिद्धंततः इत्येवध्वनयन्नेकादेशस्यादिसत्वमुक्त्वाप्युपसंहारेनिमित्ताचांतरंगतादर्शितापयत्यादिसर्गिः॥१॥

अन्यस्याकृतइतिमितेः पूर्वेमकृत्वानुमिकृतेशद्वांतरत्वंनिमित्तत्वान्नितिअंतादेशोकृतेएकादेशेचव्यपवर्गोभावाद्भुत्सोऽप्रसंगः पूर्वेहीति। उत्सर्गाणांविषयांतरस्यापिसंभवा

=ननुनुम्प्रतिषेधेकृतेःकृतेचद्वयोरकारयोरेवपररूपमितिकथमनित्यत्वमताआह॥ नितइति॥ तथाकृतेनवयवस्याकारस्यपररूपनिमित्तत्वंकृतेतुयद्वागमादिनाव्येनव्यावयवस्येतिभावः॥१॥ एकादेशमितिः॥नकारअकारयोरितिसर्वः॥४॥

अन्यस्याकृतेशद्वांतरस्यचप्राप्नुवन्विधिरनित्योभवति अंतरंगत्वाद्ध्येकादेशः काअंतरंगताचर्णाश्रितत्वैकादेशः विधिविषयेतुप्रतिषेधः विधिश्चनुमः सर्वेनामस्था नेप्राकृतुसर्वेनामस्थानोत्पत्तेरेकादेशस्तत्रनित्यत्वाचांतरंगत्वाच्चैकादेशः एकादेशोकृतेव्यपवर्गाभावान्नुमप्रतिषेधोनभविष्यतियदप्युच्यतेजुसभावइति एकादेशोकृते व्यपवर्गाभावान्नभविष्यति एकादेशइत्युच्यते केनचाचैकादेशः अंतिना नांतिभावःप्राप्नोतिकिंकारणंजुसभावेनबाध्यते नाचजुसभावःप्राप्नोतिकिंकारणंशापा व्यवहितत्वात् एकादेशोकृतेनास्तिव्यवधानं [redacted] किंपुनःकारणंनिमित्तवानंतिरेकादेशंतावत्प्रतीक्षते नपुनस्तावदेव निमित्तमस्तीतितिभावेनभवितव्यं इहापितर्हितावदेवनिमित्तमस्तीतिभावःस्यात् अनेनिजुः पयेवेविष्टुः अस्तिअंतिभावेकृतेस्थानिवद्भावात् द्विग्रहणेनग्रहणाज्जुस भावोभविष्यति अथवायद्यपिनिमित्तवानंतिरयंतस्यजुसभावोपवादविषयेउत्सर्गोभिनिविशतेपूर्वंह्यपवादाअभिनिविशंतेपश्चादुत्सर्गाःप्रकल्प्यवापवादविषय मुत्सर्गःप्रवर्ततेतेनतावदत्रनकदाचिदप्यंतिभावोभवति अपवादंजुसभावंप्रतीक्षते नखल्वपिकश्चिदप्यत्तानांअभ्यानंतर्यसर्वेऽविकारेणोव्यवधानं तेनानेनावश्यंवि कारेणनाशःप्रतीक्ष्यःकश्चिल्लुकाकश्चित्श्लुनाकश्चिदेकादेशेनसयथैवश्लुलुकोप्रतीक्षतेतथैकादेशमपि एवंतर्हीदमिहव्यपदेशपंसत् आचार्योनव्यपदिशतिकिंस्था निवद्भावंस्थानिवद्भावात्मवधानं व्यवधानान्नभविष्यति पूर्वविधौस्थानिवद्भावः नचायंपूर्वस्यविधिःपूर्वस्मादपिविधिःपूर्वविधिः तदेतदसतिप्रयोजनेउभेग्रहणं सहार्थंविज्ञास्यते कथंचैकैकस्याप्यत्तसंज्ञाप्राप्नोति प्रत्येकंवाक्यपरिसमाप्तिर्दृष्टेतितद्यथाप्रत्येकंवृद्धिगुणसंज्ञेभवतः ननुचायमप्यस्तिदृष्टांतःसमुदायेवाक्यपरि

=उभेग्रहणमपितक॥ नतर्यमितिनिवृत्तुवृत्ययस्यतिकथंवेति॥१॥

त अपवादविवर्जितेविषयेप्रवर्तनप्राप्तत्वात्प्रकल्प्यवेतिपथानसंप्रसारणेसंप्रसारणमितिवचनात्परस्ययणःपूर्वसंप्रसारणंप्रवर्ततेपूर्वस्यतुतन्निमित्तप्रतिषेधःयदितुपरस्य यणःपूर्वेनप्रवर्ततेतदापूर्वस्यापिप्रतिषेधोनस्यात्॥ ॥ ॥ ॥

जक्षित्यादयः जक्षितिराद्दियैषांतेजक्षित्यादयइत्याश्रित्याह जक्षित्यादिष्विति वेव्यतइति अभ्यस्तानामादिरिसुदात्तत्वंभवति अन्यथाधातुस्वरेङित्वा
त्सार्वधातुकानुदात्तत्वस्वरितयोर्यणइतिस्वरितत्वंप्रसज्येत आङःशास्विति वेवीङो नंतरमयंकैश्चित्पठ्यते इतिभावः भूयिष्ठानीति बहुतराणीत्यर्थः षसिवशी

लेयणादेशेचकृतेउदात्त

=एतेनतदर्थकंउभेयकरणमपिनकर्त्तव्यमितिसूचितंन्यायसाम्यात्=

तद्यथा गर्गाः शतंदंड्यंतामिति अर्थिनश्चराजानोहिरण्येनभवंति नचप्रत्येकंदंडयंति सत्येतस्मिन्दृष्टांतेतत्रयदिप्रत्येकमित्युच्यते इहा
पिसहग्रहणंकर्त्तव्यं अथतत्रांतरेणप्रत्येकमितिवचनंप्रत्येकंगुणवृद्धिसंज्ञेभवतः इहापिनार्थःसहग्रहणेन जक्षित्यादयःषट् जक्षित्यादिषु
सप्तग्रहणंवेवीङर्थं जक्षित्यादिषुसप्तग्रहणंकर्त्तव्यं सप्तजक्षित्यादयोभ्यस्तसंज्ञकाभवंतिइतिवक्तव्यं किंप्रयोजनंवेवीङर्थं वेवीतेरभ्यस्त
संज्ञायथास्यात्वेव्यते अभ्यस्तानामादिरित्याद्युदात्तत्वंभवति अपरिगणनंवागणांतत्वात् नवार्थःपरिगणनेन अस्त्वागणांतमभ्यस्तसं
ज्ञा इहापितर्हिप्राप्नोति आङःशासु अस्त अभ्यस्तकार्याणिकस्मान्नभवंति भूयिष्ठानिपरस्मैपदेषु आत्मनेपदीचायं स्वरस्तर्हिप्राप्नोति य
च्चाप्यस्यात्मनेष्वभ्यस्तकार्यंस्वरः तत्राप्यस्यानुदात्तेतःपरंलसार्वधातुकमनुदात्तंभवतीति अनुदात्तत्वेकृतेनास्तिविशेषःधातुस्वरेणोदात्त
त्वेसत्यभ्यस्तस्वरेणवा षसिवशीछांदसौ दृष्टानुविधिश्छंदसिभवति चर्करीतमभ्यस्तमेव हुङ्स्तर्हिप्राप्नोति अस्त अभ्यस्तकार्याणिकस्मा

पदेर

॥ न्नभवंति भूयिष्ठानिपरस्मैपदेषु आत्मनेपदीचायंस्वरस्तर्हिप्राप्नोति॥ ॥

=एतेनजयादित्वेनाभ्युपगमेदीधीङादयःप्रयोगाःप्रसुक्ताः=

इति षसशास्तिस्वप्नेइतियेनपठंतिकेवलंषसस्वप्नेवप्राकांताविति तन्मतेनैतदुक्तं अन्येत्वाहुः शासशितपानिर्देशःकृतोर्थभेदाज्जद्धिःपठितः अन्येतुषसस्व रा०म०
प्नइतिनपठंति वशेर्भाषायांवार्त्तिककारमतेनप्रयोगंसाधुःचर्करीतमिति यङ्लुगंतस्यपूर्वाचार्यसंज्ञा॥ ॥श्री॥ ॥२॥ ॥ ११

=अयंमैत्रेयादिसंमतःपाठः।षसस्वसीत्यन्येषांपाठः=

अन्हि ङोरिति यदि नुङोऽभ्यस्तसंज्ञा स्यात् नुङ्घाते नुवत इत्यादौ नुतेऽभ्यस्तस्वरे लसार्वधातुकस्य भवितव्यमेव निघाते नेति प्रतिषेधोऽनर्थकः स्यात् तस्मात्प्रतिषेधसामर्थ्या
त्प्रत्ययस्वर एव भवति नाभ्यस्तस्वरः नन्वसति प्रयोजने ज्ञापकं भवति च प्रतिषेधस्य प्रयोजनं नुते नुवइत्यादावनुदात्तत्वं मा भूत् प्रत्ययस्वर एव यथा स्यात् अत्र ह्यभ्यस्तानामा

कर्तव्यं २

अन्हि ङोरिति प्रतिषेधविधानसामर्थ्यात्स्वरो न भविष्यति अथवा सप्तैवेमे धातवः पठ्यन्ते जक्ष अभ्यस्तसंज्ञो भवति इ साद्यश्चषट् जाक्षित्यादयः षडिति
तुजादीनां तुजादिषु छन्दसः प्रत्ययग्रहणं तुजादिषु छन्दसः प्रत्ययग्रहणं छन्दसि तुजादीनां दीर्घो भवतीति वक्तव्यं प्रत्ययग्रहणं च कर्तव्यं असिंश्चासिंश्च प्रत्यय
इति वक्तव्यं इह मा भूत् तुतोज शवलान् हरीन् अनारम्भो वाऽपरिगणितत्वात् अनारम्भो वा छन्दसि दीर्घत्वस्याप्यः कुतः अपरिगणितत्वात् नहि छन्दसि दीर्घस्य
परिगणनं कर्तुं शक्यं किं कारणं अन्येषां च दर्शनात् येषामपि दीर्घत्वं नारभ्यते तेषामपि छन्दसि दीर्घत्वं दृश्यते तद्यथा पूरुषो नारक इति अनेकान्तत्वाच्च ये
षां चाप्यारभ्यते तेषामप्यनेकान्तः यस्मिन्नेव च प्रत्यये दीर्घत्वं दृश्यते तस्मिन्नेव च न दृश्यते मामहान उक्थपात्रं ममहान इति॥ ॥ ॥

दिदिति न प्रवर्तते अजादौ तस्य विधानात् तत्रासति प्रतिषेधे अनुदात्ते चेत्याद्युदात्तं पदं स्यात् सति तु प्रतिषेधे नोदात्तं भवतीति ज्ञापकत्वं नोपपद्यते एवं तर्ह्यभ्यस्तानामादिरि
त्यत्रान्हि ङोरित्यनुवृत्त्या प्रतिषेधवचनसामर्थ्यादित्यर्थोऽभिप्रेतः अथवेति नायं श्तिपा निर्देशः किं तर्हि जक्षितिश्त्यकारमिसाद्यस्तत्र इति शब्दे न जक्षितिः परामृश्यते आदि
शब्दश्च समीपवाची तेन तत्समीपाः षडभ्यस्तसंज्ञा इति सप्तानामेवाभ्यस्तसंज्ञासूत्रेण संगृहीतेत्यर्थः॥ ॥ ॥

लिटि धातोः अभ्यासप्रतिषेधानर्थक्यमिति जुगुप्सिषते लोलूपिषत इत्यादौ सकृत्प्रसारलक्षणस्य चरितार्थत्वात्पुनः प्रवसभावादुत्तरार्थो ऽप्यभ्यासप्रतिषेधो
नकर्तव्यः चङी सेतदर्थं स्यात् कर्त्तव्योपदासन्यपङ्. नात्मिचिकृते चङ्. भवति अजुगुप्सदलोलूपदिति तत्रद्विचनं मा भूदिति चिंत्यमेतत् सम्प्रङ किमियं षष्ठीति वि

=ईहांचक्रइति आर्मनोनधातुरितिरितिभावः। १=विश्वविवेश्य इति सुवालिङ्‌इत्येविधंदस्युनयथेति सार्वधातुकत्वात्तुवः अभावः भुभ्व तत्रविकरणंतसमुदायोलिङ्‌परोन तुभ्व इति मतीयप्रपंचेकाचोद्वित्वमितिभावः। २=नत्वेनसणस्येतिन्यायासपातेस्यादभ्यासस्य=
=द्वित्वाभावेएव अनभ्यासस्येति किमर्थमिति: २

लिटि धातोः धातोरिति किमर्थं ईहांचक्रे नैतदस्ति लिटीत्युच्यते नचात्र लिटं पश्यामः प्रसयलक्षणेन नलुमतात स्मिन्निति प्रसयलक्ष
णाप्रतिषेधः इदं तर्हि ससवांसोविभृणविरे लिङ्‌द्विर्वचने जागर्त्तेतिव रूपं योजागार तमृचः कामयंते योजागार तमृचः कामयंते अनभ्या
=यदुनाद्वित्वलक्षणमभेरण=
=प्रात्मभ्यासद्वित्वधर्मेति:३=
सस्येति किं कस्मो नोनाव ह्रष भोयदीदं नोनूयते नोनाव अभ्यासप्रतिषेधानर्थक्यं च छंदसि वावचनात् अभ्यासप्रतिषेधोनर्थकः किंका
रणं छंदसि वावचनात् अवश्यं छंदसि वा द्वे भवत इति वक्तव्यं किं प्रयोजनं प्रयोजनमादित्सान्याचिषाम हे पियाचिषाम हइति प्राप्नदेवतानो
हातिप्रियाणि ददातिप्रियाणि मघवादातुमघवाददातु सनस्तनोवीरवद्धातु वीरवद्दधातु यावतेदानीं छंदसि वा द्वे भवत इत्युच्यते धा
तुग्रहणेनापिनार्थः कस्मान्न भवति ससवांसोविभृणविर इति छंदसि वावचनात् तदेतद्धातुग्रहणं सान्यासिकं तिष्ठतु तावत् सम्प्र
=तदेतदिति धातुग्रहणाभावे लिपीसादिम=
=थमेकाचइत्यविशेषणंस्यात्तयाच्यपा=
=वेसाद्यवदस्यान्नतुजजागारसादेतस=
=लिङ्‌परत्वाभावादितिभावः।३=
ङः किमियं षष्ठी आहोस्वित्सप्तमी कुतः संदेहः समानो निर्देशः किंचातः यदि षष्ठी सम्प्रङः तस्य द्विर्वचनेन भवितव्यं अथ स[redacted]
१ मीसम्प्रङेपरतः पूर्वस्य द्विर्वचनेन भवितव्यं ॥ ॥ ॥ ॥

=विभक्तिविचारस्यप्रकृतानुपयोगमाह नदर्थइति १=

भक्तिविचारद्वारेण तदर्थो विचार्यते किं चात इति अर्थभेदप्रश्नः सम्प्रङः तस्येति प्रसयग्रहणे यस्मात्स विहितस्तदादेस्तदंतस्येति षष्ठीपक्षेतदं तविधिः सप्त
मीपक्षे तु तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानाद्धातोरिसधिकाराच्च पूर्वस्य धातोः कार्यभाक्त्वं ॥ गप्त्री ॥ ॥

=द्विर्वचननिमित्तमिति॰ सन्यङोरित्यस्य षष्ठी तासन्यङं तस्याद्विलयादिमात्रेणानस्यानिमित्तं कार्यं = द्विर्वचने चीत्यनेन ॥ ४ = न लायोगादिति भावः ॥ २ = यद्यपीति॰ यदित्तुरूपस्यानिवत्वाभावेनश्यात्स्यादेवेटो द्विर्वचनमिति तस्य कार्यित्वेन निमित्तत्वं तस्यादिति भावः ॥ १ =

तस्यास्य कार्यमनुभवतो

कस्मात्त्रविशेष इति लक्ष्यगतविशेषप्रश्नः हंतेश्चेति गमहनेत्युपधालोपस्य स्थानिवद्भावाद्धन एव द्विर्वचनप्रसंगः यस्मा प्रीति सति तस्मिन्कार्यभावादस्येव निमित्तत्वमिति भावः यद्यपि रूपस्थानिवद्भावादीटो न भवति द्विर्वचनं तथापि प्राप्तिमात्राश्रयेणाद्विर्वचननिमित्तत्वमीकारस्योच्यते अनुदात्तविशेषणां चेदिति यदात्त्र्भयविशेषणं तदा न दोषः उपदेश एकाच्त्वात्त

=तत्राय भाविता मात्रेणनिमित्तत्वमिति भावः ॥ २ = यद्यपीति॰ एवं चेकारस्य द्वित्वनिमित्तत्वाभोवात्स्यानिवत्वं दुर्लभमिति भावः ॥ ३ =

=सनङनस्यस्य पङ ईडिनिषेधेदं॰ २ = भाविमात्रेति॰ यदिस्थानिवत्वं न स्यात्स्यादेवेटो द्विर्वचननिमित्तत्वमनिकमात्रिमात्राश्रयेण तथः ॥ ३

कस्मात्त्रविशेषः सन्यङोः परत इति चेत्तइटो द्विर्वचनं प्रादित्वात् सन्यङोः परत इति चेत् इटो द्विर्वचनं कर्तव्यं अटिटिषति अशिशिषति किं पुनः कारणं न सिध्यति प्रादित्वात् इट् परादिः हंतेश्चेटो द्विर्वचनं कर्तव्यं जेघ्नीयते ननु च यस्यापि सन्यङं॰ तस्य द्विर्वचनं तस्यापि स्थानिवद्भावप्रसंगः ईटि स्थानिवद्भावादीटो द्विर्वचनं न प्राप्नोति॰ नैष दोषः॥ द्विर्वचननिमित्ते स्थानिवदित्युच्यते न चासौ द्विर्वचननिमित्तं यस्मिन्नपि द्विर्वचनं यस्यापि द्विर्वचनं सर्वोऽसौ द्विर्वचननिमित्तं तस्मादीटो द्विर्वचनं तस्मादुभाभ्यामेव ईटो द्विर्वचनं कर्तव्यं यस्योभयोर्दोषो न तमेकस्योद्घोषो भवति एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्सनइट्प्रतिषेधः एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्सनइट्प्रतिषेधो वक्तव्यः बिभित्सति चिच्छित्सति द्विर्वचने कृते उपदेशेऽनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधो न प्राप्नोति अस्तु तर्हि सन्यङं॰ तस्य सन्यङं॰ तस्येति चेदभ्यासः सन्यनिटः सन्यङं॰ तस्येति चेदभ्यासः सन्यनिटो द्विर्वचनं वक्तव्यं इपक्ष्यमाणं भगुभिः सजोषाय स्यापि सन्यङोः परतो द्विर्वचनं तेनाप्यत्रावश्यप्रमिइ भावेयत्नः कर्तव्यः अप्रोर्हिं प्रतिपरमिद्विधीयते त्सिपूङ्रंज्वशांसनीति ॥ ॥

[redacted]

न्नं तस्यापि द्विःप्रयोगे द्विर्वचने दोष एवं स्थाने द्विर्वचने प्रकृतिप्रत्ययसंप्रमुग्धत्वादिटः प्राप्तिरेव नास्तीति दोषः इपक्ष्यमाण इति अभ्योतेः सनत्सिपूङ्रंज्वशांसनीति प्राप्त इट् छांदसत्वान्न भवति द्विर्वचनं हलादिः शेषः सन्यत इत्तीत्वं भ्यासस्य सवर्णां इतीयङ्॰ पलकलपलानिपूर्ववत्सन इत्यात्मनेपदं शानच् अचिक्षमाण इति नु षष्ठी पक्षे प्राप्नोति ॥ ॥

=षष्ठीपक्षे विद्यावस्येद्यारुः सन्यनं तस्यापीति॰ ३ =

तेनैवेति यथाछांदसत्वात् रिणन भवत्येवं द्वितीयद्विर्वचनमपि तदभावात्प्रथमद्विर्वचनं वर्णलोप इति यियक्षमाणा इति प्राप्ते यकारस्य लोपः उपेयप्राप्त्यर्थत्वादु पायानां धातूनां चानेकार्थत्वान्न नियम आदरणभावः दीर्घकुत्वेति यस्माद्द्विर्वचनादाधिक्यमुपजायते तस्माद्दीर्घत्वादीनि न सिध्यंति समुदायादेशत्वात्संप्रमु

तेनैव द्वितीयद्विर्वचनमपि न भविष्यति॰१

अथवा नैतद्दृशोरूपं यजेरेष छांदसो वर्णलोपः तद्यथा तुभ्येदमग्ने तुभ्यमिदमग्न इति प्राप्ते आम्वानां चरं नाम्वानां चरमिति प्राप्ते आव्याधिनी रुगणाः सुगणा इति प्राप्ते इष्कर्तारमध्वरस्य निष्कर्तारमध्वरस्येति प्राप्ते शिवा उद्रस्य भेषजी शिवा रुद्रस्य भेषजीति प्राप्ते अथ पर्थे वि गम्यते कः पुनरश्नोत्यर्थः अश्नोतिर्व्याप्तिकर्मा एवं तर्हि यजिरप्यश्नोत्यर्थे वर्त्तते कथं पुनरन्यो नामान्यस्यार्थे वर्त्तते बह्वर्था अपि धातवो भवंति तद्यथा वपिः प्रकिरणे दृष्टः छेदने चापि वर्त्तते केशान्वपति ईडिः स्तुतिचोदनायाच्ञासु दृष्टः ईरणे चापि वर्त्तते अग्निर्वा इतो वृष्टिमीट्टे मरुतोमुतश्च्यावयंति करोतिरयमभूतप्रादुर्भावे दृष्टः निर्मलीकरणे चापि वर्त्तते पृष्ठं कुरु पादौ कुरु उन्मृदानेति गम्यते निक्षेपणे चापि दृश्यते कटे कुरु घटे कुरु अश्मानमितः कुरु स्थापयेति गम्यते एवं तर्हि दीर्घकुत्वसंप्रसारणषत्वमधिकस्य द्विर्वचनात् दीर्घत्वं द्विर्वचनाधिकस्य न सिध्यति चिचीषति तुष्टूषति समुदायस्य समुदाय आदेशः तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य न ष्टः सन् भवति

१ नत्राजंतानां सनीति दीर्घत्वं न प्राप्नोति॥ ॥ ॥ ॥

ग्धत्वात् यदा तु सन्यङोः परतो द्विर्वचनं तदा प्रत्ययसंमोहाभावाद्दीर्घत्वादीनि सिध्यंति द्विर्वचने नष्टाद्वांतरेण आदेशो नाधिकत्वाद्दीर्घाद्यप्रसिद्धिः स्थाने द्विर्वचने चायं दोषो न तु द्विः प्रयोगे तत्र प्रकृतिप्रत्ययसंमोहाभावात् सर्वे सर्वपदादेशा इत्याश्रयेण संप्रमोहः प्रागेव दीर्घत्वं भविष्यति [redacted] ॥

भावः।

ततोद्विर्वचनमिति मत्वाह। इदमिहेति। नित्यं द्विर्वचनमिति = प्राकृतिपक्षे शब्दान्तरप्राप्त्यभावात् = अनित्यमिति व्यक्तिपक्ष इति। जुहूषतीति ह्वातुमिच्छतीति सन् अत्राकृते द्विर्वचने ऽ

इदमिह संप्रधार्यं दीर्घत्वं क्रियतां द्विर्वचनमिति किमत्र कर्तव्यं परत्वाद्दीर्घत्वं नित्यं द्विर्वचनं कृतेपि दीर्घत्वे प्राप्नोति अकृतेपि प्राप्नोति दीर्घत्वमपि नित्यं कृतेपि द्विर्वचने प्राप्नोत्यकृतेपि प्राप्नोति अनित्यं दीर्घत्वं न हि कृते द्विर्वचने प्राप्नोति किं कारणं समुदायस्य समुदायआदेशः तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्याजन्तता नास्तीति दीर्घत्वं न प्राप्नोति द्विर्वचनमप्यनित्यं अन्यस्य कृते दीर्घत्वे प्राप्नोत्यन्यस्याकृते शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति उभयोरनित्ययोः परत्वाद्दीर्घत्वं यत्र हि नाकृते द्विर्वचने दीर्घत्वं तन्न सिध्यति जुहूषति कुत्वं द्विर्वचनाधिकस्य न सिध्यति जिघांसति जंघन्यते किं कारणं समुदायस्य समुदायआदेशस्तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य न हो हन्तेरिति भवति तत्राभ्यासाङ्गे हेर्हकारस्येति कुत्वं न प्राप्नोति संप्रसारणं च द्विर्वचनाधिकस्य न सिध्यति जुहूषति जोहूयते समुदायस्य समुदायआदेशस्तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य न ह्वो हूयतिर्भवति तत्र ह्वः अभ्यस्तस्येति संप्रसारणं न प्राप्नोति नैष दोषः वक्ष्यति ह्येतत् ह्वः अभ्यस्तनिमित्तस्येति यावता चेदानीं ह्वः अभ्यस्तनिमित्तस्योच्यते सोऽप्यदोषो भवति यदुक्तं यत्र हि नाकृते द्विर्वचने दीर्घत्वं तन्न सिध्यतीति षत्वं च द्विर्वचनाधिकस्य न सिध्यति पिपक्षति पिपक्षति समुदायस्य समुदायआदेशस्तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य न षः सन् भवति तत्रेण्कुभ्यामुत्तरस्य प्रत्ययसकारस्येति षत्वं न प्राप्नोति इदमिह संप्रधार्यं द्विर्वचनं क्रियतां षत्वमिति किमत्र कर्तव्यं परत्वात्षत्वं॥ ॥ ॥

भ्यस्तत्वाभावात्संप्रसारणाभावाद्दीर्घाप्रसंगः इति पूर्वं द्विर्वचनं ततः संप्रसारणं ततो हलः इति दीर्घो [illegible] सत्वात् अभ्यनगमां सनीति दीर्घत्वं॥ ॥ श्री ॥श्री

= ननु द्विते संप्रसारणे हलः इति दीर्घ ते न सिद्ध्यति आङ्परत्वादिति । वस्तुतो हलः इति दीर्घत्वमपि न प्रकृतिप्रत्ययसंमोहात् संप्रसारणं गमां गमत्वाभावात् संप्रसारणं तु सामर्थ्यात् भविष्यतीति बोध्यं । १ =

क्षीरोदके इति व्यक्तिविशेषविवक्षायां जातिपरत्वाभावादेकवद्भावो न कृतः सप्तम्येकवचनं वा प्रत्ययसकारसहितस्य प्रथमस्यैकाचो द्विर्वचनादामिश्रत्वं सन्दीति

पूर्वत्रासिद्धे षत्वं सिद्धासिद्धयोश्च नास्ति संप्रधारणा आरभ्यो ह्यारभ्यस्त विधिप्रतिषेधः आरभ्यो ह्यारभ्यस्ताश्रयो विधिः प्राप्नोति स प्रतिषेध्यः ई
प्सतिईर्त्सति [redacted] ईप्सन् ईर्त्सन् सेप्सन् ऐर्त्सन् किंचस्मात् अद्भावो नुम्प्रतिषेधो जुस्भाव इत्येते विधयः प्रसज्येरन् नैष दोषः उक्तमत्र प =उक्तमत्र सप्तमः २=
रिहारः सकृदाश्रये च समुदायस्य समुदायादेशत्वात् सत्त्वाश्रये चाव्यपदेशः आमिश्रत्वात् सकृदाश्रये च कार्ये समुदायस्य समुदायादेशत्वा
त् सत्त्वाश्रये चाव्यपदेशः किं कारणं आमिश्रत्वात् आमिश्रीभूतमिवेदं भवति तद्यथा क्षीरोदके संपृक्ते आमिश्रत्वान्न ज्ञायते कियत्क्षीरं
कियदुदकमिति कस्मिन्वाऽवकाशे क्षीरं कस्मिन्नवकाश उदकमिति एवमिहाप्या [redacted] मिश्रत्वान्न ज्ञायते का प्रकृतिः कः प्रत्ययः क
स्मिन्नवकाशे प्रकृतिः कस्मिन्नवकाशे प्रत्यय इति तत्र को दोषः सङ्लीति कुत्वादीनि न सिध्यन्ति इदमिह संप्रधार्यं द्विर्वचनं क्रियतां कुत्वादीनीति
किमत्र कर्तव्यं परत्वात्कुत्वादीनि पूर्वत्रासिद्धे कुत्वादीनि सिद्धासिद्धयोश्च नास्ति संप्रधारणा एवं तर्हि पूर्वत्रासिद्धीयमद्विर्वचन इति वक्ष्यति तच्चावश्यं वक्तव्यं
=अत्र घत्वादिकुत्वं कुपकालि= विभाषिताः प्रयोजयन्ति द्रोग्धा द्रोग्धा द्रोढा द्रोढा यावता चेदानीं पूर्वत्रासिद्धीयमद्विर्वचन इ [redacted] सुच्यते सोऽप्यदोषो भवति यदुक्तं षत्वं न सिध्यतीति
=सर्वीप्सयो निर्दिष्ठं समनीरसि= इहस्थाने द्विर्वचने णिलोपः परिहृतः सन्यङोः परतो द्विर्वचने इटो द्विर्वचनं वक्तव्यं सन्यङ् तस्य द्विर्वचने हंतेः कुत्वमपरिहृतं तत्र सन्यङ् तस्य द्विर्वचने घ्निः प्रयो
=द्विः अन्यथा द्रोग्धा द्रोढा स्यान्नि= गश्चैवेषपक्षो निर्दोषः तत्रेदमपरिहृतं सनइट्प्रतिषेध इति एतस्यापि सप्तमे परिहारं वक्ष्यति उभयविशेषणत्वात्सिद्धमिति कथं जेघ्नीयते व्वस्पत्तोतत्र
=इत्यसंगइतिभावः १३८

सनः सकारादारभ्य प्रमह्हि ओऊकारेण प्रत्याहारः विभाषिता इति विषय इत्यर्थः ॥ ॥श्री॥ ॥छ॥ ॥ "यङ्प्रकरणे हन्तेर्हिंसायां घ्नीति ॥० ॥

दाश्वान् न प्रहृमर्षणा इति चौरादिकस्याध पाक्षे तिविभाषितता चुःक्ष सो साह्वानिति रूपं चक्रमिति घञर्थे क विधानमिति कः यपुरिति योऽह्वे चेत्स त्वह्वे चेतिन वक्तव्यं भवतीति मा

=भ्यादिस्त्वात्मनेभदी· दिवादिरपितस्पर्धः।१८

दाश्वांसो दाशुषः सुतं· साह्वानिति किं निपात्यते·१

दाश्वान्साह्वान् दाश्वानिति किं निपात्यते [redacted] दाशेर्वसौ द्विले ट्प्रतिषेधौ दाशेर्वसौ द्विलेट्प्रतिषेधौ निपात्येते सहेर्दीर्घत्वं च किं च द्विलेट्प्रतिषेधौ च साह्वान्वलाहः मीढ्वानिति किं निपात्यते मिहेर्ढत्वं च यच्चएवं योः द्विलेट्प्रतिषेधौ दीर्घत्वं च मीढुस्तोकाय तनयाय मृड उपयथेयमिन्द्र मीढुः मद्यर्थो वे गम्यते कः पुनर्मद्यर्थः महिरोन कर्मा अतः किं इत्वमपि निपात्यं मद्यर्थ इति चेत् मिहे स्तदर्थत्वात्सिद्धं मद्यर्थ इति चेत् मिहिरपि मद्यर्थे वर्त्तते कथं पुनरन्यो नामा न्यस्यार्थे वर्त्तते कथं मिहिर्मद्यर्थे वर्त्तते बहूर्थाऽपि धातवो भवन्तीति अस्ति पुनरन्यत्रापि क्वचित् मिहिर्मद्यर्थे वर्त्तते अस्तीत्याह मिहेर्मेघः मेघस्तु कस्मा

त्रि५ द्वुपस्थोदकहातीति द्विर्वचनप्रकरणे कृञादीनां के द्विर्वचनप्रकरणे कृञादीनां क उपसंख्यानं कर्तव्यं चक्रं चिक्लिदं चक्रसमिति कादिष्विति वक्तव्यं इहापि ये

थासात् बभ्रुः यपुः इति चरिचलिपतिवदीनामच्याकाभ्यासस्य चरिचलिपतिवदीनाम चि द्वे भवत इति वक्तव्यं अङ्काभ्यासस्य घनाघनः पाटयतेर्णिलुक्च दी

र्घश्चाभ्यासस्योक्त पाटयतेर्णिलुग्वक्तव्यः अचि द्वे भवत इति वक्तव्यं दीर्घश्चाभ्यासस्य उक्त पाग्मः पाट् पटः द्विर्वचनं यणयवायावादेशाल्लोपोपधालोपणिलो

पकिकिनोहत्वेभ्यः [redacted] यण अयवायावादेश अल्लोपोपधा[redacted]लोपणिलोपकिकिनोहत्वेभ्यो द्विर्वचनं

भवति विप्रतिषेधेन द्विर्वचनस्यावकाशः पिबिमेदतुः पिभिदुः यणादेशस्यावकाशः दध्यत्र मध्वत्र इहोभयं प्राप्नोति॥ ॥ ॥

४चराचरः। चलाचलः। पतापतः। वदावदः। हं तेर्घ

वः चराचर इति अभ्यासस्यानचीति वचनाद्धलादिशेषाभावः॥ ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

=अचलोपोभ्यासस्यसत्रनाथ्येइदंपठितं·१८

भा०कै०६ सोषुप्यत इति स्वपि स्यमि व्येञां यङीति संप्रसारणं जल्प इति भावेल्लकारः अशितीति पर्युदासपक्षे विप्रतिषेधः प्रसज्यप्रतिषेधेत्वनैमित्तिकत्वादाल्वमंतरंगं एवं सत्व[redacted]
१५

चक्रतुः चक्रुरिति अयवायावादेशानामवकाशः चयनं चायकः लवनं लावकः द्विर्वचनस्यास एव इहोभयं प्राप्नोति चिचाय चिचयिथ लुलाव लु
लविथ आल्लोपस्यावकाशः गोदः द्विर्वचनस्यास एव इहोभयं प्राप्नोति ययतुः ययुः तस्थतुः तस्थुः उपधालोपस्यावकाशः घ्नन्ति घ्नं मधुपिन्न घ्नं घ्नंत
द्विर्वचनस्यास एव इहोभयं प्राप्नोति जग्मतुः जग्मुः जघ्नतुः जघ्नुः णिलोपस्यावकाशः कारणा हारणा द्विर्वचनस्यास एव इहोभयं प्राप्नोति आटिटत् उ
लस्यावकाशः निपूर्त्तः पिंडः द्विर्वचनस्यास एव इहोभयं प्राप्नोति मित्रावरुणौ ततुरिः दूरे ह्य ध्वा जगुरिति द्विर्वचनं भवति पूर्वविप्रतिषेधेन सत र्हि
पूर्वविप्रतिषेधो वक्तव्यो न वक्तव्यः इष्टवाची परशब्दः विप्रतिषेधे परं यदिष्टं तद्भवतीति द्विर्वचनात्संप्रसारणत्वधात्वादिविकारी त्वेत्वोत्वगुणवृद्धिविधयः द्वि
र्वचनात्संप्रसारणात्वधात्वादिविकारी ते त्वोत्वगुणवृद्धिविधयो भवंति विप्रतिषेधेन द्विर्वचनस्यावकाशः विभिदतुः बिभिदुः संप्रसारणस्यावकाशः इष्टं सु
प्तं इहोभयं प्राप्नोति ईजतुरीजुरिति नैतदस्ति [redacted] अस्त्वत्र द्विर्वचनं द्विर्वचने कृते परस्य रूपस्य किं तीति भविष्यति पूर्वस्य लिट्यभ्यासस्योभयेषामिति इदं
तर्हि सोषुप्यते इदं चाप्युदाहरणं ईजतुरीजुः ननु चोक्तमस्त्वत्र द्विर्वचनं द्विर्वचने कृते परस्य रूपस्य किंतीति भविष्यति पूर्वस्य लिट्यभ्यासस्योभयेषामिति
न सिध्यति न संप्रसारणे संप्रसारणमिति प्रतिषेधः प्राप्नोति अकारेणाव्यवहितत्वान्न भविष्यति एकादेशे कृते नास्ति व्यवधानं एकादेशः पूर्वविधौ स्थानिव
द्भवतीति स्थानिवद्भावाद्व्यवधानमेव एवं तर्हि समानांगग्रहणं तत्र चोदयिष्यति आल्लस्यावकाशो ग्लाता म्लाता द्विर्वचनस्यास एव इहोभयं प्राप्नोति॥ जग्लैम ॥०॥ रामः
नैत्वेऽपि॥ श्री ॥ॐ॥ ॥ॐ॥ (१ ग्लेधात्वादिविकाराणामवकाशः नमति सिंचति द्विर्वचनस्यास एव इहोभयं प्राप्नोति ननाम सिषे १५

=तयोरंतरंगत्वमनैमित्तिकत्वादिति विप्रतिषेधायोगः इत्यर्थः। १= नसंप्रसारणे संप्रसारणमित्यत्र तत्त्वार्थमिनिर्दिष्टंगादिकल्पपरिभाषा प्रमितिस्तत्रेति वक्ष्यते। २=

चेक्रीयत इति यङि ऋीङ् न इति ऋीङादेशः उवोर्णोति ऊर्मं न इति प्रतिषेधादिजादेरिति साम्न भवति नैकमुदाहरणमिति ऊन्मयाभ्यासस्यान्नैरिति ब्रूयात् ऊर्णोणोत्यादौ तु छांदसत्वा
द्घाम्नुदृश्यते तत इयङादिप्रकरणोत्तन्त्वादीनां छंदसि बहुलमित्युवङ् भविष्यतिय थासुव[illegible]ल्लौकिक इति भावः एवमपीति यदि पूर्वं द्विर्वचनं क्रियते पश्चाद्गुणवृद्धी इत्यर्थः ॥ ॥

ईत्वस्यावकाशः मात्रीयते पित्रीयति द्विर्वचनस्यावकाशः स एव इहोभयं प्राप्नोति चेक्रीयते जेह्रीयते ईत्वस्यावकाशः पीयते गीयते द्विर्वचनस्य स एव इहोभयं प्राप्नोति पेपीयते जेगीयते इत्लोलयोरवकाशः आस्तीर्णं निपूर्त्तः द्विर्वचनस्य स एव इहोभयं प्राप्नोति आतेस्तीर्यते निपोपूर्यते गुणवृद्ध्योरवकाशः चेता गौः द्विर्वचनस्य स एव इहोभयं प्राप्नोति चिचाय चिचयिथ लुलाव लुलविथ नैतदस्ति प्रयोजनं अस्त्वत्र द्विर्वचनं द्विर्वचने कृते परत्वात् गुणवृद्धी भविष्यतः इदं तर्हि प्रयोजनं इयाय इययिथ ननु चाप्यत्रास्ति द्विर्वचनं द्विर्वचने कृते परत्वात् गुणवृद्धी भविष्यतः न सिध्यति अंतरंगत्वात् सवर्णदीर्घत्वं प्राप्नोति वर्णादांगं बलीय इति गुणवृद्धी भविष्यतः किं वक्तव्यमेतत् न हि कथमनुच्यमानं गंस्यते आचार्यप्रवृत्तिर्ज्ञापयति वर्णादांगं बलीयो भवतीति यदयमभ्यासस्य सवर्णाग्रहणं करोति कथं कृत्वा ज्ञापकं न इयंतरेण गुणवृद्धी असवर्णे परतः अभ्यासो भवति नैतदस्ति ज्ञापकं असवर्णार्थमेतत्स्यात् इयतः इयथः ऊर्णोण उवोणिथ यत्तर्हि दीर्घ ऋणः क्ङितीति दीर्घत्वं शास्ति एतस्याप्येतिवचने प्रयोजनं सवर्णदीर्घबाधनार्थमेतत्स्यात् सपथैव तर्हि सवर्णदीर्घत्वं बाधते एवं यणादेशमपि बाधेत एवं तर्हि यणादेशे योगविभागः करिष्यते इदमस्ति इणो यण् भवति ततः एरनेकाचः एष्वानेकाचः इणो यण् भवति ततोऽसंयोगपूर्वस्य एरनेकाच इत्येव असवर्णाग्रहणमेव तर्हि ज्ञापकं ननु चोक्तमसवर्णार्थमेतत्स्यात् नैकमुदाहरणं असवर्णग्रहणं प्रयोजयति एवमपि इष्टानि वङ्भावादि यङ् न प्राप्नोति अथ सति पिविप्रतिषेधे यावता इष्टानि वङ्भावः कथमिवैतत्सिध्यति कस्मादेवात्र न [illegible] भवति यो नादिष्टाच्चः पूर्वः तस्य विधिं प्रति स्थानिवद्भावः आदिष्टाच्चपोऽचः पूर्व इति षष्ठा॰ प्रथमे पादे प्रथमाह्निकं ॥ ॥ ॥

=इयायेत्यादौ परविप्रतिषेधाद्दीर्घत्वे आदिष्टादचः एकारात्सर्वस्मैकारस्य=

इत्युपाध्यायजयटपुत्रकैयटकृते महाभाष्यप्रदीपे षष्ठस्याध्यायस्य प्रथमे पादे प्रथमाह्निकम् ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

योनतुना दिष्टाद्धेः प्रागिकारात्पूर्वं स्येति भावः ।१=

=अंतरंगत्वात्सवर्णदीर्घत्वेनैवे=
=पूर्व्व-ज्ञापितेत्पूर्वरूपं सिद्धं एव=
=इस्यातत्स्यार्थवे-४

सवर्णदत्स्य ५

=सवर्णदीर्घबाधनार्थे यणो वा=
=पितत्वादिति भावः ।६=

=स्थानिवद्भाव इति भावः ।७

=पुत्रशब्दांतेन कुलशब्देन समासे संप्रसारण [redacted] स्यष्टत्वादाह पुत्रस्येति। यद्यपीति। अत्रकारुत्तरौ दिति भावः। १ = वर्णग्रहणेऽइति। यस्मिन्विधिस्तदादावल्ग्रहणस्येति भावः। २ = अवयवावयविवाचकपदसन्निधाने अवयवावयवि [redacted] संबंधबोधकविभक्त्यभावेपि तयोस्तेन पत्नीत्यादि निबोधना

भा०कौ०६ ष्यङः संप्रसारणं कारीषगंध्यापुत्रकुलमिति पुत्रस्य कुलं पुत्रकुलं कारीषगंध्यायाः पुत्रकुलं कारीषगंध्यापुत्रकुलं यद्यप्यत्र तदादिविधिर्नास्ति तथापि पुत्रपतिशब्दांतं त
१६ दन्ताश्रयसंप्रसारणप्रसंगश्चोद्यते। यदा तु कारीषगंधी पुत्रस्य कुलमिति विग्रहस्तदा कारीषगंधीपुत्रकुलमिति भवत्येव। वर्णग्रहणादिति। वर्णग्रहणे तदादिविधिविज्ञानादिह
वर्णग्रहणात्सिद्धमित्यर्थः। नच तदादिविध्यभावेपि तदादौ पुत्रपत्यन्तं तदाश्रयसंप्रसारणप्रसंगो यस्मात्तत्पुरुषइत्यनेनाधारः ष्यङः। तस्य पुत्रपत्योस्तत्पुरुषः उपात्तः त
त्पुरुषावयवत्वं पुत्रपत्योः ख्यापयति। यथा वृक्षे शाखेति वृक्षशाखायाः प्रत्यासत्त्यावयवी प्रतीयते यथा च वृक्षात्पर्णं पततीत्यपादानत्वेनाप्युपात्तो वृक्षः पर्णस्यावयवि

ष्यङः संप्रसारणं ष्यङः संप्रसारणे पुत्रपत्योस्तदादावपि प्रसंगः ष्यङः संप्रसारणे पुत्रपत्योस्तदादावपि प्रसंगो भवति पुत्रपत्यादौ संप्रसारणं प्रा
प्नोति। कारीषगंध्यापुत्रकुलं कारीषगंध्यापतिकुलं वर्णग्रहणात्सिद्धं। वर्णग्रहणे एतद्भवति यस्मिन्विधिस्तदादाविति। न चेदं वर्णग्रहणं वर्णग्र
हणमिति चेत्तदंतप्रतिषेधः वर्णग्रहणमिति चेत्तदंतस्य प्रतिषेधो वक्तव्यः। पुत्रपत्यंते संप्रसारणं प्राप्नोति। कारीषगंध्यापरमपुत्रः कारीषगंध्यापरम
पतिः कौमुदगंध्यापरमपुत्रः कौमुदगंध्यापरमपतिः। किं कारणं। यत्र हि तदादिविधिर्नास्ति तदंतविधिना तत्र भवितव्यं॥ ॥ ॥

त्वेन प्रत्यासत्त्या गम्यते। यत्तु कारकसूत्रे भाष्य उक्तं न ज्ञायते कं कस्य वा कुररस्येति। तच्छब्दव्यापाराभिप्रायेण। इह च पुत्रपत्यादौ तत्पुरुषे यौ पुत्रपती तौ ष्यङः तावयव
स्य तत्पुरुषस्यावयवौ न भवत इति संप्रसारणाभावः। तदंतप्रतिषेध इति। तदंतविध्यपवादस्तदादिविधिरिति तदभावे तदंतविधिना भाव्यं। तत्पुरुषेण संनिधापितमुत्तरपदं ए०म०
पुत्रपतिभ्यां विशेष्यत इत्यस्ति तदंतविधिप्रसंगः॥ ॥ ॥श्री॥ ॥श्री ॥श्री॥ ॥७॥ १६

=कारीषगंध्यापुत्रकुलमिति तत्पुरुषस्यावयवौ न भवतोऽवयवावयविसमुदायावयवत्वाभावादिति भावः। अथवा स्वावयवीभूतपुत्रपतिपरः ष्यङं तावयवकतत्पुरुषस्यांतरंगत्वात् मामकाक्षिकस्यैव ग्रहणेनायं ३८

सिद्धं त्विति। तत्पुरुषे नियतसंनिधाने पूर्वपदोत्तरपदे विशेषणविशेष्यभावे च कामचाराद् उत्तरपदेन पुत्रपती विशेष्येते तत्रोत्तरपदान्तयोः पुत्रपत्योरसंभवाद् उत्तरपदे एव पुत्र

अतिकारीषगन्ध्यपुत्रः ॥ ४ ॥ x यातेपरमकारीषगन्धीपुत्रः परमकारीषगन्धीपतिरिति न सिध्यति प्रत्ययग्रहणे यस्मात्स तदादेस्तदन्तस्य ग्रहणं न च सत्स्त्री प्र

सिद्धं तूत्तरपदवचनात्। सिद्धमेतत्। कथम्। उत्तरपदवचनात्। पुत्रपत्योः पुत्र उत्तरपदयोरिति वक्तव्यम्। तत्र हि वक्तव्यं न वक्तव्यम्। पूर्वपदमुत्तरपदमिति संबन्धिशब्दावेतौ। सति पूर्वपदे उत्तरपदं भवति। सति चोत्तरपदे पूर्वपदमिति। न चात्र पुत्रपती उत्तरपदे। इहापि तर्हि न प्राप्नोति कारीषगन्धीपुत्रः कारीषगन्धीपतिरिति। किं कारणम्। पूर्वपदमित्युच्यते। न ह्यत्र षष्ठ्यन्तं पूर्वपदमस्ति। ष्यङः तमेतत्पूर्वपदं कथम्। प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति। यदि प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीत्युच्यते। अतिक्रान्तः कारीषगन्ध्यामतिकारीषगन्ध्यः। तस्य पुत्रः अतिकारीषगन्ध्यपतिरित्यत्रापि प्राप्नोति। स्त्रीप्रत्ययेनानुपसर्जनेन। योऽनुपसर्जनं स्त्रीप्रत्ययो भवत्येषा तत्र परिभाषा प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति। ष्यङः तेयावन्तो यणस्तेषां सर्वेषां संप्रसारणं प्राप्नोति। वाराहीपुत्रः तार्णकर्णीपुत्रः। तत्राप्रत्ययस्थस्य प्रतिषेधो वक्तव्यः। यथा गृहीतस्यादेशवचनादप्रत्ययस्थे सिद्धम्। निर्दिश्यमानस्यादेशा भवन्तीत्येवमप्रत्ययस्थस्य न भविष्यति। अनन्त्यविकारेऽन्त्यसदेशस्य वा। अथवा अनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवतीत्येषा परिभाषा कर्तव्या। किं पुनरत्र विशेषः। एषा वा परिभाषा क्रियेत। अप्रत्ययस्थस्य वा प्रतिषेध उच्येत। अवश्यमेषा परिभाषा कर्तव्या। बहून्येतस्याः परिभाषायाः प्रयोजनानि। कानि। प्रयोजनं नसंप्रसारणे संप्रसारणम्। न संप्रसारणे संप्रसारणमित्येतन्न वक्तव्यं भवति। कथं व्यवेविद्ध इति। अनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवतीति न दोषो भवति नैतदस्ति प्रयोजनम्। क्रियते न्यास एव। सान्तमहतो दीर्घत्वे प्रयोजनम्। पयांसि यशांसि ॥ ॥ ॥

पती गृह्येते। पुत्रपतिभ्यां तूत्तरपदं न विशेष्यत इति तदन्तविध्यभावः ष्यङन्तमिति। प्रत्ययग्रहणपरिभाषया तदन्तस्य कार्यित्वात् ॥ ॥ श्री ॥ ७ ॥ ॥

हंसशिंरासीति। अनुस्वारस्यापि दुलादक्का एकारस्य दीर्घप्रसंगः हंतेरिति। वृत्रवरिहनीतिलक्षणसंज्ञावादंतिगच्छतीत्यर्थः॥ ॥ श्री ॥ श्री॥

इत्यस्यापिप्राप्नोति॥ अनंतरविकारेः स्यस्त्देशस्यकार्यंभवतीतिनदोषोभवति। एतदपिनास्तिप्रयोजनं। नोपधायाइतितत्र वर्त्तते। एवमप्यनां
सि मनांसी स्यत्रापिप्राप्नोति। सांतसंयोगेन उपधांविशेषयिष्यामः॥ सांतसंयोगस्य नोपधाया इति। एवमपि हंसशिरांसि ध्वंसशिरांसि अत्रापिप्रा
प्नोति। हम्मतेर्हंसः कः पुनराह। हम्मतेर्हंसः इति। किंतर्हि हंतेर्हंसः हंसध्यानमिति। एवंतर्हि सर्वनामस्थान इति वर्त्तते। सर्वनामस्थानपर
तया सांतसंयोगं विशेषयिष्यामः। सांतसंयोगे नोपधां। सर्वनामस्थानपरस्य सांतसंयोगस्य नोपधाया इति। अन्कारांतस्याप्येषप्रयोज
नं। तक्षणानक्षाइति। तइत्यत्रापिप्राप्नोति। अनंतरविकारेः स्यस्त्देशस्यकार्यंभवतीतिनदोषोभवति। एतदपिनास्तिप्रयोजनं। अनाकारं विशे
षयिष्यामः। अनोयोकार इति। एवमपि अनसा अनसे इत्यत्रापिप्राप्नोति। अनकारेणांगं विशेषयिष्यामः। अना अकारं। अन्कारांतस्यांगस्या
नोयोकार इति। एवमप्यनस्तक्षाणानस्तक्षणे इत्यत्रापिप्राप्नोति। एवंतर्हि कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यं। भसेति
तत्रोपस्थितं भवति। यच्चिभमिति। तत्र यजादिपरतयान्कारं विशेषयिष्यामः अना अकारं। यजादिपरस्य नोयोकार इति। मृजेर्वृद्धिवि
धौ प्रयोजनं। न्यमार्ट्। अत्रापि वृद्धिःप्राप्नोति। अनंतरविकारेः स्यस्त्देशस्येतिनदोषोभवति। एतदपिनास्तिप्रयोजनं॥ श्री ॥

यथापरिभाषितमिति। परिभाषितानतिक्रमेणेत्यर्थः। अविभरिति। डुभृञ्‌ लङ्‌। तिप्‌ शपो श्लुः। श्लौ इति द्विर्वचनं। भञामित्तीत्वं। सेतेति। धात्वंतस्य सदेशस्यैव सत्वन

यथापरिभाषितमिकोगुणवृद्धी इति इक एव वृद्धिर्भविष्यति। एवं पिमिमार्जिषतीत्यत्र प्राप्नोति। अस्तु अभ्यासनिर्हृसेन ह्रस्वो भविष्यति। वसोः संप्र
सारणे। वसोः संप्रसारणे च प्रयोजनं। विदुषः पश्य। विद्वकारस्यापि प्राप्नोति। अनंत्यविकारे त्यसदेशस्येति न दोषो भवति। एतदपि नास्ति प्रयोज
नं। निर्दिश्यमानस्यादेशा भवंतीति न भविष्यति युवादीनां च संप्रसारणे प्रयोजनं। यूनः पश्य। यूना। यूने। यकारस्यापि प्राप्नोति। अनंत्यविकारे त्यस
देशस्येति न दोषो भवति। एतदपि नास्ति प्रयोजनं। न संप्रसारणे संप्रसारणमिति न भविष्यति। उकारेण व्यवहितत्वान्न प्राप्नोति। एकादेशे कृते नास्ति
व्यवधानं। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावात्‌ व्यवधानमेव। एवं तर्हि समानांगग्रहणं तत्र चोदयिष्यति। वोरुपधाग्रहणं न कर्त्तव्यं
भवति वोरुपधाया दीर्घ इक इति। इह कस्मान्न भवति अबिभर्भवान्‌। अनंत्यविकारे त्यसदेशस्येति न दोषो भवति। एतदपि नास्ति प्रयोजनं क्रियते न्या
स एव। आदिः सदादिविधिसंयोगादिलोपकुत्वभष्भावषत्वणत्वेष्विति प्रसंगः। आदिविधौ वत्तिप्रसंगो भवति। धात्वादेः षः सः णो नः। इहैव स्यात्‌।
नेता। सोता। इह न स्यात्‌। नमति सिंचतीति। आदि। सदादिविधिः। इहैव स्यात्‌ सः। स्यदस्य इत्यत्र न स्यात्‌। सदादिविधिः॥ ॥ ॥

नसंप्रसारणेसंप्रसारणमितित्रसमानांगग्रहणस्यचोदयिष्यमाणत्वात्तत्सामर्थ्यान्निर्दिष्टंवाविकल्पविभागोपदिष्टेतितत्र ४

त्वप्रसंगः स्यद् इत्यत्रेति। तदोः सः सावनंत्ययोरिति सत्वं तकारस्यांत्यसदेशत्वाभावान्न प्राप्नोति॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

भा॰ कै॰ ६
१८

मङ्क्ष्वमिति। पंचानां त्वसदेशत्वाभावात्संयोगादिलोपप्रसंगः। माषवापाणामिति विभक्तिस्थस्य नकारस्य पदांतस्य सदेशत्वाभावात् णत्वाप्रसंगः। उदात्तनिर्देशादिति। य

=पदांतेति। परस्येत्यधिकारासत्वावयवयोः संयोगाद्योः स्कोरिति प्रवृत्तिरित्यर्थ इति भावः। एवं णत्वं तात्पदाधिकारप्रयुक्तमेव बोध्यम्॥=

मंक्ष्व॰

× ह्रस्वं हेवस्यात्। ले॰ जा॰ लेढ्व्यमित्यत्र नस्यात्। ढत्व॰ भष्भाव॰ इहैवस्यात्। अधुक्षि॰ अधुक्षातामित्यत्र नस्यात्। भष्भाव॰ ×

संयोगादिलोप इहैव स्यात्। मंक्ष्वमित्यत्र न स्यात्। संयोगादिलोपः। कुत्वं इहैव स्यात्। पङ्क्ष्व पङ्क्ष्वमित्यत्र न स्यात्। कुत्वं इहैव स्यात्। द्र
ष्टा। द्रष्टव्यमित्यत्र न स्यात्। णत्वं। इहैव स्यात्। माषवापेण। माषवापाणामित्यत्र न स्यात्। एते दोषाः समा भूयांसो वा। तस्मान्नार्थोऽनया
परिभाषया। न हि दोषाः सन्तीति परिभाषा न वक्तव्या लक्षणं वा न प्रणेयं। न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते। न च मृगाः सन्ती
ति यवा नोप्यन्ते। दोषाः खल्वपि साकल्येन परिगणिताः। प्रयोजनानामुदाहरणमात्रं। कुत एतत्। न हि दोषाणां लक्षणमस्ति। तस्मा
द्यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा परिभाषा कर्त्तव्या। प्रतिविधेयं दोषेषु। इदं प्रतिविधीयते। उदात्तनिर्देशात्सिद्धं।
यत्रैषा परिभाषेष्यते तत्रोदात्तनिर्देशः कर्त्तव्यः। ततो वक्तव्यं। अपनं त्वविकारे सस्वरे शस्य कार्यं भवत्युदात्तनिर्देश इति। स तर्ह्युदात्त
निर्देशः कर्त्तव्यः। यत्रैवान्तस्सदेशश्च युगपत्सम्भवस्थितौ तत्रैषा परिभाषा भवति। दोषेषु चान्यत्रान्तः ससदेशः अन्यत्रानन्तः ससदेशः प्रयो
जनेषु पुनः तत्रैवान्तस्सदेशश्चानन्तस्सदेशश्च। तथाजातीयकानि खल्वप्याचार्येण प्रयोजनानि पठितानि। यान्युभयवन्ति भवन्ति॥

नकर्त्तव्यः२ श्चानंतससदेश२

यासवरिति नाधिकारः। एवमुदाहृतेनैषा परिभाषेत्यर्थः। न कर्त्तव्य इति सर्वत्रापि परिभाषोपलक्षणे दोषाभावात्। यत्रैवेति। विधिनिषेधयोरेकविषयत्वाश्रयणात्। रामं॰
१८

इदमेकमिति। अविभक्तिरत्र ज्ञापकं तस्य सदेशस्येकोः संभवादनेनतस्य सदेशस्येकः प्राप्नोरीर्घ उपधाग्रहणेन निवर्त्यते। बंधु। कारीषगंध्यामातास्येति बहुव्रीहौ कृते स्यादेवं वचनान्मातृशब्द

मातृक२

इदमेकं यथादेशास्तथा वौ रूपधाग्रहणमिति। अविभक्तिर्वा न। तच्चापि क्रियते न्यासस्य एवं ष्यङः संप्रसारणम्। बंधुनि। मातजमातृकमातृषु ष्यङः प्रसायों

विभाषया। मातच्। कारीषगंध्यामातास्य कारीषगंधीमातः कारीषगंध्यामातः। मातच्। मातृकः। कारीषगंधीमातृकः कारीषगंध्यमातृकः। मातृ। का

रीषगंधीमाता। कारीषगंध्यामाता। ग्रहिज्यावयि। वयिग्रहणं किमर्थं। न वेञ् यजादिषु पठ्यते। वेञ् वयिरादेशः क्रियते तत्र यजादीनां क्तिति त्ये

व सिद्धं। तत्रैतत् स्यात् डिः दर्थोऽयमारंभ इति। तच्च न लिट्यय मादेशः। लिट्कि देव। अत उत्तरं पठति। वयिग्रहणं वेञः प्रतिषेधात्। वयिग्रहणं क्रि

यते वेञः प्रतिषेधात् वेञो लिटि प्रतिषेधं वक्ष्यति। सः वयेर्माभूत्। यथैव हि वेञ् ग्रहणाद्विधिः प्राप्नोत्येवं प्रतिषेधोऽपि प्राप्नोति। नवा पकारप्रति

षेधो ज्ञापकोऽप्रतिषेधस्य। नवा एष दोषः किं कारणं। परं यं त्वि द्वयोर्वा इति वयेः यकारस्य संप्रसारणस्य प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो न वेञ =

ग्रहणे वयेः संप्रसारणप्रतिषेधो भवतीति। नैतदस्ति ज्ञापकं पित्यभ्यासार्थमेतत् स्यात्। वयेः पित्सु वचने षभ्यासस्य पकारस्य संप्रसारणं माभूत् इति। न =

नु वेञ् ग्रहणादेव वयेः पित्सु पिवचने षभ्यासयकारस्य संप्रसारणप्रतिषेधः सिद्धः न सिध्यति। किं कारणं क्तिति तत्रानुवर्तते। एवमपि वयेः पि

=... १८ त्सु वचने षभ्यासस्य यकारस्य संप्रसारणं न प्राप्नोति॥ किं कारणं॥ ॥ ॥

स्यमातजादेशः चकारः स्वरार्थस्तेन पूर्वपदमकृतिस्वरत्वं बाधित्वा तोदात्तत्वं भवति मातृमातृकशब्दयो स्त्रभेदेनोपादानान्न घ तमन्ते ति समासांताभावः॥ ॥ ॥

भा०कै०६ ग्रहिज्या॥ विकृतिग्रहणमिति। कश्चिद्ब्रूयाद्वेञ इति सूत्रं मा कारि वयिग्रहणेन वेञो ग्रहणाल्लिटि संप्रसारणप्रतिषेधो भविष्यतीत्याशंक्योक्तं विकृतिग्रहणमिति। यद्य
१५ पि वयो यकारस्य प्रतिषेध उक्तो नैवेञो यकारोऽस्तीति यापि पुष्कलं परिहारं वक्तुमेतन्नाश्रितं। अथवा लिटि वय इति योगविभागः करिष्यते। तत्र वयिग्रहणेन वे
ञोग्रहणात्तत्संप्रसारणप्रतिषेधो भविष्यति। ततो य इति द्वितीयो योगो नियमार्थो यस्य यकारस्यान्यस्यास्ति तस्य वयेर्यकारस्यैव निषेधो भवतीत्याशंक्योक्तं वि

हलादिःशेषेण बाध्यते। नात्र हलादिःशेषः प्राप्नोति। किं कारणं। वक्ष्यति ह्येतत्। अभ्याससंप्रसारणं हलादिशेषाद्विप्रतिषेधेनेति।
स एष वयेर्यकारस्य संप्रसारणप्रतिषेधः पित्यभ्यासार्थो न ज्ञापकार्थो भवति। पित्यभ्यासार्थमिति चेन्नाविशिष्टत्वात्। पित्यभ्या
सार्थमिति चेत्। तन्न। किं कारणं। अविशिष्टत्वात्। अविशेषेण प्रतिषेधः निर्दिष्टं तत्र कितीति। आतश्चाविशेषेण। वेञोऽपि हि पित्सु व
चनेऽभ्यासस्य संप्रसारणं नेष्यते। ववौ ववियेति। विकृतिग्रहणं खल्वपि प्रतिषेधे क्रियते। न च विकृतिः प्रकृतिं गृह्णाति। लिट्यभ्या
सस्योभयेषां। ग्रहिवश्चतिपृच्छतिभृज्जतीनामविशेषः॥ ॥ ॥

कृतिग्रहणमिति। प्रकृत्या विकृतिर्गृह्यते स्थानिवद्भावान्न तु विकृत्या प्रकृतिर्भिन्नरूपत्वादिति भावः। तदेवं वयिग्रहणं प्रत्याख्यातं। लिट्यभ्या। ग्रहीति। असति सूत्रे यद्रूपं त राम०
देवसतीत्यभिप्रायेणोक्तं। भाष्यकारस्तु रेफस्य संप्रसारणे सत्यसति वा विशेषो नास्तीति मत्वा वार्त्तिककारेणेतदुक्तं॥ ॥श्री॥ ॥७॥ १९

तच्चायुक्तमिति मन्यमान आह। यदुच्यत इति। इदं तर्हीति। उभयेषां ग्रहणात्पुनः संप्रसारणस्य विधिर्भवन्निवर्ध्यं तरस्य बाधको भवति॥ ॥श्री॥ ॥श्री॥

यदुच्यते। वष्टेरविशेष इति तत्र यद्यत्र रेफस्य संप्रसारणं न स्यात् वकारस्य प्रसज्येत रेफस्य पुनः संप्रसारणे सति उरदत्वस्य स्थानिवद्भावान्न संप्रसारणे सं
प्रसारणमिति प्रतिषेधः सिद्धो भवति। तस्माद्युक्तमेतत् ग्रहेरविशेषः इच्छति भ्रज्जतेरविशेष इति। अथोभयेषां ग्रहणं किमर्थं। उभयेषामभ्या
सस्य संप्रसारणं यथा स्यात्। वचिस्वपियजादीनां ग्रहादीनां च नैतदस्ति प्रयोजनं। प्रकृतं उभयेषां ग्रहणमनुवर्त्तते। यद्यनुवर्त्तते ग्रहिज्यावयि
व व्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति चेति यजादीनां ङिति स्यपि प्राप्नोति। नैष दोषः। संबंधमनुवर्त्तिष्यते। वचिस्वपियजादीनां किति
ग्रहादीनां ङिति। वचिस्वपियजादीनां किति। ततो लिट्यभ्यासस्योभयेषां। किति ङितीति निवृत्तं। अथवा मण्डूकगतयोधिकाराः यथा मण्डूका उत्प्लु
त्योत्प्लुत्य गच्छंति तद्वदधिकाराः। अथवा एकयोगः करिष्यते। वचिस्वपियजादीनां किति ग्रहादीनां ङिति चेति लिट्यभ्यासस्येति। न चैकयो ततो
गेनुवृत्तिर्भवतीति। अथवोभयं निवृत्तं। तदपेक्षिष्यामहे। इदं तर्हि उभयेषां ग्रहणस्य प्रयोजनं। उभयेषामभ्यासस्य संप्रसारणमेव यथा स्यात्।
यदन्यत्प्राप्नोति तन्मा भूदिति। किं चान्यत्प्राप्नोति हलादिशेषः। अभ्यासस्य संप्रसारणं हलादिशेषाद्विप्रतिषेधेनेति वक्ष्यति। स पूर्वविप्रति
षेधो न पठितव्यो भवति। अभ्याससंप्रसारणं हलादिशेषाद्विप्रतिषेधेन॥ ॥श्री॥ ॥श्री॥ ॥०॥

॥०॥ ॥०॥ ॥०॥ ॥०॥ ॥०॥ ॥

आकारलोपश्चेति। सति चाकारलोपे तस्य स्थानिवद्भावादुवङ्। नस्यात्तत्र श्वयणादेशं प्रसज्येत। यणादेशश्चेति एरनेकाच इत्यनेन॥ ॥श्री॥ ॥१॥

=विप्रतिषेधे हलादिशेषसंप्रसारणयोरभ्याससंस्कारकत्वेन समानफलकत्वात्संप्रसारणेन हलादिशेषबाधः प्राप्तो ऽभ्यासविकारेष्वपवादो बाधको भवति ... =शुशुवतुरिति। श्विनेऽनेकाच्त्वादिकारस्य यणादिरिति भावः। नत्वकारस्य कोमपिति तस्य परत्वात्पूर्वत्वेन बाधात्। =

अभ्यासस्य संप्रसारणं भवति हलादिशेषाद्विप्रतिषेधेन। अभ्याससंप्रसारणस्यावकाशः॥ इयाज उवाप। हलादिशेषस्यावकाशः। बिभिदतुः। बिभिदुः। इहोभयं प्राप्नोति। विव्याध विव्यधिथ। अभ्याससंप्रसारणं भवति पूर्वविप्रतिषेधेन। सत्र हि पूर्वविप्रतिषेधो वक्तव्यः। न वा संप्रसारणाश्रयबलीयस्त्वादन्यत्रापि। न वा वक्तव्यः। किं कारणं। संप्रसारणाश्रयस्य बलीयस्त्वादन्यत्रापि। संप्रसारणं संप्रसारणाश्रयं च बलीयो भवतीति वक्तव्यं। अन्यत्रापि नावश्यमिहैव वक्तव्यं। किं प्रयोजनं। प्रयोजनं रमाल्लोपेयङ्यणः। रम्। भृशः। भृष्टवान्। संप्रसारणं च प्राप्नोति रमभावश्च। परत्वाद्रमभावः स्यात्। संप्रसारणं बलीयो भवतीति वक्तव्यं। संप्रसारणं यथा स्यात्। आल्लोप। जुहुवतुः जुहुवुः। संप्रसारणं च प्राप्नोत्याकारलोपश्च। परत्वादाकारलोपः स्यात् संप्रसारणं बलीयो भवतीति वक्तव्यं संप्रसारणं यथा स्यात्। संप्रसारणे कृते पूर्वत्वं च प्राप्नोत्याकारलोपश्च। परत्वादाल्लोपः स्यात्। संप्रसारणं चाश्रयं बलीयो भवतीति वक्तव्यं पूर्वत्वं यथा स्यात्। इयङ्। शुशुवतुः। शुशुवुः। संप्रसारणं च प्राप्नोतीयङादेशश्च। परत्वादियङादेशः स्यात्। संप्रसारणं बलीयो भवतीति वक्तव्यं। संप्रसारणं यथा स्यात्। नैतानि संति प्रयोजनानि। यत्तावदुच्यते रमिति। इदमिह संप्रधार्यं रम्भावः क्रियतां संप्रसारणमिति। किमत्र कर्तव्यं परत्वाद्रम्भावः। नित्यं संप्रसारणं कृतेऽपि रम्भावे प्राप्नोत्यकृतेऽपि रम्भावोऽपि नित्यः कृतेऽपि संप्रसारणे प्राप्नोत्यकृतेऽपि। कथं। योऽसावृकारे रेफस्तस्य चोपधायाश्च प्राप्नोति। अनित्यो रम्भावः। न हि कृते संप्रसारणे प्राप्नोति। किं कारणं। न हि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते॥ ॥श्री॥ ॥१॥

उपदेश इति। तेनोपदेशे योरेफस्तस्य रमभावः। उरृत् चा इति। उरृद्विचतीति मिथुनेऽसिः पूर्ववच्चुसर्वं मित्सति प्रत्ययः। स्यापेः। ङि॰ तीति वर्त्तत इति। ङितीत्येतन्नुचानुवृष्टत्वाद्दस्वरि तत्वाद्वानानुवर्त्तिष्यत इति भावः। तच्चङि॰ ग्रहणं लिट्यभ्यासस्योभयेषामित्यत्र नुवर्त्तते। लिटो ङि॰ तोसंभवादिहैवलनुवर्त्तते। न चान्य इति। यङ्॰ तावदनेकाच्त्वात्स्यापेर्नोस्ति।

=उपसर्गविशिष्टोधातुर्मिथुनं स्वरवर्जमनुनीव सर्वं॥=

यदन्युच्यते

अथापि गृह्यंते एवमप्यनिस्यः उपदेश इति वर्त्तते तच्चावश्यमुपदेशग्रहणमनुवर्त्त्यं। बरीभज्यत इत्येवमर्थं आज्ञोपेयङ्ग्रहण इति। नित्यं संप्रसारणं। अंतरंगं पूर्वत्वं। तदेतदनन्यार्थं संप्रसारणं तदाश्रयं च बलीयो भवतीति वक्तव्यं। पूर्वविप्रतिषेधो वक्तव्यः। उभयं न वक्तव्यं। उक्तमुभयेषांग्रहणस्य प्रयोजनं। उभयेषामभ्यासस्य संप्रसारणमेव यथा स्यात्। यदन्यत्प्राप्नोति तन्माभूदिति। व्यचेः कुटादित्वमनसि ञ्णिति संप्रसारणार्थं। व्यचेः कुटादित्वमनसि वक्तव्यं। किं प्रयोजनं॥ अञ्णिति संप्रसारणार्थं। अञ्णिति संप्रसारणं यथा स्यात्। उद्विचिता। उद्विचितुं। उद्विचितव्यं। अनसीति किमर्थं। उरुव्यचाः कंटकाः। स्वापेश्चङि॰। चङ्॰ ग्रहणं शक्यमकर्त्तुं। कथं। ङि॰ तीति वर्त्तते। न चान्यः स्वापेर्ङि॰ दस्ति अन्यदतश्चङः। न वशः। वशेर्यङि॰ प्रतिषेधः। वशेर्यङि॰ प्रतिषेधो वक्तव्यः संप्रसारणस्य। वावश्यते। किमाभूत्। उष्टः उशंतीति। सतर्हि तथा प्रतिषेधो वक्तव्यः। न वक्तव्यः। यङीति

वर्त्तते। एवं तर्ह्यन्वाचष्टे यङीति वर्त्तत इति॥ ॥ ॥श्री॥ ॥

अपित्सार्वधातुकं तु विकरणैर्व्यवहितम इङादयः स्वापेर्न विहिताः। न वशः। वशेर्यङीति। यथा स्वापेश्चङीत्यत्र ङि॰ ग्रहणानुवृत्त्या चङीति प्रसारव्यातं। न थेहापि ङि॰ ग्रहणानुवृत्त्या ङि॰ न्मात्रे प्रतिषेध इत्याशंकानिवारणाय वार्त्तिककारो यङ्॰ ग्रहणानुवृत्तिमन्वाचष्टे॥ ॥श्री॥ ॥श्री॥ ॥७॥

=वद्ग्रहणमिति॰ स्त्रमते स्थितमेव चद्ग्रहणं भाष्यकृता प्रसाध्यानंद इति॰ क्ष्वृहणानुवृत्तिशंकानिरासा मानाख्यां न मनर्थकमिसर्थः॥ १९ = ननु एवं तस्य पाकानुकूलव्यापारार्थत्वेऽपि पाके॥ इन्नेः कथं तत्र निपातनं यथा कथंचित्साकद्वृत्तिताश्रमेण तु एवं तास्मादपि निपातनापत्तिरत आह॰ श्राश्रित्यर्थिति॰ २=

नैतद्व्याख्येयमिति। स्वापेश्वद्रीसत्रचुं ड्-ग्रहणं कृतमेव। ततश्च दि-तीत्यस्यानधिकाराद्घटे-वसंबध्यते॰ नंतरत्वात्। शृतं पाके॥ श्राश्रप्योरिति। श्रा पाक इत्यत्राद्दौ पच्यते श्रे पाक इति भूवादौ। घटादिषु तु मितार्थ श्रा पाक इति पठ्यते श्राति श्वकर्मके कर्त्तृविषयस्य पचेरर्थे पच्यमान कर्तृकव्यापारे वर्त्तते। ततः पक्तृव्यापारे णिजुत्पद्यते। ततश्च पचतीतियोर्थः स एव श्रपयतीतिगम्यते। तत्रपरा श्रातेः क्त उत्पद्यते तदा ऽकर्मकत्वात्कर्त्तरि भवति श्रयेस्तु कर्मणि। शृतं क्षीरं स्वयमेव शृतं क्षीरं देवदत्तेन। श्रयेः शृतमन्यत्र हेतोरिति। हेतुश

नैतद्व्याख्येयमधिकाराद्नुवर्त्तेत इति। एष एव न्यायः पदुताधिकाराद्नुवर्त्तेरन्निति। शृतं पाके। किं निपात्यते॥ श्राश्रप्योः शृभावः श्राश्रप्योः शृभावो निपात्यते। क्षीरहविषोरिति वक्तव्यं। शृतं क्षीरं। शृतं हविः। क्वमाभूत। श्राणा यवागूः श्रपिता यवागूरिति। श्रपेः शृतमन्यत्र हेतोः श्रयेः शृतमन्यत्र हेतोरिति वक्तव्यं। इह माभूत। श्रपितं क्षीरं देवदत्तेन यज्ञदत्तेनेति। प्यायः पी। आङ्-पूर्वादंधूधसोः आङ्-पूर्वादंधूधसोरिति वक्तव्यं। श्रापीनोंधुः आपीनमूधः। किं प्रयोजनं नियमार्थं आङ्-पूर्वादंधूधसोरेव। क्वमाभूत आप्यानः स्वंद्रमा इति। उभयतो नियमश्चायं द्रष्टव्यः। आङ्-पूर्वादेवांधूधसोः। अंधूधसोरेवाङ्-पूर्वादिति। क्वमाभूत। प्रप्यानोंधुः प्रप्यानमूधः॥ ॥ ॥

हेतुनप्रयोजकस्य हेतोर्व्यापारः प्रेषणादिलक्षण उपचारादुच्यते तेन पक्तुर्यः प्रयोजकस्तदीये व्यापारे पचिप्रकृतिणिजन्तात् श्रपयतेरूपमन्नस्य णिचोभिधेये क्षीरहविषोरपि शृतमितिन भवति किं तु श्रपितमिति। तत्र श्राश्रप्योरिति वचनाद्घपक्तृलक्षणप्रयोजकव्यापाराङ्गीकरणादन्यत्र हेतोरित्यनेन पाचयितृलक्षणप्रयोजकव्यापारनिषेधः सामर्थ्यादवसीयते। एतच्च पाकग्रहणाल्लभ्यते। द्विविधो हि पाको विक्लित्तिलक्षणो विक्लेदनालक्षणश्च पाचयितृव्यापारे तु णिचि कृते पाचनालक्षणोऽर्थः प्राधान्येनाभिधीयते न तु पाकलक्षण इति निपातनाभावः॥ ॥

प्यायः पी। आङ् पूर्वाच्चेति। आङ उत्तरयणे न नियमद्वयविधानात् केवलस्य सर्वत्र पीभावः। आङ् पूर्वादेवाप्यूधसोरित्यनेन नियमेन तुल्यजातीयत्वादुपसर्गान्तरं निवार्यते न तु केवलः प्यायतिः। विभाषा श्वेः। लिट्यङोश्च। किं त्वा किल भेदेन द्वैविध्यादुभयत्र विभाषेयं। तत्र संप्रसारणपक्षे कृते संप्रसारणस्य द्विर्वचनान्नास्ति विकल्पः। संप्रसारणाभावपक्षे त्वभ्यासस्योभयेषामिति संप्रसारणं प्राप्नोतीति मत्वाह श्वेर्लिटीति यश्चेति। किंल्लक्षणं नित्यं संप्रसारणं परत्वादियं विभाषा बाधते यथा तथाभ्यासलक्षणमपीति भावः। अन्येयजादय इति। के

आङ् पूर्वात् श्वेः नियमो दृश्यः भवति हि पीनं पुरस्तं पीनाः। पीवद्यः स्फल्क्षणापीनमुखी कन्येति। विभाषा श्वेः। श्वेर्लिटि अभ्यासलक्षणप्रतिषेधः। श्वेर्लिटि अभ्यासलक्षणं संप्रसारणं नित्यं प्राप्नोति तत्प्रतिषेधो वक्तव्यः। शिश्वियतुः। शिश्वियुः। किमुच्यते अभ्यासलक्षणस्येति न पुनः किंल्लक्षणस्यापि। किंल्लक्षणमपि हि नित्यं तत्र प्राप्नोति। किंल्लक्षणं श्वयतिलक्षणं बाधिष्यते। यथैव तर्हि किंल्लक्षणं श्वयतिलक्षणं बाधते एवमभ्यासलक्षणमपि बाधेत। न ब्रूमोऽपवादत्वात् श्वयतिलक्षणं किंल्लक्षणं बाधिष्यत इति। किं तर्हि परत्वात्। श्वयतिलक्षणस्यावकाशः। पितिवचनानि। शुशाव। शुशविथ। शिश्वाय। शिश्वयिथ। किंल्लक्षणस्यावकाशः। अन्ये किंतः। ऊनः। ऊनवान्। इहोभयं प्राप्नोति। शिश्वियतुः। शिश्वियुरिति। श्वयतिलक्षणं भवति विप्रतिषेधेन। अभ्यासलक्षणमपि तर्हि श्वयतिलक्षणं भविष्यति विप्रतिषेधेन। अभ्यासलक्षणस्यावकाशः। अन्ये यजादयः। इयाज। उवाय। श्वयतिलक्षणस्यावकाशः। शु-

शिश्वियतुः २ शुवतुः। शुशुवुः। श्वयतेरभ्यासस्योभयं प्राप्नोति। शिश्वियुः। श्वयतिलक्षणं भविष्यति विप्रतिषेधेन। स युक्तो विप्रतिषेधः। न हि श्वयतेरभ्यासस्यान्ये यजादयो ऽवकाशः। श्वयतेर्यजादिषु यः पाठः सोऽनवकाशः। तस्मान्नकाशत्वाद् युक्तो विप्रतिषेधः॥ न नै २ ॥ ॥ ४पर धातु रूपं ४२ ॥

षुचिद्व्ययवे षुक्तं तं शास्त्रं समुदाये प्रवृत्तं भवति। न हि श्वयतेरिति। यजादीनामिति श्ववस्थावाच्यादिशब्दोपादानात् यथापाठं सर्वेषां चोदितत्वात् कार्येणमौ व्यां सर्वे कार्यो येष्वगण-

पाठ इति किंति संप्रसारणं यजादिषु श्वयतिपाठस्यावकाश इत्यपि न शक्यते वक्तुं॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

=श्वन इसाये-=

=भाष्यमिति। प्यायोऽसौ पीनो ऽपि द्वयवे चास्तितार्थ्ये पिप्रति पदपठिते श्वय स्यासे। चतितार्थे लिङ्घभ्यासेति विभाषापवादः स्यादिति भावः। =

=श्वनइस्याये यजादिषु श्वयतेः पाठश्चरितार्थः स्यादत आह। सर्वेति। लिङ्घपरश्वयस्याभ्यासविषयकलक्षणानुपलब्धम चरितार्थमिति तात्पर्यं। =

भा०कै०६ ह्वः सं। ह्वः संप्रसारणे योगविभाग इति। इहैकमनेकं वा कार्यं विधातुं कालविच्छेदाभावेन निर्देश एकयोगः। तत्रैकस्मिन् योगे प्रवृत्तमानेऽभ्यस्तस्येति योगविभागः कर्तव्यः। ह्वो
२२ ऽभ्यस्तस्येत्युच्यत इत्यभिहिते एवं तर्हि ह्वयतेरभ्यस्तस्येत्यादि कमर्थं भेदाभावात् पुनरुक्तमित्याह ह्वः। तत्र पौनरुक्त्यं परिहरन्ति। जिह्वायत्कीयिषतीत्यादौ संप्रसारणं माप्रवर्तिष्टेति
ह्वयतेरर्थाव्यतिरेको रूपाव्यतिरेको वा अपि त्वभ्यस्तत्वपूर्वोऽग्रथो र्थव्यतिरेकाश्रयउत्तरस्तु रूपव्यतिरेकाश्रयः। इह ह्वयतेरर्थाय त्ननव्यतिरिच्यते यथा जुहाव जुहुवुः विधेयेति।

तस्मात्सुष्ठूच्यते भेदे लिङ्घ्यभ्यासलक्षणप्रतिषेध इति। ह्वः संप्रसारणम् अभ्यस्तस्य च। ह्वः संप्रसारणे योगविभागः कर्तव्यः। ह्वः संप्रसारणं भवति
णौ च संश्चङोः। ततोऽभ्यस्तस्य च संप्रसारणं भवतीति। किमर्थो योगविभागः णौ च संश्चङ्विषयार्थः। णौ च संश्चङ्विषये ह्वः संप्रसारणं
यथा स्यात्। जुहावयिषति। अजूहवत्। किं पुनः कारणं न सिध्यति। ह्वोऽभ्यस्तस्येत्युच्यते। न चैतत् ह्वोऽभ्यस्तं। किं तर्हि ह्वायतेः। ह्वः एतद
भ्यस्तं। कथं। एकाचो द्वे प्रथमस्येति। एवं तर्हि ह्वयतेरभ्यस्तस्येत्युच्यते। न चात्र ह्वयतिरभ्यस्तः। किं तर्हि ह्वापयतिः। ह्वयतिरेवात्राभ्यस्तः कथं। ए
काचो द्वे प्रथमस्येति। एवमपि। अभ्यस्तनिमित्तेऽनभ्यस्तसंप्रसारणार्थं। अभ्यस्तनिमित्त इति वक्तव्यं। किं प्रयोजनं। [redacted] ॥श्री॥ [redacted] ॥

तत्र संप्रसारणेन भाव्यं न त्वर्थव्यतिरेके। ह्वापयतौ च णप्रत्ययस्य प्राधान्याद्व्यतिरिक्तार्थो ह्वयतिरिति पूर्वपक्षः। न चैतदिति। अव्यतिरिक्तार्थस्येति भावः। अव्यतिरिक्तार्थत्वाच्छ्रीयमा
णे जुहूषतीत्यत्र न प्राप्नोति। प्रत्ययार्थस्येच्छायाः प्राधान्यात् प्रकृत्यर्थस्य गुणभावादिति मत्वाह। ह्वः एतदिति। लिचितर्हि युक्तिकृते रूपस्य [redacted] तिरेकत्वात्संप्रसारणप्राप्तिरिति मत्वा राम०
ह। एवं तर्हि ह्वयतेरिति। युगागमस्य तद्भक्ततया नास्ति रूपव्यतिरेक इत्याह। ह्वयतिरिति। प्रकारान्तरेण संश्चङ्परे णावप्राप्तिमाह। एवमपीति॥ ॥श्री॥ ॥ २२

अनभ्यस्तस्येति। अकृतद्विर्वचनस्येत्यर्थः। यत्व्यवहितत्वादिति। अवर्णोहकाराभ्यां पूर्वोपरयोर्व्यवहितत्वान्निमित्तसंप्रसारणप्रतिषेधो न भविष्यतीत्यर्थः। तद्यथेति। ननु दृष्टान्तेषु विरुद्धपदसामानाधिकरण्यात् गौणार्थत्वं प्रतीयते। इह तु मुख्यार्थसंभवे कथं गौणस्य ग्रहणं लक्ष्यसंस्कारार्थत्वात् लक्षणस्य तत्सिद्धये गौणस्याप्यर्थस्याङ्गीकरणाददोषः। अथवेति। यौगिकत्वान्निमित्ते अभ्यस्तशब्दस्य गौणार्थत्वाभावः। ह्वयतिरेवाभ्यस्तशब्देनोच्यते नतु सनादिः प्रत्यय इति षष्ठीनिर्दिष्टेन चोदनीयः। अभ्यस्तमस्मिन्नस्तीत्यधिकार

=तस्येव [illegible] यत्वात्= =कार्येहेतु=

अनभ्यस्तस्य संप्रसारणार्थे अनभ्यस्तस्य संप्रसारणं यथा स्यात्। जुहूषति। जोहूयते। अभ्यस्तसंप्रसारणे ह्यभ्यासप्रसारणप्राप्तिः। अभ्यस्तसंप्रसारणे हि अभ्यासप्रसारणस्याप्राप्तिः स्यात्। न संप्रसारणे संप्रसारणमिति प्रतिषेधः प्रसज्येत। ननु चाव्यवहितत्वान्न भविष्यति। समानाङ्गे प्रसारणप्रतिषेधात् प्रतिषेधः। समानाङ्गे प्रसारणप्रतिषेधात् प्रतिषेधः प्राप्नोति। समानाङ्गग्रहणं तत्र चोदयिष्यति। कृदन्तप्रतिषेधार्थं वा। २
अभ्यस्तनिमित्त इति वक्तव्यं। किं प्रयोजनं। ह्वायकमिच्छति ह्वायकीयति। ह्वायकीयतेः सनि जिह्वायकीयिषति। सतर्हि निमित्तशब्द उपादेयः। नह्यन्तरेण निमित्तशब्दं निमित्तार्थोवगम्यते। अन्तरेणापि निमित्तशब्दं निमित्तार्थोऽवगम्यते। तद्यथा। दधित्रपुसं प्रत्यक्षो ज्वरः ज्वरनिमित्तमिति गम्यते। नड्वलोदकं पादरोगः। रोगनिमित्तमिति गम्यते। आयुर्घृतं। आयुषो निमित्तमिति गम्यते। अथवा अकारो मत्वर्थीयः। अभ्यस्तमस्मिन्नस्ति सोयमभ्यस्तः। अभ्यस्तस्येति। अथवा अभ्यस्तस्येति नैषा ह्वयतिसमानाधिकरणषष्ठी कात र्हि संबंधषष्ठी। अभ्यस्तस्य यो ह्वयतिः किं चाभ्य

स्तत्वेन ह्वयतिरेव निर्दिष्टः प्रत्ययाभिधाने वा सप्तम्याः स्थाने षष्ठी कृता। अधिकरणे वा षष्ठी। अभ्यस्तस्य सनादेः प्रकृतिर्यो ह्वयतिस्तस्येत्यर्थः। अभ्यस्तस्य यो ह्वयतिरिति। एवं चोभयप्रसङ्गे परत्वात्संप्रसारणे कृते द्विर्वचनमित्यदोषः। जिह्वायकीयिषतीत्यत्र तु न भवत्यभ्यस्ते न प्रत्ययविशेषणपक्षे पादभ्यस्तनिमित्ते प्रत्यये अनन्तरस्य ह्वयतेः संप्रसारणाभावादत एव चङ्परे णौन

॥ प्राप्नोतीति योगविभागं कर्तव्यः॥ ॥श्री॥ ॥श्री॥ ॥

भा०कै०६
२३

अपस्प। कस्मांचिच्छारतायामपस्पधेथामित्येकं पदमाद्युदात्तं पठ्यते पदद्वयं चान्यस्मांतत्र द्वितीयमाद्युदात्तं तदुभयमप्यनेन संगृह्यते एकश्रुत्यास्वरस्वेनाम्नापाभूत। तत्रैक पद्येतिङ्ङतिङः इति निघातः प्राप्नोयदृत्तान्नित्यमिति प्रतिषिद्धः ततो हस्वरेण आद्युदात्तं पदं भवति। यदा द्वे पदे तदा निपाते यद्यहीति निघाते प्रतिषिद्धे तास्यनुदात्तेदितिल सार्वधा तुकानुदात्तत्वे धातुस्वरेण स्पधेथामिति पदमाद्युदात्तं तिङि चोदात्तवती त्यपशब्दस्य निघातः। सोमववृत्व इति सोमस्येववद्भुत्वेभ्राभाव इति नियमाश्रयणात् सोमाद न्यत्रै

=स्पष्टत्वाकारस्य·२= =सर्वस्वरसाधारणेन·१=

द्वोम्यस्तस्य प्रकृतिरितियोगविभागस्तुकर्त्तव्य एव। नात्र द्वयतिरभ्यस्तप्रकृतिः किं तर्हि ह्वापयतिः। अपस्पधेथां। अपस्पधेथामिति किं नि पात्यते। स्पर्द्धेर्लङ्यात्मनेपदानां मध्यमपुरुषस्य द्विवचने आथामि द्विर्वचनं संप्रसारणं अकारलोपश्च निपात्यते। इंद्रश्च विष्णोपदस्पधेथां। अस्पर्द्धेथामिति भाषायां। अपर आह। अपपूर्वात्स्पर्द्धेर्लङ्यात्मनेपदानां मध्यमपुरुषस्य द्विवचने आथामि संप्रसारणमकारलोपश्च निपात्यते। इंद्रश्च विष्णोपदस्पधेथां। अपास्पर्द्धेथामिति भाषायां। आनाश्रितमिति किं निपात्यते। श्रीणातेः क्ते भ्राभाव श्रिभावो निपात्यते। क्व पुनः भ्राभावः। सोमे भ्राभावः अन्यत्र श्रिभावः। न तर्हीदानीमिदं भवति श्रितः सोम इति बहुवचने भ्राभावः। नन्न हीदानीमिदं भवति। श्रितानोयहा इति सोमवद्भुत्वे भ्राभावः अन्यत्र श्रिभावः॥ ॥ ॥

=यस्मानोक्तोत्तनेसाधो·१= =अभ्भावोत्रपवेछांदसः।२=

कत्वेपि भ्राभावः क्वचिद्दृश्यते। [redacted] ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥ एम०
२३

ननु चेदानीमेतयापरिभाषयेहापि शक्यमुपस्थातुं। नेत्याह। नहि वचिस्वपियजादीनां ग्रहादीनां च द्वंसोयणस्ति। एवं तर्ह्येनं सविकारेंऽ
समस्तदेशस्येति। द्वंसमस्तदेशो यणस्तत्कार्यं भविष्यति। नैतस्याः परिभाषायाः प्रयोजनानि। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न सर्वस्य यणः
संप्रसारणं भवतीति यदयं प्यायः पीभावं शास्ति। कथं कृत्वा ज्ञापकं पीभाव एतत्प्रयोजनं। आपीनमूधः एतद्रूपं यथा स्यादिति। य आपीनोंधुः २
दि चात्र सर्वस्य यणः संप्रसारणं स्यात्पीभाववचनमनर्थकं स्यात् संप्रसारणे कृते संप्रसारणपरपूर्वत्वे द्वयोरिकारयोरेकादेशे सिद्धं
रूपं स्यात्। आपीनोंधुः आपीनमूध इति। पश्यति त्वाचार्यः न सर्वस्य यणः संप्रसारणं भवतीति। ततः प्यायः पीभावं शास्ति। नैतद
स्ति ज्ञापकं। सिद्धे हि विधिरारभ्यमाणो ज्ञापको भवति। न च प्यायः संप्रसारणे न सिध्यति। संप्रसारणे हि सत्यंत्यस्य प्रसज्येत। एवमपि ज्ञापकमे
व। कथं प्याय इति नैषा स्थानषष्ठी का तर्हि विशेषणषष्ठी प्यायो यो यणिति। तदेतत् ज्ञापयत्याचार्यः। न सर्वस्य यणः संप्रसारणं भवतीति।
यदयं प्यायः पीभावं शास्ति। एवमप्यनैकांतिकमेतत्। एतावत् ज्ञाप्यते न सर्वस्य यणः संप्रसारणं भवतीति। तत्र कुत एतत् परस्य भविष्य
ति न पूर्वस्येति। उच्यमानेप्येतस्मिन् सूत्रे कुत एतत् परस्य भविष्यति न पूर्वस्येति। एकयोगलक्षणं खल्वपि संप्रसारणं। तद्यदि तावत्

×न संप्रसारणे संप्रसारणं· किमर्थमिदमुच्यते· वचिस्वपियजादीनां ग्रहादीनां च संप्रसारणमुक्तं तत्र यावंतो यणः सर्वेषां प्राप्नोति· इष्यते च परस्य यथा स्यात् ×
×पूर्वस्य तु चान्तरेण यत्नं न सिध्यतीति न संप्रसारणे संप्रसारणं एवमर्थमिदमुच्यते· किमन्येप्येवंविषया भवंति· अतो दीर्घो यञि सुपि चेति· घटाभ्यां· अकारमात्रस्य दीर्घत्वं ×
×कस्मान्न भवति· अस्त्यत्र विशेषः। इयमत्र परिभाषोपतिष्ठते अलोंत्यस्य· ×१

भा०वै०६
२५

परमभिनिर्वृत्तं पूर्वमप्यभिनिर्वृत्तमेव। प्रसक्तस्य चानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या कर्तुं नाभिनिर्वृत्तस्य। यो हि भुक्तवन्तं ब्रूयान्मा भुंक्था
इति किं तेन कृतं स्यात्। अथापि पूर्वमनभिनिर्वृत्तं परमप्यनभिनिर्वृत्तमेव। तत्र निमित्तसंश्रयो नुपपन्नः न संप्रसारणे संप्रसारणमिति। नैष
दोषः। यत्तावदुच्यते उच्यमानेऽप्येतस्मिन्कुत एतत्परस्य भविष्यति न पूर्वस्येति। इङ्गितेन चेष्टितेन निमिषितेन महता वा सूत्रप्रबंधे
न आचार्याणामभिप्रायो गम्यते। एतदेव ज्ञापयति परस्य भविष्यति न पूर्वस्येति यदयं न संप्रसारणे संप्रसारणमिति प्रतिषेधं शास्ति। यद
प्युच्यते॥ एकयोगलक्षणं खल्वपि संप्रसारणं तद्यदि तावत्परमभिनिर्वृत्तं पूर्वमप्यभिनिर्वृत्तमेव। प्रसक्तस्य चानभिनिर्वृत्तस्य प्रतिषेधे
न निवृत्तिः शक्या कर्तुमिति। अस्तूभयोरनिर्वृत्तिः। न वयं पूर्वस्य प्रतिषेधं शिष्मः॥ ॥ ॥श्री॥ ॥श्री॥

=संप्रसारणम्।१=

॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

=एवं सति दोषो [illegible] रेफत्वे पित्त्वाग्रहणाद्यानभिज्ञं प्रसंगस्य [illegible] अकारान्तरे [illegible] इत्यादिना।३=

॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

एम०
२४

न संप्रसारणे। किं तर्हीति। संप्रसारणनिमित्तं पूर्वत्वं संप्रसारणशब्देनोपचारात् उच्यते। हलादिशेषापवाद इति। उत्सर्गसदेशस्याप्यपवादो भवतीति परत्वादेव संप्रसारणं भवतीति न पूर्वे

किं तर्हि संप्रसारणाश्रयं यत् प्राप्नोति तस्य प्रतिषेधं। ततः पूर्वत्वप्रतिषेधे यणादेशेन सिद्धं। यदप्युच्यते। अथापि पूर्वमभिनिर्वृत्तं परमप्यन
भिनिर्वृत्तमेव तत्र निमित्तं संप्रयोगानुपपन्न इति। तादर्थ्यात्ताच्छब्द्यं भविष्यति। तद्यथा इन्द्रार्था स्थूणा इन्द्र इति एवमिहापि संप्रसारणार्थं सं
=यणः१= प्रसारणं। तत्र यत् संप्रसारणार्थं संप्रसारणं। तस्मिन् प्रतिषेधो भविष्यति। अथ संप्रसारणमिति वर्तमाने पुनः प्रसारणग्रहणं किमर्थं। प्रसा
रणप्रकरणे पुनः प्रसारणग्रहणमतोऽन्यत्र प्रसारणप्रतिषेधार्थं। प्रसारणमिति वर्तमाने पुनः प्रसारणग्रहणं एतत्प्रयोजनं विशिष्टमपि यत् सं
प्रसारणं तस्यापि प्रतिषेधो यथा स्यात्। व्यथो लिटि। विव्यथे। नैतदस्ति प्रयोजनं। हलादिशेषापवादोऽत्र संप्रसारणं। इदं तर्हि श्वयुवमघो
नामतद्धिते। यूना यूने। उच्यमानेऽप्येतस्मिन्न सिध्यति। किं कारणं। उकारेणाव्यवधानात्। एकादेशे कृते नास्ति व्यवधानं। एकादेशः पूर्वविधौ स्था
निवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव। एवं तर्हि समानाङ्गग्रहणं च समानाङ्गग्रहणं च कर्तव्यं। न संप्रसारणे संप्रसारणं समानाङ्ग इति वक्त
व्यं। तत्रोपोषुषिदोषः। तत्रोपोषुषिदोषो भवति॥ ॥श्री॥ ॥

=नन्वेकादेशे कृते संप्रसारणपरत्वाभावात् कथं प्रतिषेधोऽत आह परं प्रतीति।१= =एवं तर्हीति। एवं च तत्सामर्थ्यान्निर्दिष्टयोरेव विकल्पपरिभाषोपस्थितिरिति भावः।२=

स्यादेकादेशे कृते इति। परं प्रत्यादिवद्भावात्॥ ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥७॥

उपोषुषे ति।उपपूर्वाद्वसेर्भाषायां सदवश्रुव इति क्वसादेशविधानाद्भूतसामान्ये लिडनुमीयते तस्य क्वसुर्वेचि स्वपी ति संप्रसारणं द्विर्वचनमकः सवर्णे दीर्घः।वस्वेकाजा
द्घसामिती ट्शासि वसीति षत्वं तृतीयैकवचने वसोः संप्रसारणमिति संप्रसारणं [redacted] वलादि इडभावः।अत्र समानांगग्रहणाद्वचिस्वपीत्यस्य संप्रसारणस्य निषेध

तामावादि

उपोषुषा।उपोषुषे।उपोषुषि।नवायस्यांगस्य प्रसारणप्राप्तिस्तस्मिन् प्राप्ति प्रतिषेधात्।नवाएषदोषः।किं कारणं।यस्यांगस्य प्रसारण
प्राप्तिस्तस्मिन् द्वितीयायाप्राप्तिः सा प्रतिषिध्यते।अत्र च वृत्तिः क्वसावंगं।क्वस्वंतं पुनर्विभक्तौ।अथ वा यस्यांगस्य प्रसारणप्राप्तिरित्यने
न किं क्रियते।यावद्ब्रूयात्तस्य क्वसानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्याकर्तुमिति।अत्र च यदा वसेः न तदा क्वसोः अभिनिर्वृ परान्वकासोः
त्ते तदा वसेर्भवति।अथ वा यस्यांगस्य प्रसारणप्राप्तिरित्यनेन किं क्रियते यावत् ब्रूयादसिद्धं बहिरंगमंतरंगा इति।असिद्धत्वाद्बहिरंगल
क्षणस्य वसुसंप्रसारणस्यांतरंगलक्षणः प्रतिषेधो न भविष्यति।ऋचित्रेरुत्तरपदादिलोपः छंदसि।ऋचि त्रेः संप्रसारणं कर्तव्यं।उत्तरप
दादिलोपः छंदसि वक्तव्यः।तचं सूक्तं।तचं साम।छंदसीति किं।त्र्यचानि।रयेर्मतौ बहुलं।रयेर्मतौ संप्रसारणं बहुलं वक्तव्यं।आरेवा
नेतुनो विशः।न च भवति रयिमान् पुष्टिवर्द्धनः।कक्ष्यायाः संज्ञायां।कक्ष्यायाः संज्ञायां मतौ संप्रसारणं कर्तव्यं।कक्षीवं तंय औशिजः।कएवः
= एकनिमित्तकांतरंगसंप्रसारणाभावस्य चरितार्थः।३ ((कक्षीवान्।संज्ञायामिति किं।मर्थो।कक्ष्यावान् हस्ती॥ ॥श्री॥ ॥ ॥
प्रसंगः तचमिति।तिस्र ऋचो स्मिन्निति समासः।ऋक्पूरब्धूरिति समासांतः।कक्ष्याया इति।आसंदीवद्रष्ठीवदित्यत्र कक्षीवच्छब्दस्य निपातनान्नवार्तिकं नारब्धव्यम्॥ ॥

वश्चास्यान्यतरस्यां। अन्यतरस्यां किति वेञ इति सूत्रं कर्त्तव्यं। न ह्यलिटीत्यनुवर्त्तनात् किति लिटि वेञः संप्रसारणविकल्पे सति अकिति लिटि ल्यपि चेति चकारेणालिटोऽनुकर्षणात् संप्रसारणनिषेधात्तवैष्टसिद्धिरिति भाष्यार्थः॥ ॥ इत्युपाध्यायजय्यटपुत्रकैय्यटकृते भाष्यप्रदीपे षष्ठस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्॥ ॥ छ॥ आदेच उपदेशेऽशि

= वश्चास्यान्यतरस्यां किति। वेञः। ल्यपि च इति सूत्रक्रमः। १२ = किलासरत्वादिति भावः। १२ द्विर्वचने ची निस्पानि वलादुकार... सवर्णदीर्घत्वं। १२

वश्चास्यान्यतरस्यां वश्चास्य ग्रहणं शक्यमकर्तुं। अन्यतरस्यां किति वेञः न संप्रसारणं भवतीत्येव सिद्धं। कथं प्रसारणोक्ते उवङादेशे च द्विर्वचने नास्ति वर्णा
दीर्घत्वे तेन सिद्धं ववतुः ववुः ऊवतुः ऊवुः वयेरपि नित्यं यकारस्य प्रतिषेधः संप्रसारणस्य ऊयतुः ऊयुः। नैश वक्तव्यं चेहसाध्यं। तच्चैवं सति सिद्धं भव
ति। यद्येवं ववौ व वि थेति न सिध्यति ल्यपि चेत्यनेन न चकारेणालिड् अनुकृष्यते। न स्मिन्नित्ये संप्रसारणप्रतिषेधे प्राप्ते किति विभाषा आरभ्यते
॥ ॥ ०॥ इति श्रीमत्पतंजलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्॥ ॥ आदेच उपदेशेऽशिति। क
थमिदं विज्ञायते। एज्य उपदेश इति आहोस्विदेजंतं यदुपदेश इति। किं चातः। यदि विज्ञायते एज्य उपदेश इति ह्वेञो कृता औ किता अत्रापि प्राप्नोति। अ
थ विज्ञायते एजंतं यदुपदेश इति न दोषो भवति। ननु चैजंतं यदुपदेश इत्यपि विज्ञायमाने अत्रापि प्राप्नोति॥ ॥ श्री॥ ॥

= ननु समुदायावयवयोरुपदिश्यमानत्वे ... इति विशेषणत्वाज्ञानेन ...

ति। कथमिदमिति। यदोपदेशशब्देन करणसाधनेन शास्त्रमुच्यते तदा विशेष्यस्यानुपादानादेव नास्तीत्यवं तद्विधिरित्ययं पक्षो भवति एज्य उपदेश इति। यदा तु कर्मसा
धन उपदेशशब्दः उपदिश्यमानार्थवाची षष्ठ्यर्थे च सप्तमी तदा उपदेशस्य विशेषणात्तदंतविधौ सत्ययं पक्षो भवति एजंतं यदुपदेश इति। समुदायस्य हि प्र
१४ तिः प्राधान्येनोपदिश्यते धातुसंज्ञाप्रयोगांतरीयकत्वेन त्ववयवः॥ ॥ श्री॥ ॥

एतदपीति। उपदेशो ह्ययमौ कारो भवति नांतरीयकत्वाद्व्ययवानमुपदेशादित्सुकत्वात्। अर्थवत्ते। यं शाद्वो ऽर्थे त्रांस्त स्यार्थो पादान परित्यागाभ्यां व्यपदेशिवद्भावो भवति बुद्ध्या नानात्वकल्पना घटेयायेती। एकाज्व्यपदेशः। लोके पि स्थूलशिरा इति शिरोमात्रस्य समुदायस्यार्थक्रियाकरणाद्विवक्षया व्यपदेशो भवति। नन्वर्थके

एतदपि हि व्यपदेशिवद्भावेनैजंतं भवत्युपदेशे। अर्थवता व्यपदेशिवद्भावः। ननु चैज्य उपदेश इत्यपि विज्ञायमानेन दोषो भवति। अशिंती त्युच्यते। न चात्राशितं पश्यामः। ननु च ककार एवात्राशित। नैकारे भवितव्यं। किं कारणं। न ह्यवयुक्तमन्यसदृशाधिकरणे तथाह्यर्थगतिः। न ह्यायुक्तमिवयुक्तं चान्यस्मिंस्तत्सदृशे कार्यं विज्ञायते तथाह्यर्थौ गम्यते लोके। अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशमानयंति ना सौ लोष्टमानीय कृती भवति। एवमिहापि शितिप्रतिषेधादन्यस्मिन्न शिति शित्सदृशे कार्यं विज्ञास्यते। किं चान्यदशिच्छित्सदृशं प्रत्ययः। इदं तर्हि सैस्थानीयं। वेन्नवानीयं। शोनिशानीयं। परत्वादायादयः प्राप्नुवंति। ननु चैजंतं य उपदेश इत्यपि विज्ञायमाने परत्वादायादयः प्राप्नुवंति। संतु आयादिषु कृतेषु स्थानिवद्भावादेज्ग्रहणेन ग्रहणात् पुनरात्वं भविष्यति। ननु चैज्य उपदेश इत्यपि विज्ञायमाने परत्वादायादिषु कृतेषु स्थानिवद्भावादेज्ग्रहणेन ग्रहणादात्वं भविष्यति। अपनल्विधौ स्थानिवद्भावः॥ ॥ श्री॥ ॥

छिन्नेदेवदत्तशिरसि स्थूलशिरा अयं देवदत्त इति व्यपदेशः प्रवर्तते। आद्यंतवदेकस्मिन्नित्यतिदेशोन प्रवर्त्तते ऽसहायत्वाभावादैकारस्य। इदं तर्ही ति। एज्य उपदेश इत्स एम०
स्मिन्पक्षे दोषो ऽद्भावनम्। परत्वादिति। पर्युदासपक्षे समानाश्रयत्वादात्वस्यापादीनां चानिमित्तत्वाच्चैतेषां विप्रतिषेधोपपत्तिः॥ ॥ श्री॥ ॥ २६

=तदंतविधिपक्षे तदस्य नाल्गीसादोषाभावादिति भावः। १=

=तस्येडभ्यत्रीरणेनाथावकुमर्याकत्वादिति भावः। अस्मात्तः कालोपलक्षितकालोपलक्षितग्रहणं कुसतितेपिका ₹= तस्मात्मिति। एवं शायादिषु कृते च सुपदेशे एजन्तमेवैतदुद्धमिति स्यादनित्यत्वोपयोगेऽत्रैनेति भावः। २=
= एहनिवकुंथकं ननु काकोऽ आतः कालोपलक्षितत्वमपि त्वसितितेकोकात्तत्र तदभावाद्‌ ३=

आत्विधिश्चायमिति। नन्वेजन्तं यदुपदेश इत्यत्रापि पक्षे आत्वमात्विधिरेव गुणभूतात्वाश्रयस्याप्यात्विधित्वेनाश्रयणात् तथा च पक्षे तस्याद्विर्भावः। नैतदस्ति। एजन्तस्यात्वं भवतीत्येवं विज्ञायमाने स्यादात्वमात्विधिर्यदा त्वेवं व्याख्यायते उपदेशे पदे एजन्तं तदन्तस्यात्वं भवतीति तदा त्वस्यात्विधित्वाभावः। एज्वुपदेशे तस्यात्वमित्यत्र तु पक्षे एचः स्थानित्वेनोपादानादात्वस्यात्विधित्वाद्यादिषु कृते सुस्थानिवत्वाभावाद्दशाप्तिः। नन्वादादिषु कृतेष्वल्लोपस्य स्थानित्वे कृते यद्यपि स्थानीयमित्यादि सिध्यति तथापि जग्लतुरित्यादि न सिध्यति। यकारस्यात्वे कृते पूर्वेण ग्लहे कादेः श्यः प्राप्नोतीत्यल्लोपश्च। तत्र यद्यपि वर्णाश्रयत्वादादेशो न रंगस्तथापि वर्णग्रहणं गं वलत्वदित्याकारलोपः प्राप्नोति। यथा ओ आ दूः प्रदूस्यादौ। नत्रा
श | को

=आगूर्वाहस्पतेरातश्चोपसर्गे इति के संप्रसारणे यथेकादेशः स्यात्तदा आतो लोपेन स्यात् दिलुवडिः रूपासिद्धिः प्रमाणं मितो

आत्विधिश्चायं। एवं तर्हि एजन्तं यदुपदेश इत्यपि विज्ञायमाने हूतः हूतवानित्यत्रापि प्राप्नोति। भवत्येवात्रात्वं। श्रवणं कस्मान्न भवति पूर्वत्वमस्य भवति। न सिध्यति। इदमिह संप्रधार्यमात्वं क्रियतां पूर्वत्वमिति। किमत्र कर्तव्यं। परत्वात्पूर्वत्वं। एवं तर्हीदमिह संप्रधार्यं आत्वं क्रियतां संप्रसारणमिति। किमत्र कर्तव्यं। परत्वादात्वं। नित्यं संप्रसारणं। कृते प्यात्वे प्राप्नोत्यकृतेऽपि। आत्वमपि नित्यं। कृतेऽपि संप्रसारणे प्राप्नोत्यकृतेऽपि आत्वं नित्यमात्वं। न हि कृते संप्रसारणे प्राप्नोति। किं कारणं। अन्तरंगं पूर्वत्वं। तेन बाध्यते यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यं। न च संप्रसारणमेवात्वस्य निमित्तं विहन्तिं। अथ वा शब्दपलक्षणान्तरं पूर्वत्वं प्रतीक्ष्यं। उभयोर्नित्ययोः परत्वादात्वे कृते संप्रसारणं। संप्रसारणे संप्रसारणपूर्वत्वं। कार्यकृतत्वात्पुनरात्वं न भविष्यति॥ ०

=परंत्वेसपिहर्ष्याक्तमनुसंधेयं २= =संप्रसारणपूर्वत्वमदीर्घेषु ~=

कारलोपस्य स्थानिवद्भावादिसिद्धवदत्राभादित्यसिद्धत्वाच्च पूर्वस्याकारलोपो न प्राप्नोति। एवं तर्हि वर्णग्रहणं गं वलवदिस नाश्रित्येदमुक्तं। अत एवात्र परिहारेऽसमाश्वासाद्दर्शितमिति ज्ञापकाद्यायादयः आत्वं न बाधन्त इति सिद्धान्तो भविष्यति। हूत इति। हूतः संप्रसारणादिषु कृते पूपदेश एजन्तत्वादुत्तरकालमसत्त्वप्येजन्तत्वे ल्लोपस्येति वचनाद्रकारस्यात्वप्रसंगः। भवत्येवेति। प्रागेव संप्रसारणादिति भावः। इतरस्तु पश्चादात्वमनेनोक्तमिति मत्वाह। श्रवणमिति॥ ॥ श्री॥ ॥श्री॥ ॥

अथापीति। यदियमस्तु क्ष्णां तरेसोतिना ष्यायन इति भावः। उपदेशग्रहणमिति। उपदेशग्रहणात्संप्रसारणादिपुक्ते ने ष्यात्वप्रसंगान्न कर्त्तव्यं। अप्रकृते चत
स्मिन्न्ने जंतस्यात्वं भवतीति सूत्रार्थाश्रयणात्वस्याल्विधित्वात्स्थानिवत्वाभावात्संप्रसारणादिपुक्तेष्व प्रसंगः। आत्स्यपि बाधेरन्निति। ततश्च ग्लायतीत्यादौ नांसि
द्धत्वादशितीति प्रतिषेधो नर्थकः स्यात्तस्मात्पूर्वविप्रतिषेधेनात्वं भवतीति ज्ञायते। नन्वशितीत्यस्यान्यत्र यो जनमस्ति घ्नतिस्पतीत्यादौ हलादावात्वं माभूत्। नै

×धोज्ञापको नायादय आर्द्धधातुके इति। आत्वएच्युपसंख्यानं। आत्व एच्युपसंख्यानं कर्त्तव्यं। जग्ले मम्ले। अशिती किमशिते ×६

अथापि कथं चिदात्वमनिसंस्यात्। एवमपि न दोषः। उपदेशग्रहणं न करिष्यते। यदि न क्रियते चेतास्तोतेस्यत्रापि प्राप्नोति। नैष दोषः। आचार्यप्र
वृत्तिर्ज्ञापयति। न परनिमित्तकस्यात्वं भवतीति। यदयं क्रीङ् जीनां णौ वात्वं शास्ति। नैतदस्ति ज्ञापकं। नियमार्थमेतत्स्यात् क्रीङ् जीनां णावेवे
ति। यत्तर्हि मीनातिमिनोतिदीङां ल्यपि चेत्यत्र नैनां ग्रहणमनुवर्त्तयति। इहतर्हि ग्लैस्नानीयं वेन्यानीयं। शो। निशानीयं। परत्वादायादयः प्रा
प्नुवंति। अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति नायादय आर्द्धधातुकेइति। यदयमशितीति प्रतिषेधं शास्ति। यदि हि बाधेरन्नात्स्यपि बाधेरन्न त
त्राशित्करणमनर्थकं स्यात्। अथवा पुनरस्त्वेज्य उपदेश इति। ननु चोक्तं [redacted] ग्लै। ग्लानीयं। वेन्यानीयं। शो। निशानीयं। परत्वादाया
दयः प्राप्नुवंति। अत्रापि शिष्यति पैधः प्राप्नोति। नैष दोषः। नैवं विज्ञायते शकारइत् यस्य सोयं शित् न शित् अशित् । अशितीति। कथं तर्हि श
कारइत् तच्छित् न शित् अशित् अशितीति। यद्येवं स्तनंधय इत्यत्रापि प्राप्नोति॥ ॥श्री॥ ॥श्री॥

तदस्ति। आतः अपनीत्याकारलोपविधानात्वं [redacted] स्य निन भवतीति ज्ञायते। घाकारइदिति। तन्नेता शकारेण प्रत्ययस्यापि पाघ्रस्मिन्विधिस्तदा एम०
दाव ल्ग्रहहणइति पी। भाषो प्रत्याख्यानात्शित्त्वबालनिषेधादेशपात्वं भवत्येव। यद्येवं स्तनंधय इति। विकरणे तद्रूपे विशेषाभावात्प्रयोजनाभावान्न भवतीति मन्यते॥ ॥ २७

=यद्यप्यप्रत्ययं शादिः। शिदस्ति तथाप्येजंतान्नियतः प्रत्ययस्यैव संभवइतिभावः। २=

=एजंतानां मीनात्यादीनामात्वमि=
=त्येवमनेनैवाप्येतत्सिद्धं यदयं सूत्र=
=दर्यज्ञापकमितिभावः। ३=

= ननेकारेणविग्रहएवकिमित्यत्वमाविर्नो घनेज्ञायतीत्यादावविलकारे उपितात्वमोषरतमाहः आवस्यापामेवेति ३ = नित्यत्वेति आत्वंतुनेपुक्तेतुनित्यत्वात् अपःभासा नित्यं प्रकृतिमत्यपोमेपाश्रयत्वाद्बहिरंगं ४ =

अत्रापि शवितिः आत्वनिवृत्तिरेवुशयः प्रयोजनं। किंपुनरिति। तत्र पर्युदासे एकवाक्यत्वं उत्तरपदार्थेन नञः संबंधात्समर्थे [redacted] समासः। उत्तरपदार्थे सदृशं वस्त्वंतरं समासार्थः प्रसज्यप्रतिषेधे तु [redacted] विधिनिषेधलक्षणार्थद्वयविधानाद्वाक्यभेदो नञः क्रियया संबंधादसमर्थसमासः। सचाकर्त्तरिचकारकइति कारकग्रहणेननज्ञापितः। ग्लायंतीति। लोवस्थायामेवात्क्ङितेपुनिवार्दिष्वात्वंनप्रवर्त्ततेस्मै प्रभृतीनामेजंतानामुपदेशसामर्थ्याद्दर्शितंतीतिवचनसामर्थ्याद्वा। पाघ्राध्माधेट्दृशः इत्येषां शितीतिवचनस्यावकाशइति चेत् नैकमुदाहरणमशिद्गुहणं प्रयोजयति। अन्यथा शइतिब्रूयात्। अथवानित्यत्वात्प्रागंतरंगत्वात् प्रवृत्तिर्वा स्यात् भवति। तेषु क्ङितेषु नित्य

अत्रापि शपि शिद्ग्रहणे वृत्तिः किं पुनरयं पर्युदासः पदन्यच्छितइति। आहोस्वित्प्रसज्यायं प्रतिषेधः शितिनेति। कस्मात्रविशेषः अशितिसेकारेशे प्रतिषेध आदित्वात्। अशितिसेकारेशे प्रतिषेधो वक्तव्यः ग्लायं तिः म्लायंति। किंकारणं। आदित्वात्। शिदशितोरेकादेशः शितआदिवत्स्यात् अस्त्यन्यच्छित इतिकृत्वा आत्वंप्राप्नोति। प्रत्ययविधिश्च न सिध्यति। सुग्लः। आकारांतलक्षणप्रत्ययविधिर्नप्राप्नोति। अनिष्टप्रत्यये वृच्छिते आत्वं। अनिष्टस्य प्रत्ययस्य श्रवणं प्रसज्येत। अभ्यासरूपं च। अभ्यासरूपं च न सिध्यति। जग्ले। मम्ले। इवर्णाभ्यासता प्राप्नोति। अयवायाप्रतिषेधश्च। अयवायावा च प्रतिषेधो वक्तव्यः। ग्लै ग्लानीयं। म्लै म्लानीयं। शोनिशानीयं। वेञ्। वानीयं। परत्वादयादयः प्राप्नुवंति। अस्तु तर्हि प्रसज्यप्रतिषेधः शितिनेति शितिप्रतिषेधे श्लुलुकोरुपसंख्यानं रीध्वं पिपीतेत्याद्यं। शितिप्रतिषेधे श्लुलुकोरुपसंख्यानं कर्त्तव्यं। रिवोनोदृशिंम स्त्रेरीध्वमिति॥ ॥ ०

लाक्षब्रुवतिः ततोकारयोः पररूपएकादेशे कृते तस्य परं प्रत्यादिवद्भावादात्वप्रसंगः। जग्ले इति। एशिपरतआत्वं तस्यद्विर्वचने चीतिमस्ला निवद्भावान्ग्लै शब्दस्य द्विर्वचने ह्रस्वत्वे चाभ्यासइवर्णो नतास्यात्। रीध्वमिति। रैशब्द इत्यस्माल्लोटोध्वसये नात्मनेपदं ध्वंशपो बहुलंछंदसीति श्लुस्तत्र प्रसज्यप्रतिषेध आत्वंनप्राप्नोति शावाश्रयप्रतिषेधप्रसंगात्। पर्युदासेतु ध्वमाश्रयमात्वं भवति श्लौद्विर्वचनं। ईहल्यघोरितीत्वं। शिशीतइति। श्यतेर्लोट्यात्मनेपदे श्यः श्वतस्य श्लुः। तस्य द्विर्वचनमभ्यासस्य बहुलंछंदसीतीत्वं॥ ई
हल्यघोरितीत्वं॥ त्राध्वमिति। त्रैङ् लोट् ध्वंशपोबहुलंछंदसीतिलुक्॥ ॥श्री॥ ॥

क्षपत्यर्थे इति। वृषभः शृंगे तीक्ष्णी करोति रक्षसे रक्षोऽर्थं वि निक्षे विनिपातनायेत्यर्थः। त्राध्वमिति। लोड्यर्थे व्यत्ययेन लुङ्। ध्वं धि चेति सलोपः। बहुलं छन्दस्यमाङ्योगेऽपी
ति अडभावः। परस्यमिति। आत्वभाविन एजन्ताद्दाकारान्तनिमित्तकः। प्रत्ययो ज्ञाप्यते सर्वो ह्वावामश्चेत्यस्य पुनः। प्रत्याख्यायत इति। द्विर्वचनेऽचीत्यपं योगः पूर्ववि

त्राध्वं नो देवा निजुरो वृकस्य। शिशीते शृंगे रक्षसे विनिक्षे। नैष दोषः। इहतावद्विवो नो वृष्टिं मरुतो ररीध्वमिति। नैतद्दैङ्‌इत्यस्य रूपं। कस्य तर्हि
रातेर्दानकर्मणः। शिशीते शृंगे इति। नैतत् क्षपते रूपं। कस्य तर्हि शीङः। क्षपत्यर्थो वै गम्यते। कः पुनः क्षपतेरर्थः। क्षपतिर्निशाने वर्त्तते। शीङपि
क्षपत्यर्थे वर्त्तते। कथं पुनरन्यो नामान्यस्यार्थे वर्त्तते। बह्वर्था अपि धातवो भवन्ति। तद्यथा। वपिः प्रकिरणे दृष्टः छेदने चापि वर्त्तते। केशान्वप
तीति। ईडिस्तुतिचोदनायाच्ञास्वदृष्टः प्रेरणे चापि वर्तते॥ अग्निर्वा इतो वृष्टिमीट्टे मरुतो मुतश्च्यावयन्ति। करोतिरभूतप्रादुर्भावे दृष्टो निर्म
लीकरणे चापि वर्त्तते। पृष्ठं कुरु पादौ कुरु उन्मृदानेति गम्यते। निक्षेपणे चापि वर्त्तते। घटे कुरु कटे कुरु। अश्मानमितः कुरु स्थापयेति गम्यते। स
र्वेषामेष परिहारो शिशीत्युच्यते। न चात्र शितं पश्यामः। प्रत्ययलक्षणेन। न लुमताऽतस्मिन्निति प्रत्ययलक्षणप्रतिषेधः। त्राध्वमिति। लुङो व्यत्ययेन
भविष्यति। अथ वा पुनरस्तु पर्युदासः। ननु चोक्तम श्नित्येकादेशे प्रतिषेध आदिवत्त्वादिति। नैष दोषः। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्था
निवद्भावाद्व्यवधानं। यदपि प्रत्ययविधिरिति। आचार्यप्रवृत्तिर्ज्ञापयति। भवत्येजन्तेभ्य आकारान्तलक्षणः प्रत्ययविधिरिति॥ परस्यं ह्वावा
मश्चेत्यस्य णं कबाधनार्थं शास्ति। यदप्यभ्यासरूपमिति। प्रत्याख्यायते सयोगः। अथापि क्रियते। एवमपि न दोषः कथं। लिटीत्यनुवर्त्तते॥ ०॥

प्रतिषेधाश्रयेण प्रत्याख्यायते। तत्प्रत्याख्यानात्स्थानिवत्त्वाभावः॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

=पाद्मभेदेन संबंधः। अधिसात्वं लिङ्गुनकारादा बिनिः १=

द्विलकार इति। लिटि वयो य इत्यत्र द्विलकारकोनिर्द्दिष्टस्तत्र च द्वितीयस्य लकारस्य प्रयोजनाभावादिहार्थत्वं विज्ञायते। लोवस्थायामेव लिड्ग्रहणं न तु जाताविति सूत्रानिवृत्ताभावाज्जुस्त्व इत्यादि सिध्यति। प्रातिपदिकप्रतिषेध इति। उणादीनां व्युत्पत्तिपक्षे गमेर्डोस्तानुदिभ्यां डौ इत्यादावुपदेशे भवत्ययमेच् एजन्तो वा ऽर्थवत्त्वाद्यपदे शिवज्ञावादिति भावः। अमिहद्धिबाधनार्थमिति। गां पश्येत्यत्र गोतो णिदित्वेऽद्दृद्धिप्रसंगात्। गाः पश्येत्यत्राशितीत्यात्वाप्रसंगः। उद्देशस्त्वेति। उणादयो व्युत्पन्नानि प्रातिपदिकानीति भावः।

णिदिति

र्वसवर्णदीर्घः अपि पूर्वत्वं चोच्यते न प्रथमयोः पूर्वसवर्ण इत्येव सिद्धं। न सिध्यति प्रथमयोः पूर्वसवर्ण इत्युच्यमानेऽप्यपि दीर्घः प्राप्नोति वृक्षं ह्रस्वं नैष
दोषः। यत्पूर्वस्मिन्योगे दीर्घग्रहणं तदुत्तरत्र निवृत्तं। एवमपि इदमिहपूर्वसवर्णं क्रियते तेनाप्यपि पूर्वसवर्णः प्रसज्येत। वृक्षं ह्रस्वं। द्विमात्रः प्राप्नो
ति। नैष दोषः। सवर्णग्रहणं न करिष्यते। यदि सवर्णग्रहणं न क्रियते। कुतो व्यवस्था। आन्तर्यतः यद्येवमग्नी वायू त्रिमात्रः प्राप्नोति वृक्षं ह्रस्वं द्विमा
त्रः प्राप्नोति। तस्मात्सवर्णग्रहणं कर्त्तव्यं तस्मिंश्च क्रियमाणे दीर्घग्रहणमनुवर्त्यं। तस्मिन्ननुवर्त्तमाने अमि पूर्व इत्यपि वक्तव्यं। अथ किमर्थं पृथगुच्य
ते [redacted] ने है वो च्छेत प्रथमयोः पूर्वसवर्णः अमि चेति। यदि प्रथमयोः पूर्वसवर्णो दीर्घो भवति अमि चेत्युच्यते तेनाप्यपि दीर्घः प्रसज्येत व

इत्यादौ दीर्घ एवेति व्यवस्था न सिध्यति। तथा हि यदि पूर्वो व्यक्तिरभिप्रेयते तदा अग्नी इत्यादावपि ह्रस्वप्रसंगः। अथ पूर्वाकृतिराश्रीयते तदाग्नि [redacted]
मित्यादावपि दीर्घप्रसंग इति भावः। आन्तर्यत इति। पूर्वाकृतिराश्रीयते प्लुतस्य विषयेऽस्यत इति प्लुतो न भविष्यति दीर्घश्च भविष्यती
ति मन्यते। त्रिमात्रः प्राप्नोतीति। प्लुता प्लुतप्रसंगे प्लुतस्य विषयेऽस्यत इत्युच्यते इह तु प्लुतस्यैव प्रसंग इति भावः। तस्मादिति। यस्मात्पूर्वाकृतिपक्षे पूर्वव्यक्तिपक्षे
९ च दोषः तस्मादित्यर्थः। अमि चेति। पुनः पूर्वग्रहणं न कर्त्तव्यं भवतीति भावः॥ ॥ ॥

भा॰कै॰ ६ दीर्घग्रहणमपि तिं। अमि चेत्सवर्णे इति भाष्यकारः। एवमपीति। ततश्च कुमारीमित्यादौ त्रिमात्रप्रसंगः। पूर्वेस्मिन्योग इति। पूर्वे व्यक्त्याश्रयेन ग्रामी इत्यादौ पूर्वे व्यक्तिर्नैदीर्घैति विप्रतिषिद्धं
५५ स्यात्। पूर्वो दीर्घ इत्यात्मत्वस्याश्रयेत्तत्र एवदोषः प्रथमयोः पूर्वे इत्यत्रानुवृत्त्या पूर्वो हृतिराश्रयिष्यते। अमि चेत्सवर्णे तु दीर्घग्रहणं निवसाव्यक्तिरितिदुर्लभमेतत्। तस्मा
दुभयमिति। अयउभयत्रिन्नप्रयत्नेन प्रथमयोः पूर्वसवर्णे इत्यत्र सवर्णाग्रहणं किमर्थं कृतं यावता दीर्घानुवृत्त्या पूर्वो हृतिराश्रयिष्यते। नैतदस्ति। व्यक्तिपक्ष
स्यापि संभवाद् ग्रामी इत्यादौ विरोधाशंका स्यात्। वृक्षौ इति। अत्राकुणः प्राप्तः ततो दीर्घः। ततः परत्वात् पूर्वसवर्णदीर्घः ततः पररूपप्रसंगः। आद्गुण इति। तत्र कृत्वा

=व्यक्तिर्नदीर्घेत्येवं रूपाविरोधाशंका॰ १ = आकृत्यर्थकस्यपूर्वग्रहणस्यैवाभिप्रायेणात्यानुवृत्तेर्नात इत्या कुमारीमित्यादौ पूर्वजातीयत्रिमात्र एव स्यादित्यर्थः॥ ३ =

दीर्घग्रहणं निवर्तयिष्यते। एवमपि पूर्वसवर्णः प्रसज्येत। सवर्णाग्रहणं न करिष्यते। यदि सवर्णग्रहणं न क्रियते। पूर्वेस्मिन्योगे विप्रतिषिद्धं। यदि
ख २ पूर्वो न दीर्घः। अथ दीर्घो न पूर्वः। पूर्वो दीर्घश्चेति विप्रतिषिद्धं। तस्मादुभयमारब्धव्यं। पृथक् वक्तव्यं। प्रथमयोरिति योगविभागः सवर्णदीर्घार्थः प्र
थमयोरिति योगविभागः कर्तव्यः। प्रथमयोरकः सवर्णे दीर्घो भवति ततः पूर्वसवर्णः। पूर्वसवर्णदीर्घो भवत्यकः प्रथमयोरिति। किमर्थो योग
विभागः सवर्णदीर्घार्थः सवर्णदीर्घत्वं यथा स्यात्। वृक्षाः प्लक्षाः। वृक्षान्। प्लक्षान्। एकयोगे हि जश्शसोः पररूपं प्रसज्येत वृक्षाः प्लक्षाः। वृक्षा =
न्। प्लक्षान्। ननु च पूर्वसवर्णदीर्घत्वं पररूपं बाधिष्यते नोत्सहते बाधितुं। किं कारणं। आद्गुणयणादेशयोर्वाद्धावृद्धिसवर्णदीर्घपूर्वसवर्णादे
शांनेषां पररूपं स्वरसंधिषु। आद्गुणयणादेशावुत्सर्गौ। तयोरपवादा वृद्धिसवर्णदीर्घपूर्वसवर्णादेशाः। तेषां सर्वेषां पररूपमपवादः। त =
त्सर्वबाधकं सर्वबाधकत्वात् प्राप्नोति। अथ क्रियमाणेपि योगविभागे यावता पररूपमपवादः कस्मादेव न बाधते। योगविभागेऽन्यशास्त्रनिवृत्त

इयोर्द्वितीयकक्ष्याप्राप्ताः पररूपं तु तृतीयकक्ष्याप्राप्तमिति भावः। अथ क्रियमाणेपीति। यथा वृक्षा इत्यादौ योगविभागे न पररूपं पचंतीत्यादौ सावकाशं बाध्यते तथा
गिं वायुमित्यादौ सावकाशममि पूर्वत्वं वृक्षमित्यादौ बाध्येत। अथापि पूर्वत्वं न बाध्यते पररूपमेव बाध्यत इत्युच्यते तदा सविभागस्य कारणं वाच्यमिति भावः। अथ रामं॰
वाऽयमभिप्रायो यदि पररूपं सवर्णदीर्घस्येव पूर्वसवर्णस्यापि बाधकं ततो योगविभागेपि क्रियमाणे बाधकं स्यादिति॥ ॥ ॥ ५५

योगविभाग इति। चतुर्थे रक्षा प्राप्तत्वाद्योगविभागः पररूपस्य बाधक इत्यर्थः। नत्वस्येति। तस्माच्छसो नः पुंसीत्यत्र तच्छब्देनानंतरस्य पूर्वसवर्णे इत्यनेन विहितस्य परामर्शात् गिरीन् वायून् इत्यादावेव [illegible] नत्वं स्यात्। ननु वृक्षानित्यादौ प्रथमयोरिति योगविभागेन दीर्घे विधीयमान इत्यर्थः। एतच्च भेदेन लक्षणयोरपेक्षामाश्रित्य चोदितं। यत्रोच्यते अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति यदा तु सूत्रद्वयसमुदायमेकरूपा बुद्ध्यापेक्ष्य तस्मादिति परामर्शः क्रियते तदा नास्ति दोषः यत्रोच्यते उभयं

योगविभागोऽन्यशास्त्रनिवृत्त्यर्थो विज्ञायते योगविभागोऽन्यशास्त्रनिवृत्त्यर्थश्चेदन्यातिप्रसंगः। योगविभागोऽन्यशास्त्रनिवृत्त्यर्थश्चेत् अन्यातिप्र
संगो भवति। वृक्षं प्लक्षं। यथैव हि योगविभागः पररूपं बाधते एवममिपूर्वत्वमपि बाधेत। नकाराभावश्च तस्मादित्यनंतरनिर्देशात्। नत्वस्य चाभा
वः। वृक्षान् प्लक्षान्। किं कारणं तस्मादित्यनंतरनिर्देशात्। तस्मादित्यनेनानंतरो योगः प्रतिनिर्दिश्यते। प्रथमयोः पूर्वसवर्णः। तस्माच्छसो नः पुंसि
किं पुनः कारणं तस्मादित्यनंतरो योगो निर्दिश्यते इह मा भूत्। एतान् गाश्चतुरो वली वर्दान् पश्येति। अस्तु तर्ह्येकयोग एव। ननु चोक्तमेकयोगे हि जश्शा
सोः पररूपप्रसंग इति। नैष दोषः। इजग्रहणं तु ज्ञापकं पररूपाभावस्य। यदयं नादिचीतीजग्रहणं करोति तज्ज्ञापयत्याचार्यो न जश्शसोः पररूपं भवतीति
। कथं कृत्वा ज्ञापकं। इजग्रहणस्यैतत्प्रयोजनं। इह मा भूत्। वृक्षाः प्लक्षाः वृक्षान् प्लक्षान्। यदि च जश्शसोः पररूपं स्यात् इजग्रहणमनर्थकं
स्यात्। पश्यति त्वाचार्यो न जश्शसोः पररूपं भवतीति ततः इजग्रहणं करोति। नैतदस्ति ज्ञापकं। उत्तरार्थमेतत्स्याद्दीर्घाज्जसि चेति। यद्युत्तरार्थमेतत्
९ त्स्यात्तत्रैवायमिजग्रहणं कुर्वीत॥ ॥ ॥

निरनंतरपेक्षिष्यामह इति। एतान्गा इति। औतोम्शसोरित्याकार एकादेशः। इजग्रहणं त्विति। दिजश्शसोः पररूपं स्यात्तदानादिसेव ब्रूयादित्येव पूर्वसव
र्णदीर्घप्रसंगात् अपि पूर्ववत्त्वाच्च प्रतिषेधस्येति भावः। उत्तरार्थमिति। कुमार्यौ वध्वौ इत्यादौ पूर्वसवर्णदीर्घप्रतिषेधार्थमित्यर्थः। यद्युत्तरार्थमिति। एवं स
ति पृथग्विभक्त्यनुच्चारणाच्च कारकरणाच्च दीर्घाज्जसि चेति लाघवं भवति॥ ॥ ॥ ॥

भा०कै० ६ इहापीति। सर्वत्रैव लाघवं प्रसन्नादाविहापि क्रियमाणस्य इग्ग्रहणस्योत्तरार्थेन यापि प्रयोजनवत्त्वात् ज्ञापकत्वाभाव इत्यर्थः। दीर्घो ज्झसीति। दीर्घादिज्झसोरित्यस्माद् अपि
५६ लघुतरोऽयं सूत्रन्यास इति भावः। तस्मादिग्ग्रहणं नोत्तरार्थमेव क्रियते किं त्विहार्थमपीति ज्ञापकमेवेत्यर्थः। अमि प उक्तमिति। प्रथमयोरिति योगविभागेन दीर्घे

=किंचिल्लाघवं प्रतिकिंचिन्नादरः प्रकृष्टेनुगाघवेतदनादरो नोचितः। यद्वक्ष्यति लघुतर इति॰२=

इहापि क्रियमाणं यद्युत्तरार्थं न ज्ञापकं भवति। एवं तर्हि यद्युत्तरार्थमेतत्स्यात् नैवायमिग्ग्रहणं कुर्वीत नापि जस्ग्रहणं कुर्वीत एतावदयं
ब्रूयात्। दीर्घो ज्झसि पूर्वसवर्णो भवतीति तन्नियमार्थं भविष्यति। दीर्घात् शस्येव नान्यत्रेति सोऽयमेवं लघीयसा न्यासेन सिद्धे यदिग्ग्रहणं करो
ति तत् ज्ञापयत्याचार्यः न जसि शसोः पररूपं भवतीति। अथवा पुनरस्तु योगविभागः ननु चोक्तं योगविभागेऽन्यशास्त्रनिवृत्त्यर्थश्चे
दम्पूर्तिप्रसंग इति। नैष दोषः। अम्यपि योगविभागः करिष्यते। अमि यउक्तं तन्न भवतीति। ततः पूर्वः। पूर्वश्च भवत्यमीति। यद्यप्युच्यते न
काभावश्च तस्मादिसनंतरनिर्देशादिति। कः पुनरर्हेति तस्मादित्यनेनानंतरं योगं प्रतिनिर्देष्टुं। एवं किल प्रतिनिर्दिश्येत तस्मात्सर्वेसवर्णो दी
र्घादिति तच्च न। एवं प्रतिनिर्दिश्यते। तस्मादकोदीर्घादिति॥ अथवा तस्मात्प्रथमयोर्दीर्घादिति। अथवा पुनरस्तु अम्येकयोगः। ननु चोक्तं यो
गविभागेऽन्यशास्त्रनिवृत्त्यर्थश्चेदम्पूर्तिप्रसंग इति। नैष दोषः। मध्येऽपवादाः पूर्वान्विधीन्बाधंत इत्येवमपं योगविभागः पररूपं बाधिष्यते
न अमि पूर्वत्वं न बाधिष्यते॥ ॥ ॥ ॥

त्वमित्यर्थः। तस्मादकोदीर्घादिति। एकया बुद्ध्या अकृत्स्ना निकृष्टिस्त्री विहितो दीर्घः परामृश्यत इत्यर्थः। अकः सवर्णे दीर्घ इत्यनेन विहितस्य दीर्घस्यानर्थकः परा राम०
मर्श इति मत्वाह। अथवेति। प्रथमयोरित्येवं यो विहितो दीर्घः परामृश्यत इति सूत्रद्वयविषयेन तत् सिद्ध्यति। मध्येऽपवादा इति। न्यायस्थायं ननु वचनं यद्वक्ष्यति [redacted] ५६

यद्येतदस्तीति। नहि वचनस्यासत्यां संभावनायां न्यायस्तु क्वचित्कश्चिदाश्रीयत इति युज्यते वक्तुं। यद्येतदस्तीति। यदा वा ध्यानि लक्षणानि मेदेनापेक्ष्यंते तदा क्रमव्यति
क्रमे हेतुभावात् पूर्वविज्ञातवाध्यविषयत्वाभावान्मध्येपवादा इति पुरस्तादपवादा इति चाश्रीयते। यदा तु लक्षणसमुदायो बाध्यत्वेनापेक्ष्यते तदा तस्यैकत्वान्नास्त्येवैतन्म
ध्येपवादा इति पुरस्तादपवादा इति चा॰ अथवा सप्तम इति। इ॰ क्षा॰ जस इति स्थिते पूर्वसवर्णदीर्घविधानात्परत्वाभावाज्जसः सवर्णदीर्घः। शसि तु प्रथमयोः पूर्वसवर्ण

यद्येतदस्ति मध्येऽपवादाः पुरस्तादपवादा इति नार्थ एकेनापि योगविभागेन पुरस्तादपवादाऽनंतरान्विधीन्बाधंत इत्येवं पररूपमकः सवर्णदी
र्घत्वं बाधिष्यते। प्रथमयोः पूर्वसवर्णदीर्घत्वं [redacted] न बाधिष्यते। अथवा सप्तमे योगविभागः करिष्यते। इदमस्ति। अतो
दीर्घो यञि सुपि चेति। ततो वक्ष्यामि बहुवचने। बहुवचने चाऽतो दीर्घो [redacted] भवतीति ततो ह्रस्वेत्। ए
कारश्च भवति बहुवचने झल्यीति। इहापि तर्हि प्राप्नोति वृक्षाणां प्लक्षाणां। तत्र को दोषः। दीर्घत्वे कृते ह्रस्वाश्रयो नुट् न प्राप्नोति। इदमिह संप्रधार्यं दीर्घ
त्वं क्रियतां नुडिति। किमत्र कर्तव्यं। परत्वाद्दीर्घत्वं। नित्यं खल्वपि दीर्घत्वं कृते पि नुट् प्राप्नोत्यकृते पि नित्यत्वात्परत्वाच्च दीर्घत्वे कृते ह्रस्वाश्रयो नुट् न
प्राप्नोति। एवं तर्ह्योत्तरंगादृत्वमिहापि प्रकृतमनुवर्तते। कथं प्रकृतं अपाञ्जसेरसुक्तेन कृते पि दीर्घत्वे नुट् भविष्यति। इहापि तर्हि प्राप्नोति। कीलालपा
मुपंयां। आतो लोप इत्यवाधको भविष्यति। इदमिह संप्रधार्यं। लोपः क्रियतां नुडिति किमत्र कर्तव्यं परत्वान्नुट्। एवं तर्हि ह्रस्वनद्यापो नुडिस्यत्रातो धा
तोरित्यातो लोपः संबंधमनुवर्तिष्यते। इहापि तर्हि प्राप्नोति॥ कीलालपानां ब्राह्मणकुलानां। नपुंसकस्यत्येस्यानुवर्तिष्यते। तस्मात्॥ ॥

इति। एवं तर्हीति। ऽकारेण चाणत्वादाकारो गृह्यते। कीलालपानामिति। ह्रस्वो नपुंसक इति ह्रस्वत्वे बहुवचन इति दीर्घत्वे कृते ऽतो धातोरित्यधिकारात्लोपप्रसंगः। न
पुंसकस्यनेति। ह्रस्वनद्यापो नुडिस्यत्र सूत्रे स्वमोर्नपुंसकादित्यतो नपुंसकग्रहणं नेतराऽछंदसीत्यतो नेति चानुवर्तते। आतो धातोर्लोप इति च ततो नपुंसकस्यातो धातो
र्लोपाभावेनुटेव भविष्यतीत्यर्थः॥ तस्मात्॥

=एवं वा बहुवचनं न कार्यमिति लाघवं नचैवमाकारांतानुसन्नकारादेशाभिन्नगदौः। तेषामननिधानात्। आगमस्य योगविभागेन प्रत्यांतरेकथातत्र सत्यानत्रलोपकाल्पनाचान्यपक्षांतरेहितत्रनुङमेतं वर्णदीर्घेणसामिसाध्यकल्पं समितमितिभावः॥=

भा० कै० ६ किमिदमिति। पुंसीति किं। शास्त्रे विशेषणं पुंवद्भावे यः शब्दः स तत्र इति। अथ प्रकृतेः पुंशब्दाद्यः शास्त्रीति प्रत्ययः। भ्रुकुंसाद्यपेक्षेति। स्त्रीनदेशसंबंधात् स्त्रीप्रतिमासंभ्रुकुंसाद्यर्थस्य
५७ मन्यते। षण्ढानिति। षंढशब्दे न प्रसवासमर्थस्य नपुंसकस्याभिधानं। चंचाइति। चंचेव चंचा इवेप्रतिकृतौ संज्ञायामिति कन्। लुम्मनुष्ये इति लुप्। चंचाशब्देन पुंसोऽभिधा
नान्नत्वप्रसंगः। स्थूरानिति। स्थूराया अपत्यानि गर्गादिभ्यो यञ् यञञोश्चेति लुक्। लुक्तद्धितलुकीति टापो लुक्। ततः स्थूराशब्दस्य स्त्रीलिंगत्वान्नत्वप्रसंगः। कुंडि
नानिति। कुंडिन्या अपत्यानि गर्गादिभ्यो यञ्। आगस्त्यकौंडिन्ययोरगस्तिकुंडिनजिति यञो लुक्। कुंडिनीशब्दस्य कुंडिनजादेशः स च स्त्रीलिंगादेशत्वात् स्त्रीशब्दः।

नि०

=यत्किंचिदन्तवक्तव्येदमर्थः।१८= वस्तुतः स्त्रीत्वाभावे प्यारोपितस्त्रीत्वाश्रयेण अदोषो भावनंदस्थाः स्तने सादि०४=

किमिदं नत्वं पुंसां बहुत्वे भवति आहोस्वित्पुंशब्दाद्बहुषु। कश्चात्र विशेषः। नत्वं पुंसां बहुत्वे चेत्पुंशब्दादिष्यते त्रियां। तन्न सिध्यति। भ्रुकुंसा
न्यपेक्षेति। नपुंसके नत्वं वक्तव्यं न सिध्यति। षंढान्यपेक्षेति। स्त्रीशब्दाच्च प्रसज्यते। स्त्रीशब्दाच्च प्राप्नोति। चंचाः पश्यैव भ्रिकाः प
श्य खरकुटीः पश्य। अस्तु तर्हि पुंशब्दाद्बहुषु। पुंशब्दादिति चेदिष्टं स्थूरापत्ये न सिध्यति। स्थूरा न्यपेक्षेति। कुंडिन्या अररकाया अपत्ये च न
सिध्यति। कुंडिनान्यपेक्ष अररकान्यपेक्ष पुंस्प्राधान्यात्सिध्यति। पुंस्प्राधान्या एते शब्दाः। ततो नत्वं भविष्यति। पुंस्प्राधान्येन एव सत्युर्ये दोषाः
पूर्वं चोदिताः भ्रुकुंसान्पश्य षंढान्पश्य चंचाः पश्यैव भ्रिकाः पश्य खरकुटीः पश्येति। तस्माद्यस्मिन्पक्षे अस्त्वीयांसो दोषाः ॥

अररकायाः पूर्वं च चारिदि। तस्माद्यस्मिन्निति। अर्थपक्षं परित्यज्याश्रयिष्यति। द्वयोरपि तु पक्षयोर्दोषाभावः। तथा हि पुंवाची शब्दः पुंशब्द उच्यते ततो भ्रुकुंसादयः श
ब्दाः समाचक्षाणाः पुंशब्दा उच्यंत इति नानयोः पक्षयोः फलभेदः। षंढपंडकशब्दाभ्यामपि पुंस्त्वानुगत एव नपुंसकरूपोऽर्थ उच्यते। यथा नपुंसको भवतीति नपुंस
कशब्देन स्त्री सूत्रे हि न वैयाकरणैः शक्यते किं मा भूदात्मिसादिना [redacted] विशिष्टमेव लिंगलक्षणं भाष्यकारेणाश्रितं स्थूरादयोऽपि प्रसयत्नकृत पुंसिवच्चेमानाः

पुमां०२ लिंग०१ १ पुंशब्दा एव भवंति ॥ ॥ ॥ ॥ ॥ रा० प० ५७

=अर्थपक्षानिति। शास्त्रीयार्थपक्षमित्यर्थः। उभयोरपीति। शास्त्रीयलिंगग्रहणपक्षे पुंसां बहुत्वे पुंशब्दाद्बहुष्विति द्वयोः पक्षयोरित्यर्थः। तथा चायमत्राभिप्रायः। तस्मादिति। लौकिकलिंगग्रहणपक्षद्वयस्याविशेषप्रसक्तावस्य यस्मिन्पक्षे इति। शास्त्रीयलिंगग्रहणपक्षे अल्पीयांस

वध्रिकादिषु युक्तवदिति। लुपि युक्तवद्व्यक्तिवचने इति पुंसः स्त्रीत्वातिदेशान्न लाभ इत्यर्थः। अमि। वाछंदसी त्येवेति। एतच्च वाक्यमेदेन संबध्यते अन्यथा भाषायां
नस्यात्। शम्यं चेति। विकल्पविधानसामर्थ्यात् पूर्वत्वाभावे पूर्वसवर्णो दीर्घोपि न भवति तयोरन्त्रविशेषाभावादिति यणादेशा एव भवति। संप्रसमानांगग्रहणमिति। यदि

तमास्थाय प्रविधेयं देशेषु। नत्वं पुंसां व कुले चेत्तुशब्दादिष्यते स्त्रियां। नपुंसके तथैवेष्टं स्त्री शब्दाच्च प्रसज्यते। पुंशब्दादिति चेदिष्टं स्त्रीरूपसेन सिध्यति
। कुं डिन्याञ्चरस्याः पुंस्प्राधान्यात्प्रसिद्ध्यति। पुंस्प्राधान्येन तएव स्युर्ये दोषाः पूर्वचोदिताः॥ तस्मादर्थैर्भवेन्न त्वं वध्रिकादिषु युक्तवत्। अमि पूर्वः।
वा छंदसी सेव। यमी च यम्यं च शम्यं च। गौरी च गौर्यं च किशोरी च किशोर्यं च। संप्रसार। वा छंदसी त्येवं मित्रा व रुणौ यज्यमानः॥ मित्रा वरुणौ इज्यमा
नः॥ संप्रसारणात्परपूर्वत्वे समानांगग्रहणमसमानांगप्रतिषेधार्थं। संप्रसारणात्परपूर्वत्वे समानांगग्रहणं कर्तव्यं किं प्रयोजनं असमानां
गप्र [redacted] तिषेधार्थं असमानांगस्य मा भूदिति शकहूर्थं परिव्यर्थं। सिद्धमसंप्रसारणा तासिद्धमेतत्कथं असंप्रसारणा त्कथमसं
×शमीच×३ १ प्रसारणसंज्ञानवर्णस्य॥ ॥ ॥श्री ॥५॥ ॥

संप्रसारणांतस्माच्च परो जेकस्मिन्नंगे भवतः तदा पूर्वैकादेशो भवति नान्यथा। शकहूर्थमिति। अन्यस्मिन्नंगे संप्रसारणमन्यस्मिन्न जितिपूर्वैकादेशाभावः।
अत्रां तवद्भावेनोकारस्य संप्रसारणात्वं। सिद्धमिति। वाक्यस्य संप्रसारणसंज्ञायां वर्णस्य नास्ति संप्रसारणसंज्ञा। सतु संप्रसारणनिर्वर्त्तित्वात्संप्रसारणव्यपदे
१ शमोपचारिकं लभते। शकहूर्थमित्यादौ त्वेकादेशशास्त्रेण निर्वर्त्तित उकार इति नास्ति संप्रसारणव्यपदेशः॥ ॥

=मत्रकृत्वप्रत्यादिद्राघकाकाहूपत्साप्यतिदेशः।१=

भा० कै० ६ वर्णस्य चेति। यणां स्थाने यो वर्णः स संप्रसारणसंज्ञः एकादेशस्तु न यणः स्थानिकः। अंतवद्भावोपि नास्ति वर्णविधावंतादिवद्भावस्य निषेधात् अंतरंगत्वाच्च हल
५८ इति संप्रसारणदीर्घे कृते उकारस्य संप्रसारणसंज्ञाभावात् पूर्वैकादेशाभावः। संप्रसारणदीर्घे तु वचनसामर्थ्यादेकादेशः सांतवद्भावात् संप्रसारणव्यपदेशश्च
श्रीयतेनैकार्यकृतत्वाद्वेति यास्त्वस्मिन्विषये प्रवृत्तत्वात्तु नः प्रवृत्त्यभावः। युक्तं यत्तस्यैवेति। परांगमप्राधानं यत्तु मुख्यप्रतिपत्त्यर्थमिति पुनः क्रियमाणं

अथ वर्णस्य संप्रसारणसंज्ञायां दोषः स्वा। वर्णस्य च संप्रसारणसंज्ञायां न दोषः। कथं। अन्योन्यं संप्रसारणसंप्रसारणयोः स्थाने एकः आदिश्यते।
कार्यकृतत्वात्। अथवा सकृत्कृतं पूर्वत्वमिति कृत्वा पुनर्न भविष्यति। तद्यथा वसंते ब्राह्मणोऽग्नीनादधीतेति सकृदाधाय कृतः शास्त्रार्थ इति कृ
त्वा पुनः प्रवृत्तिर्न भवति। विषम उपन्यासः। युक्तं यत्तस्यैव पुनः प्रवृत्तिर्न भवति। यत्तु तदाश्रयं प्राप्नोति न तच्छक्यं बाधितुं। तद्यथा वसंते ब्रा
ह्मणोऽग्निष्टोमादिभिः क्रतुभिर्यजेतेति। अप्राधान्यनिमित्तं वसंते वसंते इज्यते तस्मात्पूर्वोक्त एव परिहारः सिद्धमसंप्रसारणादिति य
दि तर्हि नेदं संप्रसारणं हूत इति दीर्घत्वं न प्राप्नोति। दीर्घत्ववचनप्रामाण्यात्। अनवकाशं दीर्घत्वं तद्वचनप्रामाण्याद्भविष्यति॥ ॥

फलभेदाभावान्न देवेस्तु च्यतेतत्प्रयोजनाभावान्नानुष्ठीयते। यत्तु तदाश्रयमिति। यस्मात्फलावाप्तिः तत्फलभेदाद्भिद्यमानमसकृदनुष्ठीयत इति भावः। अप्राधा
न निमित्तमिति। अप्राधान्यं निमित्तं हेतुरस्येति बहुव्रीहिः। क्रियाविशेषणं चैतत्। एवमिहापि शास्त्रस्य पूर्वैकदेशानेकप्रयोगे वाफलमिति फलांतरार्थी पाठोऽन्तरेलक्ष एम०
णमावर्त्तयेदित्सपरिहारः कार्यकृतत्वादिति [redacted] ॥ ॥ श्री॥ ॥ श्री॥ ५८

अध्यैयातामिति। कृते पुल्लादेशे घाट्क्रियते इति प्रक्रियामाश्रित्य विचार्यते। अंतरंगेति। वर्णादांगमित्यनाश्रित्यैतदुच्यते॥ यस्य लक्षणांतरेणेति। एतत्कचि
दाश्रीयते कचिन्नयथो कं त द्वादलण कुलमित्यादौ सदादिभ्यो लुग्भवत्व इति यस्य चल लक्षणांतरेणेति त्वाश्रीयमाणे निसत्वात्तुक्स्थितस्य ह्यतोमिति लक्ष =

=वर्णाश्रयेण्यंतवत्वेन नइतिज्ञापकाद्वेच्छयं चात्रप्रामाण्यादित्यर्थः तभाष्यस्यतत्रससंप्रसारणपदं ८ संप्रसारणस्याभिकपदनिरूपणइतिपक्षयोर्भेदः॥१=

अंतरंगत्वाद्धा। अथवा पूर्वस्य कार्यं प्रसंतवड्वतीति दीर्घत्वं भविष्यति। आटो वृद्धेरियङ्। आटो वृद्धिर्भवतीसेतस्मादियङ्भवतिविप्रतिषेधे
न। आटो वृद्धिर्भवतीत्यस्यावकाशः। ऐक्षिष्ट ऐहिष्ट। इयङोवकाशः अधीयाते अधीयते। इहोभयं प्राप्नोति। अध्यैयातां अध्यैयत। इयङन्दे
शोभवति विप्रतिषेधेन। नैष युक्तो विप्रतिषेधः। अंतरंगा आटो वृद्धिः कांतरंगता। वर्णावाश्रिसाटो वृद्धिः अंगस्येयङन्देशः। एवं तर्हीदमिह संप्र
धार्यं आट् क्रियतामियङ्गादेशा इति किमत्र कर्तव्यंपरत्वादियङ्। नित्य आडागमः कृतेयीयङि प्राप्नोत्यकृतेपि। इयङपि नित्यः कृतेप्याटि प्रा
प्नोत्यकृतेपि। अनित्य इयङ्। नहिकृते आटि प्राप्नोति किंकारणं अंतरंगा आटो वृद्धिः॥ यस्य च लक्षणांतरेणनिमित्तं विहन्यते न तदनित्यं। न
[redacted] चात्राडे वेयङो निमि
त्तं विहंति। अव यंप लक्षणांतरमाटो वृद्धिः प्रतीक्ष्या। उभयोर्नित्ययोः परत्वादियङन्देशः। आङुणात्सवर्णदीर्घत्वमाङभ्यासयोः। आङुणात्स
वर्णदीर्घत्वं भवति विप्रतिषेधेन कं आङभ्यासयोः। आङुणस्यावकाशः खट्वेंद्रः गवेंद्रोदकं। सवर्णदीर्घत्वस्यावकाशः दंडाग्रं क्षुपाग्रं। इहोभयं प्राप्नो

णोननिमित्तं विहन्यते न पुनस्तदाद्यले नैव तिनस्यादनित्यत्वं लुकः तत्रयदाल्लक्षणयोरेव विचारः किंलक्षणं नित्यं किमनित्यमिति तदा यस्य च लक्ष
णांतरेणेतिन्यायः। यदा तु कार्ययोर्वि[illegible]चारः कस्मिन्कार्ये प्रवृत्ते किं प्रवर्त्तते किं न प्रवर्त्तेत इति तदा नास्येतत यस्य चल लक्षणांतरेणेति॥ ॥ ॥

मा०कै०६ उपर्ईजतुरिति। पूर्वं सवर्णदीर्घत्वं भवति पश्चादाड्गुणः। अन्तरङ्गत्वात्। एवं तर्हि सिध्यति प्रकारान्तरेण तत्सिद्धिं प्रदर्शयितुमाह। अभ्यासेति। हलादिः शेष इति।
५९ अभ्यासानभ्यासयोरेकादेशः कार्योऽभ्यासस्यादिवद्भावादभ्यासग्रहणेन ग्रहणं तेन तस्यानिकोऽप्ययादेशः स्थानिवद्भावादभ्यास इति भावः। एकारस्य तत्वभ्यास
ह्रस्वो न भवति। ह्रस्वे कर्तव्ये नाभ्यासादिष्टिस्वं तदादिवद्भावनिषेधात्। पदान्तमभक्त इति। अन्तवद्भावात्पदान्तकार्यं लभत इत्यर्थः। इहापीति विप्रतिषेधोपा
लम्भः। स्वरदोष इति। अग्रिशब्दः प्रत्ययस्वरेणान्तोदात्तः। आङ् गतिरनन्तर इति पूर्वपदप्रकृतिस्वरेणाद्युदात्तः शिष्टमनुदात्तं तत्र यदि पूर्वं सवर्णदीर्घः

=अधःपदं द्वितीयमलत्वान्तस्य निपातनात्·१=

कलआऊढाकोऽढाउप ईजतुः। उपेजतुः। उप उउपतुः। उपोपतुः सवर्णदीर्घत्वं भवति विप्रतिषेधेन। अभ्यासार्थे न तावन्नार्थः। अस्त्वत्रादु
णः आड्गुणे कृते अपवादोऽचहलादिशेषः पुनराड्गुणो भविष्यति। भवेत्सिद्धं उपेजतुरिति। इदं तु न सिध्यति। उपोपतुः। उपोपतुः। अत्र त्वाड्गुणे
कृते ओदन्तो निपात इति प्रगृह्यसंज्ञा प्रगृह्यः प्रकृत्येति प्रगृह्याश्रयः प्रकृतिभावः प्राप्नोति। पदान्त प्रकृत्योः प्रकृतिभावः नचैष पदान्तः।
पदान्तमभक्तः पदान्तग्रहणेन ग्राहिष्यते। एवं तर्ह्यैतदेवात्र नास्ति ओदन्तो निपात इति किं कारणं लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यै
वेति। इहापि तर्हि अघोढा कृदोढेतिभवेद्रूपं सिद्धं स्यात्। स्वरदोषस्तु। स्वरे तु दोषो भवति। अघोढा एवं स्वरः प्रसज्येत॥ अघोढा इति वेष्यते॥

स्यात्तत्राङ्क्योरुदात्तयोरेकादेश उदात्तस्तत आड्गुण एकादेश उदात्तेनोदात्तः स्वरितो वानुदात्ते पदादाविति पक्षे उदात्तः स्यात् पक्षे स्वरितः। यदा तु पूर्वमाड्गुणः प
श्चादेमाङोश्चेति पररूपं तदा पूर्वत्रासिद्धमिति पररूपे कर्तव्ये एकादेशस्वरयोरुदात्तस्वरितयोरसिद्धत्वाच्छास्त्रदृष्ट्या अस्वरस्यैकादे [redacted] राम०
शस्य पूर्वैणोदात्तेन सहैकादेशः अन्तरतम्यादुदात्त एव भवति॥ ॥ श्री॥ ॥ ॥ ५९

आदि॰ पररूपवचनं चेति। न केवलं स्वरदोषोद्धावनाचार्यवचनमपि लुप्तानमाणी कृतमित्यर्थः। विप्रतिषेधवाधानर्थक्यं परिहर्तुमाह। नानर्थकमिति। यदा पूर्वमा

डुणः प्रवृत्ते तेन तदा वृद्धिरेचीति वृद्धिर्वाधनार्थो मोमाडोऽस्तु इतिवत्कृत्यमित्यज्ञापकं विप्रतिषेधे त्वाश्रीयमाणे सवर्णदीर्घेण सिद्धे रूपे पररूपवचनं ज्ञापकं भवति। नाद्यश

= र्वतूपसर्गस्य इति॰ धातोस्सवर्णतिर्जविलबोधजनकस्य तन्संबंधं विना आवादिति भावः। नाघ्यादेकेति उपसर्गस्यार्था आवादिति भावः। किमर्थं न ही कि आउ इव विशिष्टस्याय धातुत्वादिति भावः। समुदायेनेति॰ उपसर्गद्योत्यार्थसहितधात्वर्थेन संबद्धः। अनेन हि निन्न

आदि॰ पररूपवचनं चेदानीमनर्थकं स्यात्। नानर्थकं ज्ञापनार्थं किं ज्ञाप्यं। आदि॰ पररूपं तु ज्ञापकमंतरंगवलीयस्त्वस्य। एतत् ज्ञापयत्याचार्यः

अंतरंगं वलीयो भवतीति। किं पुनरिहांतरंगं किं वहिरंगं। यावता द्वे पदे आश्रित्य सवर्णदीर्घत्वमपि भवति आड्गुणोपि। धातूपसर्गयोर्यत्कार्यं तदं

तरंगं कुत एतत्। पूर्वमुपसर्गस्य हि धातुना योगो भव ति नाद्य शब्देन। किमर्थं तर्ह्यद्य शब्दः प्रयुज्यते। अद्य शब्दस्यापि समुदायेन यो

गो भवति। किमेतस्य ज्ञापने प्रयोजनं। प्रयोजनं पूर्वसवर्णपूर्वत्वतहिलोपटेनदेः। यदि॰ खिन्नदि॰ णत्वौत्वमंतरंगं वहिरंगलक्षणाद् द्वर्णविकारात्।

पूर्वसवर्णः प्रयोजनं। अग्नी अत्र वायू अत्र पूर्वसवर्णत्वं प्राप्नोति वहिरंगलक्षणश्च वर्णविकार आवादेशः पूर्वसवर्णदीर्घत्वं भवत्यंतरंगतः॥ पू

र्वसवर्णः॥ पूर्वत्व शकन्ध्वर्थं परिन्यर्थं पूर्वत्वं च प्राप्नोति वहिरंगलक्षणश्च वर्णविकारः सवर्णदीर्घत्वं पूर्वत्वं भवत्यंतरंगतः॥ पूर्वत्व तहिलोप। अकार्यं

त्रत्र ह्यर्यत्र पचेदं। तहिलोपोच प्राप्नुतः वहिरंगलक्षणश्च वर्णविकारः सवर्णदीर्घत्वं। तहिलोपौ भवतोंतरंगतः॥ " " "

द्येनेति। अद्येत्यस्याधारार्थस्याङा संवंधो नास्ति क्रियापेक्षत्वादाधारस्य अद्यादिव्यवस्थार्थं तु धातूप[illegible]सर्गौ द्वयमुपदिष्टौ परमार्थतस्तु धातूपसर्गसमुदायः

सं ग्राममपतिवत् क्रियाविशेषवाचीति भावः। अग्नी अत्रेति। अग्नि औ अत्र इति स्थिते विचारः। एवं शकन्धु आ अंध्यं। अकारीत अत्र पचहिइदं। वृक्षआ अत्र

॥ वृक्षए अत्र अग्नि इदं। ययाअ अत्र॥ " "

भा०कौ० ६ वृक्षा अत्रेति। अनुदाहरणमेतदिमौ रुः। वृक्ष स् अत्र इति स्थिते हलन्तेरुत्वे उत्वस्य प्राप्तिः। तच्च रुत्वं पूर्वत्रासिद्धमिति पूर्वसवर्णदीर्घे क्रियमाणेऽसिद्धमुत्वमेव त्वा

६० श्रयासिद्धं वृक्षोऽत्रेति। तत्र पूर्वसवर्णदीर्घे रुत्वे पूर्वं भाव्यं। तत्र हलन्तेऽतः परो रुर्न भवतीत्युत्वाभावः। प्रतिविधेयमिति। पूर्वोत्तरपदयोर्द्विसवर्णैकादेशादिसार

= नापवस्यतितत्राप्येतदस्य भविष्यति ॥२॥

वृक्षेणात्र १

तर्हि लोपादेना वृक्षेणात्र इनादेशस्य प्राप्नोति बहिरंगलक्षणस्य वर्णविकारः सवर्णदीर्घत्वं इनादेशो भवत्यंतरंगतः टेनादेशो। वृक्षायात्र वृ
क्षायात्र ङे. यादेशस्य प्राप्नोति बहिरंगलक्षणस्य वर्णविकारः ए ऊः पदांतादतीति पररूपत्वं। ङे. यादेशो भवत्यंतरंगतः। ङे. य। ङि. स्मिन्। यस्मि
न्निदं तस्मिन्निदं स्मिन्भावस्य प्राप्नोति बहिरंगलक्षणस्य वर्णविकारः सवर्णदीर्घत्वं स्मिन्भावो भवत्यंतरंगतः। ङि. स्मिन्। ङि. ए लौत्वं। अग्ना
विदं। पपावत्र। ङि. एलौत्वं प्राप्नोति बहिरंगलक्षणस्य वर्णविकारः सवर्णदीर्घत्वं। औत्वं भवत्यंतरंगतः। नैतानि संति प्रयोजनानि विप्रति
षेधेनाप्येतानि सिद्धानि। इदं तर्हि प्रयोजनं वृक्षाऽत्र प्लक्षाऽत्र। पूर्वसवर्णस्य प्राप्नोति बहिरंगलक्षणस्य वर्णविकारः अतो रोरप्लुताद
प्लुते इत्युत्वं। पूर्वसवर्णो भवत्यंतरंगतः। नचावश्यमिदमेव प्रयोजनं। आद्ये योगे बहूनि प्रयोजनानि संति तदर्थमेषा परिभाषा कर्तव्या। प्रति
विधेयं दोषेषु। ख्यत्यात्परस्य। किमिदं ख्यत्यादिति। सखिपत्योर्विकृतयोर्ग्रहणं किं पुनः कारणं सखिपत्योर्विकृतयोर्ग्रहणं। यतेन सखिपतिभ्या
१मिसेवोच्येत। नैवं शक्यं गौरीयां चैव निर्देशः स्यात्। इह च प्रसज्येत॥ ॥

= आद्ये योगे इति आद्यं विप्रतिषेधस्त्रेइत्यर्थकनियमेनेन दर्शयति १ =

यो दोषा विप्रतिषेधस्तत्रोक्ताः। ख्यत्यात्। किमिदमिति। किमकारांतयोर्ग्रहणं स्वयं कृतयणादेशयोः। आद्ये पक्षे मुख्यापत्यादीनां ग्रहणप्रसंग इति मत्वा प्रश्नः। सखि एम०
पत्योरिति। सख्युर्यः पत्युर्न इति लिंगादकारांतयोर्न ग्रहणमपि तु कृतयणादेशयोः। न सखिपतिभ्यामिति। विकारनिर्देशोऽयं लिंगेन तयोः प्रतिपत्तिः साक्षान्निर्देशे तु स्पष्टा ६०
१वगतिः ॥ ॥ ॥

अतिसखेरिति। अतिक्रांतः सखायेनेति बहुव्रीहिः। अथवा शोभनः सखा अतिसखा [redacted] नपूजनादिति समासांतनिषेधः सखिपतिभ्यामुक्तत्वाद्धन्द्वः सि उ.सा विसुत्वप्रसंगः। अथ तु विहितविशेषणपक्षे आश्रीयते सखिपतिभ्यां यौ विहितौ ङ.सिङ.सौ विति तदावौत्वाप्रसंगः। अथात्रिस्तु प्रसज्येतेत्यत आह। इहचेति। अतिसखेरि सत्यसखीति घिसंज्ञाप्रतिषेधो न भवति यद्धलाबंतात्प्रातिपदिके न तदंतविधिप्रतिषेधात् केवलस्यैव सखिशब्दस्य प्रतिषेधविज्ञानात्। सखीयतेरिति। विग्रमानं ख मस्ससखः तमिच्छत्यात्मन इति क्यच्। क्यचि चेतीत्वं। लूञ्स्विति। लून मिच्छतीति क्यच् अत्रपूर्ववत्ताप्तिं सिद्धमिति न त्वस्यासिद्धत्वात्सशब्दो भवति। अत्रचोदयंति। सखी

यत्रएवेतनिःप्रत्ययविधिविषयेयंपरिभाषेत्यनाश्रयणेनेदं वस्तुनो विशेष्याभिधाना च्युत्स्वरूपस्याव्यावर्तकत्वान्नतदंततं.२= प्रसंगइति समुदायस्य विकल्पताभावादनंगत्वाच्च तदंतविधिप्रत्ययाविति भावः। अतएवातिसखेरित्यादौ असखीतिघि

अतिसखेरागच्छति। अतिसखेः स्वं। इहचुनस्यात्। सखीयतेरप्रत्ययः। सख्युः। पत्युः। लूनीयतेरप्रत्ययः। लून्युः। पून्युः। अतो रोरप्लु तात्। किमर्थमप्लुतादप्लुतइत्युच्यते। प्लुतात्परस्य प्लुते वापरतो माभूत्। प्लुतस्य सस्य सुस्तो ताइ अत्र त्वसि। प्लुते परतः तिष्ठतु पय आइ गिन इत्यत्र अतः अतीत्युच्यते कः प्रसंगः प्लुतात्परस्य प्लुते वापरतं स्यात्॥ ॥ ॥

यादिभ्यः क्विपि कृते अल्लोपयल्लोपयोः स्थान्यल्लोपस्य स्थानिवद्भावादिको यणचीति ईकारस्य यणभावं। तत्र कृते यल्लोपे स्थानिवत्त्वनिषेधाद्गरिष्टादचः पूर्वविधौ स्था निवत्त्वाप्रसंगाद्धाल्लोपो व्योर्वलीति यल्लोपप्रसंगः। ततश्च सख्युरित्यादिरूपाणि न सिध्यंति। नैतदस्ति। कौलुप्तं न स्थानिवदिति स्थानिवत्त्वनिषेधात्। अतो। किमर्थमिति। प्रकृतिभावविधानात् ज्ञापकात्स्वरसंधिप्रकरणे प्लुतस्य सिद्धत्वात्तपरकरणेनैव उत्वं निवारितमिति मत्वा प्रश्नः॥ ॥ ॥

भा०कौ० ६ असिद्ध इति। प्रकृतिभाव एव असिद्धः प्लुतः। अप्लुतभाविन इति। प्लुतभावित्वात् उपचारात् स्थाने वाकारः प्लुतशब्देनोच्यत इत्यर्थः। यद्यपि प्रतिषेधोपादानसाम
६१ र्थ्यात् सिद्धः प्लुत इति परिहारोऽस्ति तथापि परिहारान्तरमज्ञावादेषु परिहारो नाश्रितः परस्य मिति। सामान्येन संहिताधिकारविहितकार्यापेक्षं ह्यापकमाश्रीयते।
अकारहशोरिति। उत्वप्रतिषेधः इत्यर्थः। ननु उत्वे कृते आद्गुणः एङः पदान्तादतीति पूर्वैकादेशः ततः प्लुतः। पयो३दि इति। पयोऽत्तीति क्विप्। ततः संबुद्धिः।

स्यप्रतिषेध १ =सामर्थ्यात्सौत्रस्याश्रयणमितिभावः।१=

असिद्धः प्लुतः तस्यासिद्धत्वात् प्राप्नोति। अथाप्लुतात् अप्लुत इत्युच्यमाने यावता असिद्धः प्लुतः कस्मादेवात्र न प्राप्नोति। अप्लुतभाविनः
अप्लुतभाविनीत्येवमेतद्विज्ञायते। नैतदस्ति प्रयोजनं सिद्धं कां प्लुतः स्वरसंधिषु। कथं ज्ञायते। परेयं प्लुतः प्रकृत्येति प्लुतस्य प्रकृतिभावं
शास्ति। सतो हि कार्यिणः कार्येण भवितव्यं। अप्लुतादप्लुतवचने अकारहशोः समानपदे प्रतिषेधः। अप्लुतादप्लुतवचने अकारहशोः
समानपदे प्रतिषेधो वक्तव्यः। पयो३ऽ पयो३दनवा बहिरंगलक्षणत्वात्। नवा वक्तव्यं किं कारणं बहिरंगलक्षणत्वात्। बहिरंगः प्लुतो
ऽन्तरंगमुत्वं असिद्धं बहिरंगमन्तरंगे। इहापि तर्हि प्राप्नोति। सुस्रोता३ अत्र त्वसिद्धे अन्तरंगो न प्लुतः बहिरंगमुत्वं कपुनरिहान्तरंगः प्लु
तः क्व वा बहिरंगमुत्वं क्व चान्तरंगमुत्वं प्लुतो वा बहिरंगः। वाक्यान्तस्य वाक्यादौ चान्तरंगः प्लुतः। बहिरंगमुत्वं समानवाक्ये पदान्तस्य पदादौ
१ उत्वमन्तरंगं ॥ ॥ ॥

=[illegible]इतिभावः।१= वाक्यान्तस्य [illegible]पेक्षणात्।२=

दूराद्धूते च सकारस्य वाक्यस्य टेः प्लुतभावित्वात् उत्वप्रतिषेधप्रसंगः। पयो३दे इति। पयोऽत्तीति क्विप्प्रत्ययः। ततः संयोगपरस्याकारस्य गुरुत्वात् गुरोरनृत इति प्लुत
भावित्वात् प्लुतादिति निषेधात् उशि च सुत्वं न प्राप्नोति। वाक्यान्तस्येति। सुस्रोता३ इत्यादौ पदान्तरानपेक्षणात् प्लुतोऽन्तरंगः। वाक्यादाविति। वाक्यादौ परतो राम०
वाक्यान्तस्येत्यर्थः। उत्वप्रसंगकथनार्थं चैतत्। उत्वं तु तत्र पदद्वयापेक्षत्वाद् बहिरंगं ॥ ॥श्री॥ ॥ ॥ ६१

बहिरंगं प्लुत इति। दूराद्धूताद्यर्थापेक्षत्वात्। किं पुनः कारणमिति द्विविधेऽसिद्धत्वे संभवति कस्माद्बहिरंगासिद्धत्वमुच्यते न तु पूर्वत्रासिद्धत्वमपि। आश्रयात्सिद्धत्वे नासि
द्धत्वं बाध्यते तथा बहिरंगासिद्धत्वमपि बाध्यतामिति मत्वा प्रश्नः। असिद्ध इति पूर्वत्रासिद्धमिति वचनात्॥ आश्रयादिति। अप्लुतादप्लुत इति प्रतिषेधाश्रयणसामर्थ्यात् सर्व
त्रासिद्धमित्येतदसिद्धत्वं प्रसा सत्ता बाध्यते न तु बहिरंगासिद्धत्वमौपसंख्यानिकं वा हेतुरित्यत्र ज्ञापितं च विप्रकृष्टत्वात्तयोरिसादौ तु बहिरंगपरिभाषया प्लुतस्यासिद्धत्वात्पा

=पाणिनीयसूत्ररूपया: १=वाक्रांतसंपादकपादकपदांतरापेक्षाजसपिबोध्यं: २=

बहिरंगं प्लुतः। किं पुनः कारणं बहिरंगत्वमुक्ते हेतुत्वेनोपदिश्यते न पुनरसिद्धत्वमपि। यथैव ह्ययं बहिरंग एवमसिद्धोऽपि। एवं मन्यते असिद्धः प्लुतः
आश्रयात्सिद्धो भवति। अथ वा यस्यां नाप्राप्तायां परिभाषायामुत्वमारभ्यते सा आश्रयात्सिद्धा स्यात्। कस्यां च नाप्राप्तायां। असिद्धपरिभाषायां। ब
हिरंगपरिभाषायां पुनः प्राप्तायामप्राप्तायां च। नांतः पादं कस्यायं प्रतिषेधः नांतः पादमिति सर्वप्रतिषेधः। नांतः पादमिति सर्वस्यायं प्रतिषेधः
कथं अचीति वर्त्तते। अचि यत्प्राप्नोति तस्य प्रतिषेधः। नांतः पादमिति सर्वप्रतिषेधश्चेदिति प्रसंगः। नांतः पादमिति सर्वप्रतिषेधश्चेदिति प्रसं
१गो भवति। इहापि प्राप्नोति। अन्वग्निरुषसामग्रमख्यत्। एवं तर्ह्यचीति वर्त्तते॥ ॥

=ननु प्लुत आश्रयात्सिद्धे न तु पूर्वत्रासिद्धमिति पारिभाषिकेति किमुच्यते आश्रयात्सिद्धत्वम् आह: तद्विषयेति: १=

दनात्पूर्वत्रासिद्धमित्यस्याप्रवृत्तावाश्रयात्सिद्धत्वाभावः। आश्रयात्सिद्धः स्यादिति। तद्विषयस्य प्लुतस्य सिद्धत्वात् सिद्धे लुक्तं। अनाश्रयणं तु तस्य अत्राभिमतं। नांतः
कस्यायमिति। यद्येऽः पदांतादतीति प्राप्तस्य पूर्वैकादेशस्य प्रतिषेधस्तदायवौ प्रा प्लुत इति प्रश्नः। सर्वप्रतिषेध इति। विशेषमनपेक्ष्य प्रतिषेधविधानात्। अन्वग्निरिति।
१यणादेशस्यात्र प्रतिषेधप्रसंगः॥ ॥ ॥ ॥

अकाराश्रयमिति। अकार एव निमित्तं यस्य तस्य प्रतिषेधो यणादेशस्त्वज्मात्रनिमित्तो नाकाराश्रय इति न प्रतिषिध्यते। अयवोश्चेति। अयवोस्त्वज्मात्राश्रयो
नाकाराश्रयौ। उत्वप्रतिषेधश्चेति। एङ्ग्रहणमिहानुवर्त्तमानमतो रोरप्लुतादप्लुते इत्यत्रापि अनुवर्त्तते इत्येङः परस्य रोरुत्वप्रसंगः। अवङ्। गोर ... स्वचनमिति। अमुसन्ति

अकाराश्रयं यत्प्राप्नोति तस्य प्रतिषेधः। अकाराश्रयमिति चेदुत्ववचनं। अकाराश्रयमिति चेत् उत्वं वक्तव्यं। कान्तोऽग्चः शतधारोऽयम्मणिः
। अयवोः प्रतिषेधश्च। अयवोश्च प्रतिषेधो वक्तव्यः। स्वजये अम्बसूनृते। अध्वर्यो अद्रिभिः सुतं। एङः प्रकरणात्सिद्धं। एङः इतीति वर्त्तते। ए
ङः अतिय प्राप्नोति तस्य प्रतिषेधः एङः प्रकरणात्सिद्धमिति चेत् उत्वस्य प्रतिषेधो वक्तव्यः। अग्ने रत्नवायो रत्न। अतो रोरप्लुतादप्लुते। एङः प्लुसु
त्वं प्राप्नोति। पुनरेङ्ग्रहणात्सिद्धं पुनरेङ्ग्रहणं कर्त्तव्यं। तत्तर्हि कर्त्तव्यं (नकर्त्तव्यं) प्रकृतमनुवर्त्तते। ननु चोक्तमेङः प्रकरणात्सिद्धमिति चेदुत्वप्रति
षेध इति। नैष दोषः। पदान्ताभिसंबद्धमेङ्। अवङ्। गोरग्वचनं गवाग्रे स्वरसिद्ध्यर्थं। गोरग्वक्तव्यः किं प्रयोजनं गवाग्रे स्वरसिद्ध्यर्थं गवाग्रे
स्वरसिद्धिर्यथा स्यात्। गवाग्रं। अवङादेशे हि स्वरे दोषः। अवङादेशे हि स्वरे दोषः स्यात्। अन्तोदात्तस्यान्तर्यतोऽन्तोदात्त आदेशः प्रसज्येत। क
थं पुनरयमन्तोदात्तः पदादेकाच्। व्यपदेशिवद्भावेन। यथैव तर्हि व्यपदेशिवद्भावेनान्तोदात्तः एवमाद्युदात्तोऽपि तत्रान्तर्यतः आद्युदात्तस्या

×ग्रहणमनुवर्त्तते। न चैङः पदान्तात्सरोरुत्वं ति ×२ ‍द्युदात्त आदेशः प्रसज्येत॥ ॥ ॥

पक्षे गोशब्दः फिषि अन्तोदात्त इत्योकारस्यान्तोदात्तस्य स्थाने अवङ् भवन्नन्तोदात्तः प्राप्नोतीति अपि विधेयः स चागमः अनुदात्तादिः सत्तुदात्तः तेन चौकारस्य पदान्ततया वि राम०
धानात्पूर्वैकादेशाभावे अवादेशो भवति। गवाग्र मिति। वृद्धौ हि तत्र पूर्वपदप्रकृतिस्वरेण आद्युदात्तत्वं भवति। तत्पुरुषे तु समासान्तोदात्तत्वेन भाव्यं॥ ॥ ६२

यदि पुनरिति। आद्युदात्तविधानशास्त्रप्रवृत्तयेऽप्यस्तीति पक्षः आश्रीयत इत्यर्थः। एतदपीति। आद्यंतवदेकस्मिन्निति व्यपदेशातिदेशोत्त्वदुक्तं स्यात् यदात्वनेन कार्यमा
त्रमुदात्तत्वमसत्येवादित्वे तत्त्वे चातिदिश्यते तदैकारस्यादिव्यपदेशाभावः कुतस्तदादेर्यास्याद्युदात्तत्वं। उदात्तत्वं चानियत देशं पर्यायेण स्यादिति पक्षेऽनिष्टस्वरप्र
संगः। सन्निपातनस्वर इति। एकश्रुत्या स्तुत्रपाठे यत्नेनाद्युदात्तोच्चारणमंतोदात्तत्वबाधनार्थं विज्ञायते। एवमपीति। परत्वात्सर्वे स[redacted]मासांतोदात्तत्वे सत्यवर्ड्प्र

सत्यमेवमेतत् नत्विदं लक्षणमस्ति प्रातिपदिकस्यादिरुदात्तो भवतीति। इदं पुनरस्ति प्रातिपदिकस्यांत उदात्तो भवतीति सोऽसौ लक्षणोनांतोदात्तः तत्रांं
तर्यतोऽन्तोदात्तस्यांतोदात्त आदेशः प्रसज्येत। यदि पुनर्गमे ङौ विधीयते किं कृतं भवति। प्रत्ययाद्युदात्तत्वे कृते आंतर्यत आद्युदात्तस्याद्युदात्त आदेशो
भविष्यति। एवमंतोदात्तोऽपि त्रांतर्यतोऽन्तोदात्तस्यांतोदात्त आदेशः प्रसज्येत सत्यमेवमेतत् नत्विदं लक्षणमस्ति प्रत्ययस्यांत उदात्तो भवतीति। इदं
पुनरस्ति प्रत्ययस्यादिरुदात्तो भवतीति सोऽसौ लक्षणेनाद्युदात्तः तत्रांतर्यत आद्युदात्तस्याद्युदात्त आदेशो भविष्यति। एतदप्यादेशेनास्ति आ
देशस्यादिरुदात्तो भवतीति। प्रकृतितोऽनेन स्वरोऽलं शिवद्भावो वक्तव्यः। यत्थेवं निपातनस्वरः प्रकृतिस्वरस्य बाधक एवं समासस्वरस्यापि गवाश्वि
गवाश्वि। इंद्रे इंद्रा विति वक्तव्यं। इहापि यथा स्यात्। गवेंद्रयज्ञेवीहीति। तत्र हि वक्तव्यं। नव[redacted]कथं नैवं विज्ञायते॥० ॥
कथं पुनर[redacted]यमाद्युदात्तः यस्मादेकाच्त्व्यपदेशिवद्भावेन यथैव तर्हि व्यपदेशिवद्भावेनाद्युदात्तः ४४ अन्यः प्रकृतिश्चास्यपृथैवाद्युदात्ता एवमंतोदात्तापि एवं तर्ह्याद्युदात्तनिपा

संगाइत्युपदेशिवद्भावात्सर्वमवदिः सतिशिष्टसमासांतोदात्तत्वं भवति। इंद्रे। इंद्रादाविति। इंद्रशब्द आदिर्यस्मिंस्तस्मिन्परत इत्यर्थः। केवले चेंद्रशब्दे व्यपदेशिवद्भावाद्
वति[redacted]व्यपदेशिवद्भावो प्रातिपदिकेनेतितु निषेधः प्रत्ययविधिविषयः॥ ॥ ॥श्री॥ ॥

= यद्यपि इंद्रादावपि गोपरस्येंद्रशब्दपरत्वं न निवर्तते तथापि पदांते गोशब्दस्येंद्र इंद्रादावेव संभवतीति समासे नोत्तरपदाक्षेपेऽच्य संप्रसारणमिति सवोत्कारी वाइंद्रशब्दे नस्यादिति वचनमेव कर्तव्यमिति भावः। = ४
समास[redacted]

॥ कश्चित्किं चान्यत्प्राप्नोति शाकलं न नित्यसु न नं सिन्नित्यसमासयोः शाकलं प्रतिषेधं वक्ष्यति स नवकारो भवतीति पक्षे नाप्यनेन संग्रहो नित्यग्रहणेन यथा भवति तथा व्याचष्टे प्लुतेत्यादि नित्यं सर्वकालस्थे रूपांतरयुक्तानां कचित्पक्षे प्रकृतिभावं न लभंते इत्यर्थः अथवेत्यादि व्याख्यानांतरं तु

भा०कौ० ६३ इ३ चेति। इ३ दूराद्धूते विशेष्यः ३ चीति विशेषणं। सिद्धांते त्वज्विशेष्यः इ३ दूराद्धूते विशेषणं। तदा द्वावपि इ३ दूराद्धूतस्यैवाज्भवतीत्यवइ- सिद्धिः। प्लुतानित्यग्रहणमिति। इ३ इ३
चेतिये सूत्रं पठंति प्लुतप्रगृह्या अचि नित्यमिति तु द्वितीयं तन्मते नैष प्रश्नः। पूर्वस्मिन्नेवेति। इ३ इ३ चेत्यत्र। शाकलमिति। ह्रस्व इत्यर्थः। नित्यग्रहणादयमर्थो
लभ्यते। प्लुतप्रगृह्यरूपा एव नित्यं प्रकृतिभावं प्रतिपद्यंते न तु रूपांतरयुक्ता इति। अथवा प्लुतप्रगृह्याणामयमेव प्रकृतिभावो नित्यं भवति न तु सूत्रांतरेण

=अचीत्यनुवर्तनेनैवैतदर्थलाभेपि सेत्स्यति ३= =अचीत्यनुवृत्तिसामर्थ्यादयमर्थो लभ्यते ३=

इ३ इ३ चीति। कथं तर्हि अचि भवति कतरस्मिन्निइ३ चीति। प्लुतप्रगृह्या अचि नित्यं। नित्यग्रहणं किमर्थं। विभाषा मा भूदिति। नैतदस्ति प्रयोजनं। पूर्वस्मिन्नेव योगे विभाषाग्रहणं निवृत्तं। इदं तर्हि प्रयोजनं। प्लुतप्रगृह्याणामचि प्रकृतिभाव एव यथा स्यात्। यदन्यत्प्राप्नोति तन्मा भूदिति। किं चान्यत्प्राप्नोति। शाकलं सिन्नित्यसमासयोः शाकलप्रतिषेधं वक्ष्यति स नवकारो भवति। अथाज्ग्रहणं किमर्थं। अचि प्रकृतिभावो यथा स्यात्। प्लुतप्रगृह्येष्वज्ग्रहणमनर्थकमधिकारात्सिद्धं। प्लुतप्रगृह्येष्वज्ग्रहणमनर्थकं किं कारणमधिकारादेव सिद्धं अचीति प्रकृतमनुवर्तते क्व प्रकृतं इको यणचीति। तत्तु तस्मिन्प्रकृतिभावार्थं। तत्तु द्वितीयमज्ग्रहणं कर्तव्यं प्रकृतिभावार्थं तस्मिन्नचि पूर्वस्य प्रकृतिभावो यथा स्यात्। इह मा भूत्। जानु उ अस्य रुजति जानू अस्य रुजति जान्वस्य रुजतीति। अथ किमर्थं प्लुतस्य प्रकृति-
भाव उच्यते॥ ॥

कार्यांतरसहितः तत्तु तस्मिन्निति। यस्मिन्नचादेशो विधीयते तस्मिन्नेवाचि परतः प्लुतप्रगृह्याणां प्रकृतिभावो यथा स्यादित्यर्थः। जानु उ अस्येति। उ इति निपातः। तस्य पूर्वेण सह एकादेशे कृते अकारस्य निमित्तत्वाभावात्प्रकृतिभावादेशो भवत्येव। तत्रादिवद्भावादेकादेशः प्रगृह्यः तस्य इको यणचीति यणादेशः प्रकृतिभावान्न भवति। मय उञो वो वेति पक्षे वकारः। अथ किमर्थमिति। पूर्वत्रासिद्धमिति प्लुतस्यासिद्धत्वादेकादेशः प्रागेव प्राप्नोतीत्यनर्थकं प्रकृतिभाव पाम० ६३

=अत्र सर्वं प्लुतप्रकृतिभावादेकादेशो न स्यात्॥ १ = एवं दितिः एकादेशात्प्लुतो विप्रतिषेधेनेत्येतत्॥ २ = देवदत्ता३ इति अस्येही मादौ प्रवृत्यणीयमितिवाक्यस्य टेः प्लुतासिद्धिः॥ १ =

प्लुतप्रकृतिभाववचनमिति। ज्ञापकादस्मात्प्लुतः सिद्ध इति भावः। नवेति। शाल्लेंद्रेरेकारे शौन्तरंगः। प्लुतो दूरादूता घ्यर्थापेक्षत्वाद्बहिरंगः। एवं तु देवदत्तो ३ प्रवत्त्वसी
ति प्लुते कादेशयोर्विप्रतिषेधो नोपपद्यते प्लुतस्यैकपदाश्रयत्वादंतरंगत्वादेकादेशस्य तु पदश्रयत्वाद्बहिरंगत्वादिति चिंत्यमेतत्। = प्रगृह्ये न र्थकस्येति। अध आ३ अपर
सा हौसन्नम्यैवतदर्थस्योक्तत्वान्नर्थ इति रेवा उ नर्थकोऽनर्थांतरवाचित्वात् यथा अधिपरी अनर्थकाविति उक्तं। आतरदिसत्र तु क्रियाविशेषणत्वादर्थवाना

=इदं तस्मादिप्रतिषेधज्ञापकं किं तु प्लुत सिद्धत्वज्ञापनद्वारा भाष्यांतरे कथाकत्वादित्याह। ज्ञापकादिति॥ ३ = चिंत्यमेतदिति। प्लुतस्यापि वाक्यत्वसंपादकपदांतरसापेक्षत्वेकादेशसमत्वमेवेति चिंत्यमेव चिंत्यमितिविवरणकारः॥ तत्र। एहि देवदत्ता३ अत्र तन्नीसा

स्वरसंधिर्मा भूदिति। उच्यमानेप्येतस्मिन्स्वरसंधिः प्राप्नोति। प्लुते कृते न भविष्यति। असिद्धः प्लुतः तस्यासिद्धत्वात्प्राप्नोति। प्लुतप्रकृतिभाववच
नं तु ज्ञापकमेकादेशात्प्लुतो विप्रतिषेधेनेति। यदयं प्लुतः प्रकृत्येति प्रकृतिभावं शास्ति तज्ज्ञापयत्याचार्यः एकादेशात्प्लुतो भवति विप्र
तिषेधेनेति। एकादेशात्प्लुतो विप्रतिषेधेनेति चेच्छाल्लेंद्रे इति प्रसंगः। एकादेशात्प्लुतो विप्रतिषेधेनेति चेत् शाल्लेंद्रे इति प्रसंगो भव
ति शालाया मिंद्रः। न वा बहिरंगलक्षणत्वात्। न वाति प्रसंगः किं कारणं बहिरंगलक्षणत्वात्। बहिरंगः प्लुतः अंतरंग एकादेशः। असिद्धं बहि
रंगमंतरंगे। प्रगृह्योऽनुनासिकः। प्रगृह्योऽनर्थकस्य। प्रगृह्योऽनर्थकस्येति वक्तव्यं। इह माभूत् इंद्रोबा रुप्यामातरत्। तत्तर्हि वक्तव्यं न वक्तव्यं। बहुल
वचनान्न भविष्यति। प्रगृह्योऽनुनासिकः छंदसि बहुलं। इकोऽसवर्णे। किमर्थश्चकारः प्रकृत्येत्येतदनुकृष्यते किं प्रयोजनं स्वरसंधि
र्मा भूदिति। नैतदस्ति प्रयोजनं। ह्रस्ववचनसामर्थ्यान्न भविष्यति। भवेद्दीर्घाणां ह्रस्ववचनसामर्थ्यात्स्वरसंधिर्न स्यात् ह्रस्वानां

× शाल्लेंद्रः॥ ४

तु न स्यात्। इको लुटि च क्लृप इस्त्वव्याख्यानादधिकारस्य सिद्धत्वात्सर्वं च काराणां प्रसारव्याख्यानात् अधिकाराभिव्यक्तये क्रियमाणोऽप्ययं चकारेषु ह्रस्वविधानसामर्थ्यो
त्स्वरसंध्यभावस्य सिद्धत्वात् अनर्थकश्चकार इति मत्वाह। किमर्थ इति। भवेदिति। दीर्घाद्ध्रस्वाश्चेक संनिकुमारी अत्र दधि अत्र इति ह्रस्वस्य दीर्घाणामारभ्यते न
१ ह्रस्वानां स्वत एव ह्रस्वरूपत्वात्॥ ॥ ॥

नहि भुक्तवानिति। भुजेस्तृप्तिफलत्वात् फलाभावात्पुनर्भुजेः प्रवृत्तिः। अत्र नैकांतिकमेतदित्याह। ननु चेति। सामर्थ्यादिति। फलविशेषसद्भावादित्यर्थः। प्री
त्यतिशयो भोजनविशेषस्य फलं। इह तु फलाभावात्प्रवृत्तिर्नास्तीत्यर्थः। स्वरसंधिर्माभूदिति। यणादेशबाधनार्थं ह्रस्वस्य ह्रस्वविधानं स्वरूपमप्याप सर्थमिस

ह्रस्वानामपि ह्रस्ववचनसामर्थ्यात्स्वरसंधिर्न भविष्यति। न ह्रस्वानां ह्रस्वाः प्राप्नुवंति। नहि भुक्तवान् पुनर्भुंक्ते। नच कृतश्मश्रुः पुनः श्म
श्रूणि कारयति। ननु च पुनः प्रवृत्तिरपि दृष्टा भुक्तवानपि पुनर्भुंक्ते। कृतश्मश्रुश्च पुनः श्मश्रूणि कारयति। सामर्थ्यात्तत्र पुनः प्रवृत्तिर्भ
वति भोजनविशेषात् शिल्पिविशेषाद्वा ह्रस्वानां पुनर्ह्रस्ववचने न किंचित्प्रयोजनमस्ति। अकृतकारि खल्वपि शास्त्रमग्निवत्। तद्यथाऽ
ग्निर्यददग्धं तद्दहति। ह्रस्वानामपि ह्रस्ववचन एतत्प्रयोजनं स्वरसंधिर्माभूदिति। कृतकारि खल्वपि शास्त्रं पर्जन्यवत्। तद्यथा। प
र्जन्यो यावदूनं पूर्णं च सर्वमभिवर्षति। इदं तर्हि प्रयोजनं प्लुतप्रगृह्या अनुकृष्यंते। इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च प्लुतप्रगृह्या
श्च प्रकृत्या नित्यग्रहणस्याप्येतत्प्रयोजनमुक्तं। अन्यतरच्छक्यमवक्तुं। सिन्नित्यसमासयोः शाकल्यप्रतिषेधो वक्तव्यः। अयं ते योनि
र्ऋत्वियः प्रजां विंदामहे ऋत्वियां। वैयाकरणः सौवश्वः। नित्यग्रहणेन नार्थः। सित्समासयोः शाकल्यं न भवतीत्येव॥ ॥

र्थः। अग्निर्दग्धं न दहत्यप्रयोजकत्वादिति नासौ दृष्टांत उपादेयः। इहापि न तुल्यो दृष्टांत इत्याह। कृतकारीति। सिन्नित्यसमासयोरिति। नित्याधिकारविहितः स
मासो नित्यसमासः यो वा विग्रहाभावादस्वपदविग्रहत्वान्नित्यसमासः। वैयाकरणः सौवश्वः इति प्रदेशान्तरपाठाश्रयेणैवं पठितं व्याकरणं स्व

=कुमार्यै इदं कुमार्यर्थमिति यथा।२= ॥ इसे तावदप्यत्रोदाहरणं भवति॥ ॥ =कुगतीतिसमासः।१= ॥

वाप्यश्व इति। सुप्सुपेति समासः। संज्ञायामिति तु समासस्य नित्यत्वात्सिद्धः प्रतिषेधः। अप्लुत। अनार्षे इति। पदस्येयत्तापरिज्ञानाय स्वरूपेऽवस्थापनार्थे इतिः प्रयुज्य
त इत्यर्थः। अर्थेति। प्लुतस्य श्रवणेन न भाव्यमिति प्लुत एव निषिध्यतां किमतिदेशार्थेन वद्वचनेनेति भावः। अपीड इति। अत्र प्लुताश्रयोऽपि प्रकृतिभावः प्राप्नोति
=परकार्ये इति विशेषः।२=

इदमपि सिद्धं भवति वाप्यामश्वः वाप्यश्वः। न घामातिर्नेघातिः॥ ईषा अक्षादिषु छंदसि प्रकृतिभावमात्रं। ईषा अक्षादिषु छंदसि प्रकृतिभावमात्रं
द्रष्टव्यं। ईषा अक्षा। का ईमरे पिशंगिला यथा अंगदः। ऋत्यकः। किमर्थमिदमुच्यते। ऋत्यकः सवर्णार्थः। सवर्णार्थोऽयमारंभः। होतृ ऋश्यः अनि
गंतार्थं च। खट्वा ऋश्यः ऋति ह्रस्वा उपसर्गात् वृद्धिर्विप्रतिषेधेन। ऋति ह्रस्वो भवतीत्येतस्या उपसर्गाद्वृद्धिर्भवति विप्रतिषेधेन। ऋति ह्रस्वो भवती
त्येतस्यावकाशः। खट्व ऋश्यः माल ऋश्यः। उपसर्गा [redacted]
द्धेरवकाशः। विभाषा ह्रस्वत्वे यदा न ह्रस्वत्वं सोऽवकाशः। ह्रस्वप्रसंग उभयं प्राप्नोति। उपार्छति। उपसर्गाद्वृद्धिर्भवति विप्रतिषेधेन सत हि वि
प्रतिषेधो वृक्णयो न वक्तव्यः। उक्तं तत्र धातुग्रहणस्य प्रयोजनं उपसर्गादति धातौ वृद्धिरेव यथा स्यात्। यदन्यत्प्राप्नोति तन्माभूदिति। अप्लुतव।
उपस्थित इत्युच्यते किमुपस्थितं नाम। अनार्षे इतिकरणः सुश्लोक इ इति सुश्लोकेति। अथ वद्वचनं प्लुतकार्यप्रतिषेधार्थं। वद्वचनं क्रियते प्लुतकार्यं
प्रतिषेधार्थं प्लुतकार्यं प्रतिषिध्यते त्रिमात्रता न प्रतिषिध्यते। किं चेदानीं त्रिमात्रताया अप्रतिषेधे प्रयोजनं यावता प्लुतकार्ये प्रतिषिद्धे स्वरसंधिर्नाम
वितव्यं। प्लुतप्रतिषेधे हि प्रगृह्यप्लुतं प्रसंगोऽनेन विहितत्वात्। प्लुतप्रतिषेधे हि सति प्रगृह्यस्यापि प्लुतस्य त्रिमात्रतायाः प्रतिषेधः प्रसज्येत। अपीड इति॥
प्रतिषेधः ×किमर्थं वद्वचनं×
प्रगृह्याश्रयोऽपि। तत्र प्लुताश्रये प्रतिषिद्धेऽपि प्रगृह्याश्रयप्रकृतिभावात् प्लुतस्य श्रवणं सिध्यति। प्लुतस्य तु निषेधे क्रियमाणे श्रवणं न स्यात्॥ ॥श्री ॥

ईचाक्र॥ ई३ति त्रिमात्रस्यानिर्देशः। किमर्थमिति। किमुपश्लिष्टग्रहणमनुवृत्ताप्राप्तविभाषेयं अथतन्निवृत्ता पूर्वविप्रतिषेधादप्राप्तविभाषा अथपरविप्रतिषेधा
दुभयतोविभाषेतिप्रश्नः। अनुपश्लिष्टार्थमिति। उभयत्रविभाषेयं परविप्रतिषेधस्यन्याय्यत्वात्। दिवउत्। उठिकृत इति। द्युभ्यामित्यादौ परत्वादूठिकृते
पुनः प्रसंगविज्ञानादुत्वंक्रियते। उङ्धातोरुक्तिरिति नानुवर्तत इतिपक्षमाश्रित्येदमुक्तं। ननुभाव्यमानत्वादुकारोभिन्नकालंनगृह्यतीतिनार्थस्तका

×चिनुहीदं×

किंचेदानींतस्यापि त्रिमात्रतायाः अप्रतिषेधे प्रयोजनं। यावताप्लुतकार्ये प्रतिषिद्धेस्वरसंधिनाभवितव्यंनभवितव्यंकिंकारणं
न्येनविहितत्वात्। अन्येनहितलक्षणेन प्लुतप्रगृह्यस्यप्रकृतिभाव उच्यते प्रगृह्यःप्रकृत्येति। ईचा॥ किमर्थमिदमुच्यते। ईचाक्रवर्मण
स्येसनुपश्लिष्टार्थो अनुपश्लिष्टार्थोयमारंभः चिनुहीइदं सुनुही३इदं सुनुहीदं। ईकारग्रहणेननार्थः अविशेषेणचाक्रवर्मणस्याप्लुत
वद्भवतीत्येव। इदमपि सिद्धंभवति। वशा३इयंवशेयं। दिवउत्। तपरकरणं किमर्थं। तपरस्तत्कालस्येतितत्कालोयथास्यात्। नैतदस्तिप्रयोज
नं। आंतर्यतोर्द्धमात्रिकस्यव्यंजनस्यस्थानेमात्रिकउकारं सिद्धमिति। उठिकृते आंतर्यतःदीर्घस्यदीर्घःप्राप्नोति। तदर्थंतपरःक्रियते।
स्तुटकातपूर्वः। कात्पूर्वग्रहणं किमर्थं कात्पूर्वोयथास्यात् संस्कर्त्ता संस्कर्तुं। नैतदस्तिप्रयोजनंसुडिसादिलिंगोऽयंक्रियते। करोतिश्च

=नन्वऽभ्यासविधयेनभेप्रवेशार्थं नहावरपकमनकाह अधवेति=

१ ककाद्दिः॥ ॥श्री॥ ॥

रेणएवंतर्हितपरत्वमेवज्ञापकं मा अमानोऽणुकारोभिन्नकालंसवर्णंगृह्णातीति। तेनामूभ्यामित्यादौदीर्घस्यदीर्घोभवति। सुट्कात्पूर्वइत्यमाणः सुटैःककारादेरेवधा
तोःसुडिष्यतइतिएछतिकात्पूर्वग्रहणमिति। अथवाधातूपसर्गयोःकार्यमंतरंगमितिसुडभ्यासात्पूर्वमेवस्तु उभिष्यतिसर्वचरित्वात्पूर्वइतिप्रश्नः। अथवावक्ष्यमा
णानेकप्रयोजनसंभवेतद्विशेषज्ञानायप्रश्नः। आदिलिंगइति। आदिलिंगमस्यास्तीत्यकारोमत्वर्थीयः॥ ॥ ॥

सुटिकात्पूर्ववचनमिति। अभ्यासयोरंतरंगत्वं मन्यते। द्विर्वचनात्सुडिति। अंतरंगबहिरंगभावमनपेक्ष्य विप्रतिषेध उच्यते। तत्र सुटि कृते पुनः प्रसंगविज्ञानात् स्कृ पाहस्य द्वि
र्वचने सापूर्वोः खय इति खयः शेषे सिद्धं रूपं। शब्दांतरस्येति स्थाने द्विर्वचने शब्दांतरत्वं। अकौ पदार्थे चक्रकदोषानवतारः। सकृद्गतौ विप्रतिषेध इति सुटि कृते द्विर्वचनाप्रसंगात्। न

तत्रांतरेणाकात्पूर्वं ग्रहणं कात्पूर्वस्य भविष्यति। अत उत्तरं पठति। सुटि कात्पूर्ववचनमकारादौ कात्पूर्वार्थं। सुटि कात्पूर्ववचनं क्रियते अकारादौ करो
तौ कात्पूर्वो यथा स्यात्। संचस्करतुः संचस्करुः। सुटि कात्पूर्ववचनमकारादौ कात्पूर्वार्थमिति चेदंतरेणापि तत्सिद्धं। सुटि कात्पूर्ववचनमकारादौ कात्पू
र्वार्थमिति चेदंतरेणापि कात्पूर्वग्रहणं सिद्धं। कथं। द्विर्वचनात्सुड् विप्रतिषेधेन। द्विर्वचनं क्रियतां सुडिति सुट् भविष्यति विप्रतिषेधेन। तत्र द्विर्वचनं भव
ति स्वसावकाशः विभिदतुः विभिदुः। सुटोवकाशः। संस्कर्ता संस्कर्तुं। इहोभयं प्राप्नोति। संचस्करतुः संचस्करुरिति सुट् भवति विप्रतिषेधेन द्विर्वचनात्
त्सुड्विप्रतिषेधेनेति चेद्द्विर्भूते शब्दांतरस्याकृतः सुडिति पुनः सुट् स्यात्। द्विर्भूते शब्दांतरभावात् पुनः प्रसंग इति चेद्द्विर्वचनं। सुटि कृते शब्दांतरस्याकृतं
मिति पुनर्द्विर्वचनं प्राप्नोति। तथा चानवस्था। पुनः सुट् पुनर्द्विर्वचनमिति च क्रममव्यवस्थाप्रसज्येत। नास्ति च क्रमप्रसंगः। न त्यव्यवस्थाकारिणा
शास्त्रेण भवितव्यं। शास्त्रतो हि नाम व्यवस्था। तत्र सुटि कृते द्विर्वचने नावस्थानं भविष्यति॥ x सुड्विप्रतिषेधेनेति चेद्द्विर्वचने शब्दांतरभावात्पुनः प्रसंगः द्वि
द्विर्वचन x

=सन्नंताभिचिवर्डि माभ्यासाद्धिर्हिनेचाडीति द्वित्वंने सर्वः॥२=

स्यादाकृतिपक्षे पुनःप्रसंगविज्ञानात् सुटि कृते द्विर्वचनमिति व्यक्तं तो पि जातिसद्भावान्न द्वारेण पुनः कार्ये प्रवृत्त्या चक्रकदोषापत्तिः। सकृद्गतौ तैल लक्षणस्य चरितार्थत्वमा
श्रित्य परिहारः। चक्रमिव विपरिवर्तनेनाच्युतं कं। इवार्थे संज्ञायामिति कन्प्रत्ययः। पुनर्द्विर्वचनप्रसंगश्चानभ्यासस्येति सस्य प्रसारण्याना उच्यते। अथवा साभ्यासाद्यः प्रत्ययो
विधीयते तत्रानभ्यासस्येति प्रतिषेधः॥ ॥ ॥

भा०कै०६
६६

अड्व्यवाय इति। अड्भ्यासव्यवायेपीति सूत्रस्य पाठेवार्त्तिकप्रवृत्तिः परत्वाद्धि कृ(णत्वस्या)गमे कृते तेन व्यवधानात्समोनंतरः करोतिर्न भवतीति वचनं। अभ्या
सव्यवाये चेति। नाप्राप्तः सुडुपसंख्यायते अपितु प्राप्त एव वचनेन देशविशेषे स्थाप्यते। अविप्रतिषेध इति। पदद्वयाश्रयत्वात्सुडुहिरंगः। एकपदाश्रयत्वात्तु
द्विर्वचनमंतरंगमिति तुल्यबलत्वाभावाद्धि प्रतिषेधाभावः। एवमर्थमिति। अंतरंगत्वाद्धि र्वचने कृते परत्वादंतरंगत्वाद्वा (गा)मेमध्यानुप्रवेशार्थः सुट् का(त्सूर्वे)ग्र
हणं कालावधारणार्थं वा करोतेः कादित्वावस्थायामेव सुडुद्भवति। कृते तु सुटि स्त्र द्विर्वचने भवतः क्रियमाणेपीति। परत्वा[redacted]त रंगत्वाभ्यामड्द्विर्वचनयोः

अड्व्यवायउपसंख्यानं कर्त्तव्यं। समस्करोत्। समस्कार्षीत्। अभ्यासव्यवायेच। अभ्यासव्यवायेचोपसंख्यानं कर्त्तव्यं। संचस्करतुः। संचस्करुः। किमुच्य
ते अभ्यासव्यवाय इति यदिदानीमेवोक्तं द्विर्वचनात्सुट् प्रतिषेधेनेति। अविप्रतिषेधोवा बहिरंगलक्षणत्वात्सुटः। किं कारणं बहिरंगलक्षण
त्वात्। बहिरंगलक्षणः सुट्। अंतरंगं द्विर्वचनं। असिद्धं बहिरंगमंतरंगे। एवमर्थमेव तर्हि कात्सूर्वे ग्रहणं कर्त्तव्यं कात्सूर्वो यथा स्यात्। क्रियमा
णेपि कात्सूर्वे ग्रहणे न सिध्यति। किं कारणं न ह्ययं कात्सूर्वग्रहणेन शक्यो मध्ये प्रवेशयितुं। किं कारणं। आदिर्लिंगोयं क्रियते। क
रोतिस्थ ककारादिः। इह स्थ पुनराति देशिकः करोतिरकारादिः पाक्षिक एषदोषो भवति [redacted] ॥

=तत्रनस्यादितिवाक्यशेषः।७= ×अविप्रतिषेधोवापुनः×४

कृतयोस्थितत्वात्सुटोमध्ये नुप्रवेशाभावः। करोतिस्थ इति। संस्कर्त्तेत्यादौ। तत्रश्चैवस्यात्। अड्द्विर्वचनयोस्तु कृतयोस्थितत्वात्सूर्वेग्रहणाच्च विसृष्टदेशसमर्पणाद
प्रवृत्तिरेव सुटः स्यात्। इहस्थेति। अड्भ्यासवानित्यर्थः। सहि स्थानिवद्भावादातिदेशिकः। अनागमकानां सागमका आदेशाः इत्यड्डागमयुक्तोप्यातिदेशिकस्तत
स्थकात्सूर्वे ग्रहणात्ककारादेरेव स्यात् नत्वड्भ्यासवत इत्यर्थः ॥ ॥श्री॥ ॥७॥ ॥श्री॥ राम०
६६

सुद्विधौ द्वैतमिति। कात्सूर्वेयग्रहणमरभ्यासस्य वायनिहृसर्थे वासान्त्रासर्थे वेति पक्षद्वयसंभवः। अविशेषेणेति। कालविशेषानंगीकरणमविशेषः तस्मिन्करोतौ सुडुक्तियत्रभवन्कात्सूर्वो भवतीसडभ्यासविषये निहृसर्थे कात्सूर्वेयग्रहणं भवतिविशेषेणवेति। यत्रानेकलक्षणसंनिपाताभावस्तत्रार्थे कं कात्सूर्वेयग्रहणं कालावधारणार्थं विज्ञायते। कात्सूर्वः सुट्कृत्वः कार्यो तस्माद्यावत्प्राप्नुवन्कात्सूर्वः कृतो भवति तद्यथा द्विः प्रयोगइति। उच्चारणक्रियाभेदाद्द्वौ भिद्यतइत्यभ्यासेन परस्यककारादेरूपस्य व्यवधानात्संपरिभ्यामुत्तरेणेनंतरः करोतिः ककारादिर्न भवतीति सुटोऽप्रसंगः यदा तु कालावधारणार्थं कात्सूर्वेयग्रहणं तदाविशे

=यथानेकेति। अत्र सुटो द्विर्वचनसुटोश्चेत्यर्थः। कत्वेति। संस्कर्तेत्यादौ। ३=

कतरस्मिन्पक्षे सुद्विधौ द्वैतं भवति। अविशेषेणविहितस्य सुटः कात्सूर्वेयग्रहणं [redacted] देशप्रकृत्यर्थे स्यात् विशेषेणाविधिरिति द्विर्वचनविधौ चापि द्वैतं भवति स्थानेद्विर्वचनं स्याद्विः प्रयोगो द्विर्वचनमिति तद्यथा द्विः प्रयोगो द्विर्वचनं अविशेषेणविहितस्य च सुटः कात्सूर्वेयग्रहणं देशप्रकृत्यर्थं तदैषदोषः। यदा हि स्थानेद्विर्वचनं तदायथाविशेषेणविहितस्य सुटः कात्सूर्वेयग्रहणं देशप्रकृत्यर्थे। अथापि विशेषविधिर्न तदादोषो भवति द्विःप्रयोगे चापि द्विर्वचने न दोषः। संपरिभ्यामितिनैषा पंचमी कान्तर्हि तृतीया संपरिभ्यामुपसृष्टस्येति। व्यवहितस्याप्युपसृष्टो भवति॥ ॥ ॥

=सोपपत्ति। आद्येतु नेतत्कारादित्वात्परःसंपरिभ्यामुत्तरस्य करोतेर्व्यवधानः सुडागमसद्वकाकारादेर्न भवतीतिस्यार्थः। तत्र समनिकालावधारणे विशेषेण विहितोद्विर्वचनेकात्सूर्वः सुड्यपरिभ्यामव्यवहितकरोतेर्व्यवधानमविष्यतीति परत्वात् ४=

षविधिर्भवतीसकृतस्य द्विर्वचनेसुट् क्रियतइति नदोषः स्थानेद्विर्वचनेस्थानिवद्भावादेकएवकरोतिः सचाव्यवहितइतिचकारात्सूर्वः सुट्प्राप्तः कात्सूर्वेयग्रहणेनककारात्सूर्वः क्रियतइति दोषाभावः। विशेषविधानेतु पूर्वमेव सुट् क्रियतइतिपक्षद्वयेपि दोषाभावः। उपसृष्टइति। संबद्धइत्यर्थः द्विःप्रयोगे च द्विर्वचने द्वयोः साधारणोर्थ इति द्वावप्यर्थवंतावितिपरस्यरूपस्यार्थद्वारकउपसर्गसंबंधो न विरुध्यते। समुदायस्य त्वर्थवत्त्वामाश्रित्य संबध्यते। विसृष्टापेतिकेन अनर्थक इति॥ ॥

=वक्ष्यतइति। सुविनिर्दुर्भ्य इति सूत्रे। तत्राहि विस्वपृक्‌इति स्थितेऽयर्थत्वासिद्धे द्विर्वचनेऽनुपूर्वेस्थानेवित्वात् निदर्शनेसमीतिकतसंप्रसारणग्रहणं अभ्यासस्य संप्रसारणलोपितस्यानर्थकत्वात्सत्वाभावइत्युक्तं। ५=

भा०कै०६ उपदेशिवद्वचनं चेति। अन्यथा परत्वाद्याश्रयत्वात्सुटो बहिरंगत्वादसिद्धत्वाल्लिटि गुणो न स्यात्। चङि. चदीर्घो लघोरिति दीर्घप्रसंगः संयोगोपधग्रहणमिति। ततो व
६७ चनेनासिद्धत्वं बाध्यते। परमिति। अनेन परत्वाद्याश्रयत्वं सुटो निवार्यते। अनुतस्त्वेषे वृति ड्. क्षुधातूपसर्गसंबंधे सुटा भाव्यमित्यर्थः। कुरोतिनाचे हतदादि
विधिर्नास्ति विशेषणासंनिधानात्। अतः कृकमीसत्र संसाधिकाएत समासे नाक्षिप्तमुत्तरपदं हि शाद्रेन विशेष्यत इति भवति तदादिविधिः। अनिगतो च

=उपदेशिवद्वचनेतु सुटोंतरंगत्वेनासिद्धत्वाभावात् गुणदीर्घाभावो सिद्ध इति भावः। उपदेशिवदिसस्य च प्रत्ययो लक्षतेः प्रर्यमित्यर्थः। एवं चास्य बहिर्भूतोपसर्गापेक्षत्वं गुणदीर्घयोरस्य बहिर्भूतप्रत्ययापेक्षत्वात् समत्वसाम्यम्। २= नन्वतः कृकमीसादिव कोरोसाधाविस

उपदेशिवद्वचनं च। उपदेशिवद्भावस्य वक्तव्यः। किं प्रयोजनं। लिटि गुणचङि. दीर्घप्रतिषेधार्थं। लिटि गुणार्थं तावत् संचस्करतुः संच
स्करुः। चङि. दीर्घप्रतिषेधार्थं च। समचिस्करत्। लिटि गुणार्थेन तावन्नार्थः वृश्यस्येन तु। संयोगादेर्गुणविधाने संयोगोपधग्रहणं
कृत्रर्थमिति। चङि. दीर्घप्रतिषेधार्थेनापि नार्थः। परमिती यं भगवतः कृत्स्निमासंज्ञायुक्तमिह दृष्टव्यं किमंतरंगं किं बहिरंगमिति।
धातूपसर्गयोः कार्यमन्तरंगं। कुत एतत्। पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेने ति नैतत्सारं। पूर्वं धातुः साध
नेन युज्यते पश्चादुपसर्गेण। साधनं हि क्रियां निर्वर्त्तयति तामुपसर्गो विशिनष्टि अभिनिर्वृत्तस्य चार्थस्योपसर्गेण विशेषः।
१ शकोवक्तुं ॥ ॥ श्री

=इणपिनरिमिति. ततश्चातः कृकमीसत्रवर्णग्रहणाभावे पितदादिविधिः प्रवर्त्तत इति भावः। १= =कुथ्मानिरूपितं विशिष्टं यत्क्रियान्तस्य नादीपःसाधनसंबंधस्तदाश्रयेणेत्यर्थः। २=

नौ व प्रत्यय इसतु प्रत्ययग्रहणेन ज्ञापितं धातुना विशेषणेन तदादिविधिर्भवतीति॥ युक्तमिति। यद्युक्तं तदेव दर्शनमर्हतीति तदेवाश्रयणीयमित्यर्थः। पूर्वं धातु
रिति। विशिष्टक्रियासाधनेनार्थलाभाय संबध्यते इति पूर्वं विशेषणेन युज्यत इत्यर्थः। इतरेतत्र्वस्वरूपा क्रियाविशेषणमाकांक्षतीति मत्वाह। नैतदिति॥ एम०
इतरे विशिष्टा क्रिया साधनेन सा धातेन तु साधनाल्लब्धस्वरूपान्यतो विशेषं लभत इति मत्वा बुद्धिनिरूपितने विशिष्टसाधनाभाविसंबंधाश्रयणमाह॥ ६७

ससम्मिति। सर्वे तद् इति। धातुसंज्ञाया अपीसर्थः। यस्माद्धातूपसर्गसमुदायेन विशिष्टा क्रिया प्रतिपाद्यते अडादिव्यवस्थार्थं तु पृथग्धातूपसर्गप्रकल्पनं। तत्र संस्कृशब्दे व्यवस्थि
त एव सुट् भवति पश्चात्समुदायावयवस्य तेनार्थेनार्थवतो धातुसंज्ञा। यदि पुनरिति। सुट् गिति ककारमनुबंधं कृत्वेत्यर्थः। संस्करोतीति। समः सुटि सुच्यमाने संभज्यत्वात् सुटः

=उपसर्गार्थविशिष्टधातोः शक्तिः उपसर्गो द्योतक इति भावः। १= =ननु सुट् स्वर्णंतत्व इति विकल्पेन आह ककारमिति। १=

सत्यमेवमेतत्। यस्त्वसौ धातूपसर्गयोरभिसंबंधः तमभ्यंतरं कृत्वा धातुः साधनेन युज्यते। अवश्यं चैतदेवं विज्ञेयं यो हि मन्यते पूर्वं धातुः साधनेन यु
ज्यते पश्चादुपसर्गेणेति तस्यास्यते गुरुणेत्यकर्मकः उपास्यते गुरुरिति केन सकर्मकः स्यात्। एवं च कृत्वा सुट् सर्वतो। तदंगत एको भवतिका पूर्वे यग्र
हणं चापि शक्यमकर्तुं यदि पुनरयं सुट् कात्पूर्वोन्तः क्रियते। कात्पूर्वोन इति चेद् द्विविधिप्रतिषेधः कात्पूर्वोन इति चेत् सुटः कश्चिद्विधेयः कश्चित्प्रतिषेध्यः
संस्कर्तो समो विधेयः सुटः प्रतिषेध्यः। समस्तावन्न विधेयः। वक्ष्यतेतत्पुंकानां सत्वं रुत्वविधौ ह्यनिष्टप्रसंग इति। सुटश्चापि न प्रतिषेध्यः
त्रापि प्राप्नोति अथ विज्ञायते अकारान्तं यदुपदेश इति न दोषो भवति ननु चाकारान्तं यदुपदेश इत्यपि विज्ञायमाने ॰ त्रापि प्रा

=अदुपदेशादेव ... ॥१८= ॰ प्नोति॥ ॥

सविज्ञेयः। तास्यनुदात्ते। कथमिति यदोपदेशोकारेण विशेष्यते तदा तदन्तविधिसद्भावादकारान्त उपदेश इत्यर्थः संपद्यते यदा तूपदेशेनाकारो विशेष्यते निपातनाच्च

विशेषणस्य परनिपातः तदा अकार उपदेश इत्यर्थः इति पक्षद्वयसंभवात्प्रश्नः। हत इति। हन्तेरकार उपदेशो भवति ततः परत्वसार्वधातुकमिति स्वरप्रसंगः हन्तिः

स्त्वकारान्त उपदेशो न भवतीत्यकारान्त उपदेश इति विज्ञायमाने न दोषः॥ ॥श्री॥ ॥ ॥

एतदपीति अथ हकार एवादंततया कस्मान्नाश्रीयते नैतदस्ति समुदायपरत्वादुपदेशस्य नास्ति हकारस्यो[illegible]पदेशत्वं तथाहि हंतिर्नकारांतो व्यवसितउ पदेयो हकारस्तु कल्पितो कारांतत्वे नेति नासाविह गृह्यते अर्थवनेति। यशब्दोऽर्थे सामोपादानाप्यामेदं प्रतिपद्यते यथाद्यायेस्त्रे एधातुस्ततश्चैकाजिति व्यपदिश्यते अनर्थकस्य भेदनिबंधनाभावाद्ध्यपदेशिवद्भावाभावः माहिधुक्षातामिति लोपेकृते कारादुपदेशात्स एंलसार्वधातुकं नभवतीति

=अवयवस्तु समुदायस्तु अवयवानामि दिनोपदेशकरणलमितिभावः॥ [redacted] वानर्थस्य॥

एतदपिहि व्यपदेशिवद्भावेनाकारांतमवस्तुपदेशे अर्थवताव्यपदेशिवद्भावः यदितर्हि अकारांतंपरउपदेशे इति विज्ञायते माहिधुक्षातां माहिधुक्षाथामत्रापिप्राप्नोति अस्त्वनुदात्तत्वे कृते लोपः उदात्तनिवृत्तिस्वरेणासिद्धं नसिद्ध्यति इदमिह संप्रधार्यमनुदात्तत्वं क्रियतां लोपइति किमत्र कर्तव्यं परत्वाल्लोपः एवं तर्हि इदमद्य लसार्वधातुकानुदात्तत्वं प्रत्ययस्यापवादः नचापवादविषय स्वर उत्सर्गोऽभिनिविशते पूर्वंह्यपवादाअभिनिविशंते पश्चादुत्सर्गाः प्रकल्प्य वापवादविषयं तत उत्सर्गोऽभिनिविशते [redacted]

॥ ॥

नास्त्यनुदात्तत्वप्रसंगः उपदेशेयदकारांतमित्यत्र तु पक्षेकस्य सोपदेशोऽकारांतत्वात्कृतेपिलोप एकदेशविकृतस्यानन्यत्वात्ततउत्तरं ल[illegible]सार्वधातुकमिति स्वरप्रसंगः॥ ॥ ॥श्री॥ ॥श्री॥ ॥०॥ ॥

तन्न तावदुच्यते इति लसार्वधातुकस्य प्रसंग्या घुदात्तत्वं न प्रवर्त्तेत इत्यर्थः। सोसाविति परत्वाल्लोपे कृते उदात्तनिवृत्तिस्वरः क्रियतां लसार्वधातुकानुदात्तत्वं
वेति विचारे यद्यपि परत्वाल्लसार्वधातुकानुदात्तत्वं भवतीति तथापि पुनः प्रसंगविज्ञानाद् उदात्तनिवृत्तिस्वरो भवत्येव। नस्यैवाद्युदात्तत्वं स्यादिति ज्ञापयति

[redacted]

[redacted] तन्न तावदत्र कदाचित्सयस्वरो भवति अपवादविषयं लसार्वधातुकानुदात्तत्वं प्रतीक्षते त
त्रानुदात्तत्वं क्रियतां लोप इति किमत्र कर्त्तव्यं परत्वाल्लोपः यद्यपि परत्वाल्लोपः सोः सावविद्यमानो दात्ते उदात्तो लुप्यते तास्या
दिभ्यो ऽनुदात्तत्वे सप्तमीनिर्देशो ऽभ्यस्तसिजर्थः तास्यादिभ्य अनुदात्तत्वे सप्तमीनिर्देशः [redacted] कर्त्तव्यः लसार्व
धातुक इति कृत्यं किं प्रयोजनं अभ्यस्तसिजर्थः अभ्यस्तानामादिरुदात्तो भवति लसार्वधा [redacted]
तुके सिजन्तस्यादिरुदात्तो भवति लसार्वधातुके लसार्वधातुकमित्युच्यमाने तस्यैवाद्युदात्तत्वं स्यात् यदि सप्तमीनिर्देशः क्रियते
१ लसार्वधातुके तास्यादीनामेवानुदात्तत्वं प्राप्नोति॥ ॥

सप्तमीनिर्देशे ऽभ्यस्तानामादिरुदात्तो लसार्वधातुकं चोदात्तमिति सूत्रार्थः स्यात् वचनसामर्थ्याच्च युगपद्यं स्यात् यथा तस्मात् तवै युगपदित्यत्र पर्यायो वा
प्रसज्येत। न चैतच्छक्यते वक्तुं लसार्वधातुकमित्यपदुच्यमाने ऽर्थाद्विभक्तिविपरिणामो भविष्यतीति यथा श्रुतसंबंधसंभवे विभक्तिविपरिणामस्यायोगात्॥०॥

= वकाराभावादन्यस्य कार्यित्वेन निर्देशो ऽवेतिभावः। १ —

भा०कौ०६ तास्यादिभ्य इसे षेति अचकृतार्थयोर्हि पंचमी सप्तमीनिर्देशास्तु नात्र तत्कृतार्थः संघातः कार्यी इति नतन्त्स्थानस्य सर्वस्यानुदात्तत्वेन भाव्यं नत्वादेः परस्येति विवचनाद
८३

नैष दोषः तास्यादिभ्य इसे षा पंचमी लसार्वधातुक इति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तास्यादिस्तु नररस्येति चित्स्वरात् तास्यादिभ्योऽ
नुदात्तत्वं विप्रतिषेधेन चित्स्वरात् तास्यादिभ्योऽनुदात्तत्वं भवति विप्रतिषेधेन चित्स्वरस्यावकाशः चलनः चोपनः तास्यादिभ्योऽनु
दात्तत्वस्यावकाशः आस्ते शेते इहोभयं प्राप्नोति आसीनः शयानः तास्यादिभ्योऽनुदात्तत्वं भवति विप्रतिषेधेन नैष युक्तो विप्र
तिषेधः किं कारणं द्विकार्ययोग एव विप्रतिषेधः किं तर्ह्यसंभवोपि ननु चात्रास्ति संभवो यदुभयं स्यात आदेरनुदात्तत्वमन्तस्य चो
दात्तत्वमिति अस्ति च संभवो यदुभयं स्यात्। नैषोऽस्ति संभवः आदेरनुदात्तत्वमंतस्य चोदात्तत्वमिति कथं वक्ष्यत्येतत् स्वरवि
धौ संघातः कार्यो भवति मुकश्चोपसंख्यानं मुकश्चोपसंख्यानं कर्तव्यं पचमानो यजमानः मुका व्यवहितत्वादुपदेशाल्ल
सार्वधातुकमनुदात्तं भवतीत्यनुदात्तत्वं न प्राप्नोति ननु चायं मुक् उपदेशभक्तः अउपदेशग्रहणेन गृह्यते न ति
ष्ठति अङ्गस्य मुगुच्यते विकरणांतं चांगं सोऽसौ संघातभक्तः अशक्यो मुगुपदेशग्रहणेन ग्रहीतुं अथाप्यमतो भक्तः सा ॥

×द्विकार्ययोगो हि विप्रतिषेधः। न चात्रैको द्विकार्ययुक्तः× ९ तन्मध्येपातायम उपदेशग्रहणेन वा ठंगृह्येत॥ ॥
×आदेरनुदात्तत्वमंतस्योदात्तत्वं नावकल्पते×५

देः तत्रोदात्तानुदात्तयोरेकविषयत्वादस्ति विरोध इति परत्वाच्चित्स्वरं वाधित्वाऽनुदात्तत्वं भवतीत्यर्थः ॥ ॥श्री॥ ॥०॥ एम० ८३

वक्ष्यतीति सप्तमेध्यायेंगस्ययोऽकारान्तस्य मुगितिसूत्रार्थे व्यवस्थापनात् तत्र स्वावयवेन व्यवधानाभावादुपदेशग्रहणान्मुक्तिसस्य ईमात्रत्वेपि प्रवर्त्तते निघातः प्राप्नोति। तृतीयादेशस्त्वाकारस्यान्त इति तपरकरणान्न भवति स्वरविधौ व्यंजनमविद्यमानवदिति परिहारो नोक्तः हल्स्वरप्राप्तौ व्यंजनमविद्यमानवदित्येवं व्यवस्थापनात् इतश्चेति तुदत इत्यादौ सावकाशं वचनं पचत इत्यादौ न प्रवर्त्तेत शपउपदेशे हलंतत्वादकारान्तत्वाभावादिति वचने इत्वं तस्य कादनुदात्तार्थे अनेकांता इति यद्यपि तस्य लोप इत्यत्रैकांतपक्षः स्थापितस्तथापि पक्षांतराश्रयेणात्र परिहार उक्तः एकांतपक्षेप्युदीचां माङः इति ह्रस्वत्वस्य नि

अडुक्तस्तर्हि भविष्यति तत्कथं वक्ष्यसे तस्य परिहारं इतश्चोपसंख्यानं इतश्चोपसंख्यानं कर्त्तव्यं इड्विधावपवदितत्वादनुदात्तत्वं न प्राप्नोति पचतः पठतः इतश्चानेकांतत्वात् अनेकांता अनुबंधाः यदि अनेकांता अनुबंधा अदिप्रभृतिजुहोत्यादिभ्यः प्रतिषेधो वक्तव्यः। अत्तं जुह्वत इति अ उपदेशादित्यनुदात्तत्वं प्राप्नोति तत्रादिप्रभृतिभ्यः प्रतिषेधः स्थान्यादेशाभावात् तत्रादिप्रभृतिभ्यो जुहोत्यादिभ्यः प्रतिषेधः अनर्थकः प्रतिषेधः प्रतिषेधः अनुदात्तत्वं कस्मान्न भवति स्थान्यादेशाभावात् नैवात्र स्थानिनं नैवादेशं पश्यामः अनुदात्तौ ङ्ग्रहणाद्वा अथवा परस्यमनुदात्तौ ङ्ग्रहणं करोति तज्ज्ञापयत्याचार्यः न लुग्विकरणेभ्योऽनुदात्तत्वं भवतीति नैतदस्ति ज्ञापकं॥ ॥ ॥

देशग्रहणात् ज्ञापकात्कार्येषामनुबंधानामप्रतिबंधकत्वमनुमीयते अत इति यथा पचाव इति ह्रस्वेपि दीर्घत्व उपदेशग्रहणान्निघातो भवत्येवं ग्लाप्नोऽपि प्राप्नोतीति भावः नैवात्रेति आदेशस्यात्राभावरूपत्वादुपदेशात्संलसार्वधातुकं न भवति न च स्थानिवद्भावोस्त्यल्विधित्वात् नापि मस्य यलक्षणं वर्णाश्रयत्वात् पचाव इत्यत्र तु दीर्घीभूतोऽकारो विद्यत एवेति प्रवर्त्तते निघातः। अनुदात्तौ ङ्ग्रहणं द्वेति। आस्ते शेत इत्येवमाद्यर्थात्॥ ॥ ॥

विंदाते इति विंदी धितिविरिभ्यः प्रतिषेधमनाश्रित्येदमुक्तं विकरणेभ्य इति सिद्धं तु पूर्वस्य कार्यातिदेशादिसन्नपेक्ष्य चोद्यप्रतिसमाधाने उक्ते आदिः अनिटः
पित इति अनिटः सिचः परः पित्सार्वधातुक उदात्तो भवति पक्षे तु उदात्तत्वेन माहिकार्षमिति सिद्धं तं पक्षे आद्युदात्तं पक्षे तु तोदात्तं भवति अन्यथाधातुस्वरेणानि

=गाधृकुधादिभ्यइत्यनेनयुक्तं आतोऽनिटइत्यादौ स्वकार्यस्याप्यतिदेशात्सन्नपेक्षेतिभावः। २=

अनर्थमेतत्स्यात्। विंदाते। विंदाते। यत्र हि इ. दृहणं करोति नहि अनर्थविकरणं इ. दृस्ति इ. तोनुदात्तत्वे विकरणेभ्यः प्रतिषेधोव
क्तव्यः चिनुतः सुनुतः लुनीतः पुनीतः इ. तर्ह्यस्यनुदात्तत्वमप्राप्नोति इ. तोनुदात्तत्वे विकरणेभ्योऽप्रतिषेधः सर्वस्योपदेशविशेषणात्वा
त् इ. तदनुदात्तत्वे विकरणेभ्योऽप्रतिषेधः अनर्थकः प्रतिषेधोऽप्रतिषेधः अनुदात्तत्वं कस्मान्न भवति सर्वस्योपदेशविशेषणात्वा
त्। सर्वमुपदेशग्रहणेन विशेषयिष्यामः उपदेशेऽनुदात्तेतः उपदेशे इ. तः उपदेशेऽकारान्तादिति आदिः सिचोऽपि च आद्युदात्त
त्वेऽनिटः पित उपसंख्यानं सिच आद्युदात्तत्वेऽनिटः पित उपसंख्यानं कर्तव्यं माहिकार्षं अनिट इति किमर्थं माहिलाविषं स्व
पादि हिंसा। स्वपादीनां वावचनात् अभ्यस्तस्वरो विप्रतिषेधेन स्वपादीनां वावचनादभ्यस्तस्वरो भवति विप्रतिषेधेन स्वपादीनां वावच
नस्यावकाशः स्वपंतिनिम्नवंति अभ्यस्तस्वरस्यावकाशः ददति दधति इहोभयं प्राप्नोति जाग्रति अभ्यस्तस्वरो भवति विप्रतिषे
धेन॥ ॥श्री॥ ॥

=अभ्यस्तानुदात्तत्वेन.२=

समाद्युदात्तं स्यात् माहिलाविषमिति पक्षे आद्युदात्तं सिद्धं तं पक्षे मध्योदात्तं सिचः स्वरेणानुदात्तं नोदात्तं स्वपादि आगणांताः स्वपादयः स्वपंतीति पक्षे आद्यु
दात्तं परं पक्षे प्रत्ययस्वरेण मध्योदात्तं॥ ॥श्री॥ ॥७॥ ॥श्री॥ ॥

अनु माहिस्म दधादिति शास्त्रीयेऽनुदात्ते गर्त्तमाणोऽन्तिस्मत्वादन्तरंगत्वादेकारलोपे कृते चोऽनुदात्तस्य परस्याभावादाद्युदात्तत्वं न स्यात् बहुव्रीहिविज्ञाने तु भव
ति दधास्वत्रेति अत्र पणादेशस्य बहिरंगत्वादसिद्धत्वादपि स्वरः सिध्यति सर्वस्य सर्वशब्द उणादिषु नोदात्तो निपातितः सर्वस्य विकारः सार्व इत्यत्रानुदा
त्तादिलक्षणोऽन्यथा स्यादिति। तस्य रूप्याद्युदात्तत्वं विधीयते सर्वस्वेनकञ्चसेति तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति साकञ्चस्याप्युदात्तत्वप्राप्ते
वचनं भीह्री अनुदात्ते चेत्याद्युदात्तत्वे प्राप्ते वचनं भ्यादिग्रहणमिति अनुदात्ते चेत्यनेनाद्युदात्तत्वं विधीयते अनेन च प्रत्ययात्पूर्वस्योदात्तत्वमिति वि

अनुदात्ते च अनुदात्ते चेति बहुव्रीहिनिर्देशो लोपयणादेशार्थः अनुदात्ते चेति बहुव्रीहिनिर्देशः कर्त्तव्यः अविद्यमानोदात्तेऽनु
दात्त इति वक्तव्यं किं प्रयोजनं लोपयणादेशार्थं लोपयणादेशयोः कृतयोः आद्युदात्तत्वं यथा स्यात् माहिस्म दधात् दधात्यत्र सर्वस
सुपि सर्वस्वरोऽनकञ्चस्य सर्वस्वरोऽनकञ्चस्येति वक्तव्यं। इह मा भूत्। सर्वके भीह्रीभृ भ्यादिग्रहणं किमर्थं इह मा भूत् ददाति। दधाति
नैतदस्ति प्रयोजनं अभ्यस्तस्वरोऽत्र बाधको भविष्यति अंततउभयं स्यात्। अनवकाशाः खल्वपि विधयो बाधका भवंति साकञ्चा
शशाभ्यस्तस्वरः कोऽवकाशः मिमीते ॥ ॥ ॥

रोधात्वस्पर्शेनवशाभ्यादीनामेव प्रसस्या पूर्वस्योदात्तत्वं भविष्यतीति प्रश्नः ददातीति वचनमंतरेणाविषयविभागो न लभ्यत इति भावः पूर्वोक्तेनाभिप्रायेण
चोरकाह अभ्यस्तस्वर इति सिद्धान्तवाद्याह अंततइति विरोधात्समावेशाभावे पर्यायेणोभयं स्यादित्यर्थः अथवा सर्वेषामभ्यस्तानां पितो लसार्वधातु
कात्पूर्वस्योदात्तत्वं स्यादिति प्रतिपादयितुमाह अनवकाशा इति मिमीत इति ङि. लावसार्वधातुकानुदात्तत्वे कृते अनुदात्ते चेत्याद्युदात्तत्वं ॥ ॥

अथ प्रत्ययग्रहणमिति धात्वादिभ्यः परः प्रत्यय एव पित्त्वं भवतीति प्रश्नः । आटः पूर्वस्येति । आडुत्तमस्य पिच्चेति पित्त्वमाट एव विधीयत इति पक्षाश्रयेणोदमु
क्तं आडागमो न प्रत्ययः । प्रत्यया द्वेति अत्र हि यः प्रत्ययात्पूर्वः स एवाट इति विशेषाभावः । अपिच्चेति पित्त्वं लोडुत्तमस्यैव विधीयते न त्वाट इत्याट्सहितो लो
डुत्तमः पिद्भवतीति तत्र पूर्वस्योदात्तत्वं भवत्येवेत्यर्थः । आट एवेति । लोडादेशात् पितः पूर्वमाड्भवति प्रत्ययात्तु पूर्वो न भवत्याट्सहितस्य प्रत्ययत्वात् पिद्भक्तः

अथ प्रत्ययग्रहणं किमर्थं प्रत्ययात्पूर्वस्योदात्तत्वं यथा स्यात् आटः पूर्वस्य मा भूदिति विभयानि न चैवास्ति विशेषः प्रत्ययाद्वा पू
र्वस्योदात्तत्वे सत्याटो वा अपिच्च पिद्भक्तः पिद्ग्रहणे न ग्राहिष्यते [redacted] इदं तर्हि प्रयोजनं प्रत्ययात्पूर्वस्योदात्तत्वं यथा स्या
त् । आट एव मा भूदिति एतदपि नास्ति प्रयोजनं । पिद्भक्तः पिद्ग्रहणे न ग्राहिष्यते एवं तर्हि सिद्धे सति प्रत्ययग्रहणं करोति
तज्ज्ञापयत्याचार्यः स्वरविधौ संघातः कार्यी भवतीति किमेतस्य ज्ञापने प्रयोजनं । चित्स्वरात्थास्यादिभ्यो नुदात्तत्वं विप्रतिषेधे
नेत्युक्तं तदुपपन्नं भवति ॥ ॥ ॥

इति तत्र स्वस्यावयवेन पौर्वापर्याभावः । एवं तर्हीति प्रत्ययग्रहणमन्तरेण साद्गुणितः पूर्वस्योदात्तत्वे सिद्धे प्रत्ययग्रहणं प्रत्ययात्पूर्वस्यावयवोदात्तत्वं यथा स्यात् सं
घातस्य मा भूदित्येवमर्थं संघातस्य चकार्यित्वे पर्यायेणोदात्तत्वप्रसंगः । यदि च स्वरविधौ संघातः कार्यी भवतीति तत्रस्त्विन्निहूस्वर्थमिह प्रत्ययग्रहणमर्थवद्भवतीत्य
र्थः । चित्स्वरादिति । यतो लसार्वधातुकस्य सर्वस्यानुदात्तत्वं न त्वादेः ततो विप्रतिषेध उपपद्यते एकस्मिन्विषये प्रसंगादुदात्तानुदात्तयोरित्यर्थः ॥ ॥

पूर्वग्रहणमिति प्रत्ययेपि तीति वक्तव्यमिति प्रश्नः स्वरविधौ सन्नम्य इति संघातस्य प्रत्ययान्तस्य कार्ये निवृत्त्यर्थं पूर्वग्रहणं स्वरविधौ नहि इदं तत्स्य कार्यित्वं ज्ञापयती
त्यर्थः तदन्त पक्षे चायमर्थः स्यात् ध्यादिविहितप्रिंदंतस्योदात्तत्वं भवतीति उपोत्तमं रितीति अत्र हि रिति प्रत्यये परत उपोत्तमोदात्तप्रसंगो रित्प्रत्ययान्तस्य चोपोत्त
मोदात्तत्वमिष्यते चतुर्थ्यन्तेति असर्वनामस्थानग्रहणानुवृत्त्या षड्त्रिचतुर्भ्यो हलादिरिति हलादेश्चोदात्तत्वविधानाच्छस एव भविष्यतीति भावः भवत्से

अथ पूर्वग्रहणं किमर्थं न तस्मिन्निति निर्दिष्टे पूर्वस्येति पूर्वस्य भविष्यति एवं तर्हि सिद्धे सति यत्पूर्वग्रहणं करोति तत् ज्ञापयत्याचा
र्यः स्वरविधौ सन्नम्यस्तदंतसन्नम्यो भवतीति किमेतस्य ज्ञापने प्रयोजनं उपोत्तमं रितीति रिदंतस्य चतुरुत्तरस्यां चतुरः तस्य यद्येत तज्ज्ञाप्य
ते चतुरः शसीति शसं तस्यापि प्राप्नोति शस्ग्रहणसामर्थ्यान्न भविष्यति इतरथा हि तत् नैवायं ब्रूयात् ऊडिदं पदाद्यप्पुम्रैद्युभ्यः चतु
र्थ्यन्तेति। अथ पित्ग्रहणं किमर्थं इहमाभूत् जायति नैतदस्ति प्रयोजनं भवत्येवात्र पूर्वेण इदं तर्हि प्रयोजनं दृषिद्रिति आकारेणाव्यव
हितत्वान्न भविष्यति लोपे कृते नास्ति व्यवधानं स्थानिवद्भावाद्व्यवधानमेव प्रतिषिध्यते। न स्थानिवद्भावः स्वरविधिं प्रति न स्थानि
९ वद्भवति॥ ॥श्री॥ ॥

× एणादेशे कृते नास्ति स्वरभेदः। ननु स्वरभिन्नस्य प्राप्नुवन्न ×

वात्र पूर्वेणेति अभ्यस्तानामादिरित्यनेन। ननु च स्वरभेदो भवति अनेन पूर्वस्य ऋकारस्योदात्तत्वं भवति तत्र च्चोदात्त स्वरितयोर्यण इति स्वरितप्रसंगोभ्यस्ताना
मादिरित्यनेन तूदात्तत्वे परमाद्युदात्तं भवति एवं तर्हि निसत्वात् पूर्वेयणादेशो प्यनिसः एवं तर्हि स्पष्टोदाहरणं तरसद्ज्ञान्नस्तु प्र भाष्यकारेणोत्त न्निन्द्रपिन्ने दृषि
द्रतीति अत्रेकारस्योदात्तत्वमाभूदाद्युदात्तमेव यथा स्यादित्येवमर्थं पित्ग्रहणमित्यर्थः लोपे कृत इति भ्राभ्यस्तयोरात इति परत्वाल्लोपः॥ ॥

अचन्न जायतेस्वयमेवेति अंतर्भावितण्यर्थत्वाज्जनिः कर्मकर्त्रे[redacted] विषयः एवं द्वादशधा जज्ञे इत्यादौ चांतर्भावितण्यर्थस्य सकर्मकस्य दृश्यते प्रयोगः नकर्तव्य
मिति योगविभागमंतरेणोपदेशग्रहणानुवृत्त्यैव सिद्धत्वात् तेन येविभाषेति यकारादिप्रत्ययविषयमावउपदेशे जनादीनामात्वविधानादिह च तास्या

=आत्वविधावुपदेशग्रहणानुवृत्त्यैवइतिविषयस्य ... एवं द्वादशधेति अत्राहिरण्यगर्भ एव देवमनादिनिर्दे

अचः कर्तृयकि यकि परे उपसंख्यानं यकि परे उपसंख्यानं कर्तव्यं स्तीर्यते स्वयमेव उपदेशवचनात् सिद्धं उपदेश इ
ति वक्तव्यं उपदेशवचने जनादीनां उपदेशवचने जनादीनां स्वरो न सिध्यति जायते स्वयमेव जायते स्वयमेव योगविभागा
त्सिद्धं योगविभागः करिष्यते अजंतानां कर्तृयकि इति वा आदिरुदात्तो भवति चीयते स्वयमेव चीयते स्वयमेव जायते स्वयमेव
जायते स्वयमेव। ततउपदेशे चाजंतानां कर्तृयकि वा आदिरुदात्तो भवति स्तीर्यते स्वयमे स्तीर्यते स्वयमेव तत्र ह्युपदेशग्र
हणं कर्तव्यं नव्यंतरेण उपदेशग्रहणं योगांगं जायते नकर्तव्यं प्रकृतमनुवर्तते क्व प्रकृतं तास्यनुदात्तेन् ङिददुप
देशाल्लसार्वधातुकमनुदात्तमह्न्विङोरिति ननु चोक्तमुपदेशे जनादीनां स्वरो न सिध्यतीति नैष दोषः नैवं विज्ञायते उपदे
शवचने जनादीनां स्वरो न सिध्यतीति कथं तर्हि जनादीनामप्यात्वे उपदेशवचनं कर्तव्यमिति तत्र हि तत्रोपदेशग्रहणं कर्त
व्यं नकर्तव्यं प्रकृतमनुवर्तते क्व प्रकृतं अनुदात्तोपदेशव नतितनोत्यादीनामनुनासिकलोपो झलि क्ङितीति यत्विव
वचने

दित्वाद्दुपदेशग्रहणानुवर्तनादुपदेशे जंतस्य कर्तृयक्याद्युदात्तस्य विधानात्सर्वत्रेष्टविषये स्वरः सिद्धः पत्तिसेऽग्रहणमिति। इड्ग्रहणादेव यत्वसे

=यदुपदेशोऽनर्थः।१= (१ उग्रहीष्यत इति प्रश्नः॥ ॥श्री॥ ॥श्री॥ ॥

पपक्थेति घलीसनेनयत्नं नस्यप्रहणाद्ग्रापंतोदात्तत्वं पक्षे चाद्युदात्तत्वंस्याद्वित्स्वरेण मध्योदात्तत्वं चेष्यते इदं ग्रहणं तु यदेडागमः क्रियते पेचिथेति तदा दात्तत्वा
र्थं स्याद्घ्याच लुल्वियेस्याद्दौ चतुर्णां पर्यायेणोदात्तत्वविधानेयपि [redacted] थेस्याद्दौ चेतु र्थो भावे पि पर्यायेणोदात्तत्रयं भवत्से
व मिड्भावे पि पपक्थेत्यत्रस्यात् संज्ञायाम्। प्रत्ययलक्षणेनेति चंचेवंचादधिकेव धिके स्याद्दौ संज्ञायामिति विहितस्य कनो लुम्मनुष्य इति लुविधानात्। अंगाधि

=तदुपपादयति·यथावेति·२=पर्यायेणेति·अनुदात्तमितिपरिभाषयेतिभावः।एतेनसन्निधियोगशिष्टत्वाभावोदर्शितः।२=चतुर्थेतिअन्मलरस्याग्रहणेवा॥=नन्वाद्यंतस्वदव्यविकल्पेन स्वरविधानादिडभावेकथंप्रवर्तिःस्यादतआह·इडग्रहणंकिं ति·२=
लित्स्वरभावेपीत्यर्थः।२=

इडंतो वेत्युच्यमाने इहापि प्रसज्येत पपक्थ नैतदस्ति प्रयोजनं अचइति वर्त्तते इदं तर्हि प्रयोजनं ययाथेति संज्ञायां किमर्थमिदमुच्यते
नत्विता दिर्निसमित्येव सिद्धं त्वितीत्युच्यते न चात्र त्वितं पश्यामः प्रत्ययलक्षणेन। नलुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधः अंगा
धिकारेऽस्य प्रतिषेधः नलुमताङ्गस्येति अत उत्तरं पठति उपमानस्याद्युदात्तवचनं ज्ञापकमनुबंधलक्षणे स्वरे प्रत्ययलक्षणप्रति
षेधस्य उपमानस्याद्युदात्तवचनं ज्ञापकार्थं क्रियते किं ज्ञाप्यमेतत् ज्ञापयत्याचार्यः अनुबंधलक्षणे स्वरे प्रत्ययलक्षणं न भवतीति
किमेतस्य ज्ञापने प्रयोजनं गर्गावत्साः विदाः उर्वाः उष्ट्रग्रीवा वामरज्जुः त्वितीत्याद्युदात्तत्वं न भवति इह चात्रयइति तद्धितस्य
॥क्तितइत्यंतोदात्तत्वं न भवति॥ ॥ ॥

=मात्रगतः कार्यं·भावश्चनुबंधाश्रये·

कारइति सौवर्येः सप्तम्यइति वचनान्नलुमताङ्गस्मिन्त्वितिन्यासेपि नास्तिप्रत्ययलक्षणप्रतिषेधइत्यर्थः। अनुबंधलक्षण इति अनुबंधमात्राश्रयस्व
रविषयं ज्ञापकमित्यर्थः उष्ट्रग्रीवेति इवेप्रतिकृताविति विहितस्य कनो जीविकार्थेचापण्य इति लुप्॥ ॥ ॥

पथिप्रिय इति बहुव्रीहौ प्रकृत्या पूर्वपदमिति प्रकृतिस्वरः आद्युदात्तत्वं प्राप्नोति संतोदात्तत्वं चेष्यते सर्वस्तोम इति बहुव्रीहौ प्रकृत्या सेसाद्युदात्तत्वं सर्वदेशादृस्येष्यते। अ
नुबंधलक्षणा इत्येवेति। एवं च कृित्स्वरोऽपि प्रसययलक्षणेन भवति सिच्चाऽवामंत्रितस्वरास्तु भवंति अत्र प इत्यस्य चेतद्यानिम इति ८ कोऽत्रिभगुरुत्वेति लुक्॥

यद्यनुबंधलक्षण इत्युच्यते पथिप्रियो मथिप्रिय इति पथिमथोः सर्वनामस्थान इत्याद्युदात्तत्वं प्राप्नोति एवं तर्ह्याचार्यो ज्ञा
पयति स्वरे प्रसयलक्षणं न भवतीति एवमपि सर्पिरागच्छ सप्ताऽऽगच्छतेति आमंत्रितस्येत्याद्युदात्तत्वं न प्राप्नोति इह च माहिदातां माहि
धातां। आदिः सिचोऽन्यतरस्यामिति स्वरो न प्राप्नोति एवं तर्हि ज्ञापयत्याचार्यः सप्तमीनिर्दिष्टे स्वरे प्रसयलक्षणं न भवतीति। एवमपि
सर्वस्तोमः सर्वपृष्ठः सर्वस्य सुपीत्याद्युदात्तत्वं न प्राप्नोति एवं तर्ह्यनुबंधलक्षण इत्येव कथं पथिप्रियो मथिप्रियः वक्ष्यमेवैत
त् पथिमथोः सर्वनामस्थाने लुकि तु मतालुप्ते प्रसयलक्षणं न भवतीति निष्ठा च द्व्यजनात् निष्ठायां यजिदीर्घत्वे प्रतिषेधो
वक्तव्यः। दत्ताभ्यां। गुप्ताभ्यां। न वा बहिरंगलक्षणत्वात् न वा वक्तव्यः किं कारणं बहिरंगलक्षणत्वात्। बहिरंगो ऽत्र दीर्घः। अंतरंगः स्व
रः असिद्धं बहिरंगमंतरंगे अंतरेणापि चैतां परिभाषां सिद्धं कथं नैवं विज्ञायते न चेदाकारांतानिष्ठेति कथं तर्हि न चेदाकारात्परा नि
निषेधमंतरेण
ष्ठेति॥ ॥श्री॥ ॥

सर्पिरागच्छ सप्तस्वमो नपुंसकादिति सोर्लुक्। माहिदातामिस्य त्रगाति स्थाघ्विति सिचो लुक् निष्ठा च। निष्ठायां यजीति अनाकारांता या निष्ठेसाप्रिसवाग्निकारंभः
॥ ॥श्री॥ ॥

निर्देश इति अनात इति भाष्यमिसम्ये: इह च प्राप्नोतीति। विधिः प्रतिषेधाभावात् नचेदाकार इति तेनाप्नोराद्ध ादौ आकारस्योदात्तत्वाभावः अघाष्ट
इति। एकादेशे कृते आकारः कार्यी साद्युदात्तत्वं न प्राप्नोति। तस्मात्कार्यिविशेषणपक्षेप्यवश्यपाश्रयितव्या बहिरंगपरिभाषेत्याह। तस्मादिति। बहिरंगलक्षण
त्वादिति तेन तत्तु सूच्यते अवश्यपाश्रयितव्यत्वादस्याः परिभाषाया यस्त्वघाष्ट इत्यत्रैकादेशस्य बहिरंगत्वादसिद्धत्वादनादिति प्रतिषेधाभावः आशि

यद्येवं निर्देशश्चैवं नोपपद्यते न ह्येषा आकारात्परा पंचमी युक्ता इह च प्राप्नोति आप्नोराद्ध इति एवं तर्हि नचेद् वर्णोसराति
ष्ठेति भवेन्निर्देश उपपन्नः इह तु प्राप्नोति आप्नोराद्ध इति इह च न प्राप्नोति यतः रत इति एवं तर्हि विहितविशेषणमकारांत
ग्रहणं नचेदकारांताद्विहिता निष्ठेति एवमपि दत्तः अत्र न प्राप्नोति इह च प्राप्नोति आप्नोराद्ध इति एवं तर्हि कार्यिविशेषण
=अथ्यासादिसस्यस्य ३= माकारग्रहणं नचेदाकारः कार्यी भवति एवमपि अघाष्टः कराष्टः अत्र न प्राप्नोति तस्मात् तत्तु सूच्यते निष्ठायां प्रत्ति दीर्घ
त्वे प्रतिषेधो न गौ बहिरंगलक्षणत्वादिति। आशितः कर्त्तो किं निपात्यते आशितेकर्त्तरि निपातनं उपधादीर्घत्वमाद्युदात्त
त्वं च आशित इति क्तं कर्त्तरि निपात्यते आशितवान् आशितः उपधादीर्घत्वमाद्युदात्तत्वं च निपात्यते आद्युदात्तत्वमनि
१ पातमधिकारात् सिद्धं उपधादीर्घत्वम निपात्सं [redacted] ॥ ॥

तः सकर्मकत्वाद् शेः कर्त्तर्ये प्राप्तः क्तो निपात्यते नचाविवक्षितकर्मत्वादकर्मकत्वप्रदेशात्कर्त्तरि क्तो लभ्यते पचिदृहासादीनामपि कर्मविशेषाविवक्षायां कर्त्तरि
क्तप्रसंगात् तस्माद्यस्य न कदाचिदेकस्मिन्नेवार्थे द्रव्यकर्मणा संबंधः सोऽकर्मको नान्यः॥ ॥ ॥ ॥

=दृषाकालादिभिन्नेन. १=

भा०कै०६ ८८

आङ्पूर्वस्येति याथादिस्वरापवादः प्राद्युदात्तत्वं विधीयते नलक्षणेनेति संहितैवापो ह्यृषेयी पदानि तु पौहृषेयाणीति भावः रिक्ते वेणुरिक्तयोरिति संज्ञायां पूर्वविप्रति षेधान्नित्यो विधिः प्रवर्त्तत इति भावः उपोत्तमं नरितीति रइदस्येत्यन्तो वर्णो रिछहे नोच्यते तस्मिन्सूत्रे मुदात्तमिति वितायमानेनार्थ उपोत्तमग्रहणेनेत्यर्थः

=भात्रदस्तेनेनानुवृत्तमाप्तविभाषाप्राप्ताप्राप्तविभाषा वा संज्ञायां तथाहि मंडूकानुवृत्ता संज्ञायामित्येतदनयोरनुवर्तनेन तत्राप्तविभाषा अथवानुवर्तते परविप्रतिषेधश्चात्र भाषामात्रावि भाषा २२ =पूर्वग्रहणं च्व्यौर्थः नान्यदति नप्रवर्तते १८

आङ्पूर्वस्य प्रयोगः यद्येवमवग्रहः प्राप्नोति नलक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यं यथालक्षणं पदं कर्त्तव्यं रिक्ते विभाषा विभाषा वेति विधानयोः किमियं प्राप्ते विभाषा आहोस्विदप्राप्ते कथं च प्राप्ते कथं चाप्राप्ते यदि संज्ञायामुपमानं निष्ठा च द्यु जनात् इति च नित्ये प्राप्ते आरंभः ततः प्राप्ते अन्यथा त्वप्राप्ते वेणुरिक्तयोरप्राप्ते विभाषा प्राप्ते नित्यो विधिः वेणुरिव वेणुः रिक्तो नाम कश्चित् उपोत्तमं रितीति उपोत्तमग्रहणं किमर्थं नरिति पूर्वमित्येवोच्येत तत्रायमप्यर्थः मतो पूर्वमात्संज्ञायां स्त्रियामित्यत्र पूर्वग्रहणं न क =अनुइत्येव जानातः ४= र्त्तव्यं भवति एवं तर्हि उपोत्तमग्रहणमुत्तरार्थं वक्ष्यत्यन्तरस्यामुपोत्तममित्येव इह मा भूत् माहिस्सदधत्। अन्तो वत्याः। ईवत्यां किमर्थमिदमुभयमुच्यते। नवत्या इत्येवोच्येत वत्या इतीयत्युच्यमाने राजवती अत्रापि प्रसज्येत। अथ वत्या इत्युच्यमाने कस्मादेवात्र न भवति। असिद्धो नलोपः तस्मात्सिद्धत्वान्नैषोऽवती शब्दः कस्तर्हि अन्वती शब्दः यथैव तर्हि नलोपस्यासिद्धत्वान्नावती शब्द एवं वत्व स्यासिद्धत्वान्नावती शब्दः आश्रयात्सिद्धत्वं स्यात् अन्तो वत्या इति॥ ॥ ॥

माहिस्सदधदिति धेटो विभाषा धेट्व्योरिति च्लेश्चङादेशः तत्र त्रिप्रभृतीनामभावात् उपोत्तमत्वं चुङ्. तस्य नास्तीति चङ्एवोदात्तत्वं भवति पूर्वग्रहणे तु क्रि एम० ८८ यमाणे चङ्पूर्वस्य धातोः स्यात्॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

=एद्गपरविप्रतिषेधबाधकत्वमित्यर्थः ।।२=

चौ। चोरतद्धितइति चौयः स्वरो विधीयते स चोः संबन्धी भवतीति षष्ठीनिर्देशः कृतः प्रत्ययस्वरोन्त्रे ति। यत्रानुदात्तः प्रत्ययः स चुस्वरस्यावकाशो दधीचो दधीचेति
भावः स्थानांतरमप्राप्त इति अपवादस्थानं प्राप्नोत्वलवानित्यर्थः तदेवापवादत्वं दर्शयति प्रत्ययस्वरस्येति। प्रत्ययस्वरस्यैवोदात्तनिवृत्तिस्वरेण प्राप्ति:
क्रियत इति प्रत्ययस्वरापवादश्चुस्वर इत्यर्थः कृत्स्वरेण। चांचतेरकार उदात्तः नगोश्वन्निति अंचतिधातुरेव तत्रोपात्तो न तु नांचेः दृ जायामिति प्रतिषि

=अयोदात्तस्वरमाश्रयेआह-कृत्स्वरेणेति।१=प्रत्ययोत्तरप्रसक्तोयोत्तरं प्राप्तेरितिभावः।।२=ननु प्रत्ययस्वरापवादत्वमुपपत्तियोदात्तनिवृत्तिस्वरबाधक त्वोपपादनमयुक्तमत आह-प्रत्ययेति।२= यत्तर्हीति-यद्यपुनरित्यर्थः। अत्राप्येकोनेकापि प्रत्ययस

चौ। चोरतद्धिते। चुस्वरः अतद्धित इति वक्तव्यं इहमाभूत् दाधीचोमाधूचः इति तन्न हि वक्तव्यं न वक्तव्यं प्रत्ययस्वरेणात्र बाधको भविष्यति
स्थानांतरस्याप्राप्तः चुस्वरः प्रत्ययस्वरस्यापवादः अनुदात्तौ सुप्पितावि ति अनुदात्तौ सुप्पितावेतयोरुदात्तनिवृत्तिस्वरः प्राप्नोति। किंकार
णं नगोश्व नृसावर्वर्णेति प्रतिषेधात् नैष उदात्तनिवृत्तिस्वरस्य प्रतिषेधः कस्य तर्हि तृतीयादिस्वरस्य यत्तर्हि न तृतीयादिस्वरो नास्ति द
धीचः पश्येति। एवं तर्हि न तृतीयादिलक्षणस्य प्रतिषेधं शिष्म: किं तर्हि येन केन चिल्लक्षणेन प्राप्तस्य विभक्तिस्वरस्य प्रतिषेधं यदि
विभक्तिस्वरस्य प्रतिषेधः वृक्षवान् तक्षवान् अत्र न प्राप्नोति मतुप्ग्रहणमपि प्रकृतमनुवर्तते ह्रस्वनुड्भ्यां मतुबिति यदि
१ नद्यनुवर्तते ।। ×धात्तनिवृत्तिस्वरः।उदात्तनिवृत्तिस्वरस्य चुस्वरः।प्रत्ययैर्वा इति

=ननु नगो श्वन्निति सूत्रकृतनञो पांचतेर्ग्रहणलक्षणं दधीचे सार्वेतेन निषेधः।तत्राह-अंचतिर्धातुरेव सादि-१= [redacted]

दुर्नलोपः कि न्वितः तृतीयादिस्वरस्येति नगोश्वन्निसत्रसावेकाच इसत स्तृतीयादिग्रहणमनुवर्तते यत्तर्हीति तत्रोदात्तनिवृत्तिस्वरस्य बाधक एव चुस्वर इत्यर्थः
एवं तर्हीति। नगोश्वन्नित्यत्र विभक्तिग्रहणमेवानुवर्तते न तृतीयादिग्रहणमित्यर्थः तत चुस्वरः प्रत्ययस्वरस्य न बाधक इति उपसंख्यानं नारब्धव्यं प्रत्य
यस्वरेण सिद्धत्वात्। वृक्षवानिति मतुपो विभक्तित्वाभावात्प्रतिषेधाभावे ह्रस्वनुड्भ्यां मतुप उदात्तत्वं प्राप्नोति ।। ।। ।।

भा०कै०६ वेतस्वानि कुमुद्ननडवेतसेभ्योऽमतुप्प्रत्ययः तत्र लक्षणविशेषानपेक्षे उदात्तत्वमात्र प्रतिषेधे विज्ञायमाने उदात्तनिवृत्तिस्वरस्यात्र निषेधः प्राप्नोतीत्यर्थः अ
८१ नुबन्धेष इति तदनुबन्धकग्रहणे नातदनुबन्धकस्येति मतुप्ग्रहणे न अतुपो ग्रहणं न भवति वुल्विधौ तुमतोरिसु कारानुबन्धकनिर्देशात् सम्भाषानुपस्था
नाद्वयोरपिग्रहणं यद्यत तर्हीति। तस्य स्थानान्तरप्राप्तत्वमस्त्येव चतुःस्वरस्येत्यर्थः कुमारीति। कुमारशब्दः सावर्णान्त इति ईकारस्योदात्तनिवृत्तिस्व

वेतस्वान् अत्रापि प्राप्नोति मतुप्ग्रहणमनुवर्तते अतुप्रभृतयः यदि तर्हि मतुपो ग्रहणेऽतुपोग्रहणं न भवति वेतस्वानिति व
त्वं न प्राप्नोति। सामान्यग्रहणं वक्ष्ये इह पुनर्विशिष्टस्य ग्रहणं यद्यत तर्हि विभक्तिर्नास्ति दधीचीइति यदि पुनरयमुदात्तनिवृत्ति
स्वरस्यापि प्रतिषेधो विज्ञायेत। नैवं शक्यं। इहापि प्रसज्येत। कुमारीति। सतिशिष्टः खल्वपि चतुःस्वरः कथं चाविस्तुच्यते यत्रा
स्यैतद्रूपं कचास्यैतद्रूपं यजादावुसर्वनामस्थानेऽभिनिर्वृत्ते नकारलोपे अकारलोपे च तस्मात्सुष्ठुच्यते चोरतद्धित इति समा
सस [redacted] समासान्तोदात्तत्वे व्यंजनान्ते षूपसंख्यानं समासान्तोदात्तत्वे व्यंजनान्तेषूपसंख्यानं कर्तव्यं एजकृषतद्वास्तण
१ सम्मितः। हल्स्वरप्राप्तौ व्यंजनमविद्यमानवत्॥ ॥ ॥

रप्रतिषेधप्रसंगः तस्माद्दधीचीसत्रस्थानान्तरप्राप्त एव चतुःस्वर इति चोरतद्धित इति वक्तव्यमेव। सतिशिष्ट इति दध्यच् [redacted] अत्र अत्र इति स्थिते अन्तरंगानपि
विधीन्बहिरंगो लुग्बाधते लुडित्येतच्चेति पूर्वं तद्धितः पश्चाद्दच इत्सलोपः समासस्य व्यंजनान्तेष्विति। उच्चैरदात्तइत्यत्र च इस्तु नु वर्तनेनादजन्तस्य समा राम०
१ समासान्तोदात्तत्वविधानाच्छूलं तस्य न प्राप्नोतीति वचनं॥ ॥ ॥ ८१

हल्स्वरप्राप्ताविति। हल एव प्रकृतत्वादविद्यमानवत्त्वं विज्ञास्यते स्वरप्राप्ताविति प्रकृतत्वाद्व्यंजनस्यैव प्राप्तिः प्रत्येष्यते द्विर्वचनमिति उभयोपादाने स्पष्टावगतिर्भवती
त्यर्थः स्वरितत्वं न प्राप्नोतीति। हल्स्वरप्राप्त्यभावाद्दकारस्याव्यवधायकत्वात्। मौरिकिविधमिति मौरिकीणां विषयो देशः मौरिक्यादिभ्यः षुकार्यादिभ्यो विधल्भक्तौ

हल्स्वरप्राप्तौ व्यंजनमविद्यमानवद्भवतीत्येषा परिभाषा कर्त्तव्या किमर्थमिदमुच्यते न हल्स्वरप्राप्तावविद्यमानवदित्येवोच्येत
स्वरप्राप्तौ व्यंजनमविद्यमानवद्भवतीति वा। द्विर्वचनं तु वद्भवति यदि हल्स्वरप्राप्तौ व्यंजनमविद्यमानवद्भवतीत्युच्यते दधि उदा
त्तादनुदात्तस्य स्वरित इति स्वरितत्वं न प्राप्नोति। उदात्ताच्च स्वरितविधौ व्यंजनमविद्यमानवद्भवतीत्येषा परिभाषा कर्त्तव्या कान्येत
स्याः परिभाषायाः प्रयोजनानि। प्रयोजनं ल्तिदाद्युदात्तं तो दात्तविधयः लितिप्रत्ययात्पूर्वमुदात्तं भवतीति इहैव स्यात् मौरिकिविधं
मौलिकिविधं चिकीर्षकः जिहीर्षक इत्यत्र न स्यात् त्रिसादिभ्यः दात्तो भवतीति इहैव स्यात् अहिचुम्बकायनिः आग्निवेश्यः गार्ग्यः
ह्लतिरित्यत्र न स्यात्। धातोरन्त उदात्तो भवतीति इहैव स्यात् तुरौति पचतीत्यत्र न स्यात्॥ ॥ ॥

=हल्स्वरप्राप्ताविसेतस्याः ३=

लाविति विधल्प्रत्ययः। चिकीर्षक इति रेफषकाराभ्यामीकारस्याव्यवधानात् अहिचुम्बकायनिरिति प्राचामवृद्धात्फिन् बहुलमिति फिन् आग्निवेश्य इति गर्गादि
त्वाद्यञ्। गार्ग्य इति हलादित्वात् अच आदित्वाभावात्॥ ॥श्री॥ ॥श्री॥ ॥

भा॰कै॰ ६ कथं हीति अज्ग्रहणमेतत् अनुदात्तादीनां सर्वविभक्त्यन्त इति सर्वविभक्त्यन्तता वपवत्ता सर्वविभक्त्यन्ततः सर्वेग्रहणमनेकोपलक्षणार्थं सप्तानां विभक्तीनामिहानुयोगा
९०

इदं तावदयुक्तं यदुच्यते हल्स्वरप्राप्तौ व्यंजनमविद्यमानवद्भवतीति कथं हि हलो नाम स्वरप्राप्तिः स्यात् तच्चापि भुवता उदात्तानुस्वरितविधाविति वक्तव्यं तथानुदात्तादेरंतोदात्ताच्च यदुच्यते तद्व्यंजनादेर्व्यंजनान्ताच्च न प्राप्नोति। यदि पुनः स्वरविधौ व्यंजनमविद्यमानवद्भवतीत्युच्येत। अथ स्वरविधौ व्यंजनमविद्यमानवद्भवतीत्युच्यमानेऽनुदात्तादेरंतोदात्ताच्च यदुच्यते तत्किं सिद्धं भवति व्यंजनादेर्व्यंजनांताच्च। नाद्य सिद्धं कथं स्वरविधिरिति सर्वविभक्त्यन्तः समासः स्वरेण विधिः स्वरविधिः स्वरस्य विधिः स्वरविधिः स्वरतो विधिः स्वरविधिरिति। नैवं शक्यं इह हि दोषः स्यात् उदश्वित्वान्घोषः विद्युत्वान् बलाहक इति ह्रस्वनुड्भ्यां मतुबिति सेषः स्वरः प्रसज्येत। अस्तु तर्हि हल्स्वरप्राप्तौ व्यंजनमविद्यमानवद्भवतीति। ननु चोक्तं कथं हि हलो नाम स्वरप्राप्तिः स्यादिति। उच्चैरुदात्तः नीचैरनुदात्त इत्यत्र अच इति निर्दिष्टम् अन्यग्रहणं निवर्तते तस्मिन्निवृत्ते हलोपि स्वरप्राप्तिर्भवति यदप्युच्यते उदात्तानुस्वरितविधाविति वक्तव्यमिति न वक्तव्यं। नेदं पारिभाषिकानुदात्तस्य ग्रहणं किं तर्हि अन्वर्थग्रहणं अविद्यमानोदात्तमनुदात्तं भवति उदात्तानुदात्तस्य स्वरित इति। यदप्युच्यते अनुदात्तादेरंतोदात्ताच्च यदुच्यते तद्व्यंजनादेर्व्यंजनांताच्च न प्राप्नोतीति आचार्यप्रवृत्तिर्ज्ञापयति तत्र सिद्धं तद्भवति व्यंजनादेर्व्यंजनांताच्चेति। यदयं [illegible] अनुदात्तादावपृथिवीरुद्रपूषमंथिष्विति प्रतिषेधं शास्ति सा तर्हि एषा परिभाषा कर्त्तव्या न कर्त्तव्या आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति यदयं यतोऽनाव इति नावः प्रतिषेधं शास्ति॥१०॥ इति श्री॰ व्याकरण॰

ता अविद्यमानोदात्तमिति अजन्त्यमुदात्तोऽनुदात्तात्पर इति दधिशब्दे स्वरितः सिद्धः॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे षष्ठस्याध्यायस्य प्रथ राम॰
मे पादे षष्ठमाह्निकम्॥ ॥पादश्च प्रथमः समाप्तः॥ ॥ ९०

तउत्त॰

बहुव्रीहौ प्रकृत्या पूर्वपदं किमर्थमिति। अंतरेणैतन्नञ्सुभ्यामिति प्रतिषेधस्य सिद्धिं मत्वा प्रश्नः। समासांतविधेरिति समासांतस्योदात्तविधानात्तद्बाधनार्थमिदमित्यर्थः सुकृ
दिति शोभनं लक्षणं कृतवानिति सुकृन्मेधा पेति क्विप्। नञ्सुभ्यामिति सिद्धे विधिरारभ्यमाणो नियमाय भवतीति न्यायात् एवमपीति नानापदस्वरप्राप्तौ समा
सांतोदात्तत्वविधानान्नियमेन तद्बाधनो द्वयोरपि पूर्वपदोत्तरपदयोः प्रकृतिस्वरप्रसंगः। परस्येति उत्तरपदस्य नियमार्थं सति प्रकृतिस्वरे पारिशेष्यात्पूर्वपद
स्यैव प्रकृतिस्वरो भविष्यतीत्यर्थः। क्षेपे विधिरिति। अनुदरः सुदर इत्यादौ पूर्वपदस्यांतोदात्तत्वं क्षेप इति प्राप्तं तद्बाधनार्थं नञ्सुभ्यामिति स्यात् न तु नियमा

=विपरीतलक्षणया क्षेपः।

बहुव्रीहौ प्रकृत्या पूर्वपदम्। किमर्थमिदमुच्यते बहुव्रीहिस्वरं शास्ति समासांतविधेः सुकृत्। सुकृद चार्यः समासांतोदात्तत्वे प्राप्ते बहुव्रीहिस्वरमप
वादं शास्ति नैतदस्ति प्रयोजनं नञ्सुभ्यामित्येतन्नियमार्थं भविष्यति नञ्सुभ्यामेव बहुव्रीहिरंत उदात्तो भवति नान्यत इति। एवमपि कुत एतत्
पूर्वपदप्रकृतिस्वरत्वं भविष्यति न पुनः परस्येति। परस्य शितिशासनात्। शितेर्नित्याबह्वज्बहुव्रीहावित्येतन्नियमार्थं भविष्यति। शितेरेव नान्यत इति। यथा
वदुच्यते नञ्सुभ्यामित्येतन्नियमार्थमिति। क्षेपे विधिर्नञो सिद्धः उदराश्वेषुषु क्षेप इत्येतस्मिन्प्राप्ते तत एतदुच्यते यदप्युच्यते परस्य शि
तिशासनादिति परस्य नियमो भवेत्। परस्यैव नियमः स्यात्। शितेर्नित्याबह्वज्बहुव्रीहावन्यस्मादिति यदि तर्हि पूर्वपदप्रकृतिस्वरत्वं समासांतोदा
त्तत्वं बाधते च प्रियः वा प्रियः अपवाप्यबाधेत अंतस्थवा प्रिये सिद्धं। अंतोदात्तत्वं च वा प्रिये सिद्धं कुतः संभवात्। असति खल्वपि संभवे बाधनं

×भ्यां नियमार्थं तु नञ्सु×५ भवति अस्ति च संभवो यदुभयं स्यात्॥ ॥ ॥ ॥

यं विधिनियमसंभवे विधेर्बलवत्त्वात्। नञ्ग्रहणमुपलक्षणं सोरपि क्षेपविषयत्वसंभवात्। शितेर्नित्याबह्वज्बहुव्रीहावितिशितिलत्वादादिषूत्तरपदप्रकृतिस्वरो नियमेन निवर्तते
न तु चित्रगुप्रभृतिष्वित्यर्थः। तदेवं सूत्रं कर्तव्यत्वेन स्थापितं। च प्रिय इति। चादयोनुदात्ता इति चवा शब्दावनुदात्तौ तयोः प्रकृतिस्वरे समासांतोदात्तत्वं न प्राप्नोति। अस्ति च सं
भव इति। उदात्तानुदात्तयोर्भिन्नविषयो विरोधाभावात्॥ ॥श्री॥ ॥श्री॥ ॥

भा० कै० ६ सत्यपीति सामान्यविशेषविषयत्वनिबंधनत्वात् वाध्यबाधकभावस्य ननु चासत्यपि समासांतोदात्तत्वे प्रियशब्दः प्रत्ययस्वरेणांतोदात्त एव भविष्यति । न च प्रत्ययस्वरस्य
८१ बाधकः पूर्वपदप्रकृतिस्वरः एवं तर्ह्युदाहरणांतरं कुभाष्यकारेण प्रदर्शिता इदं तूदाहरणं समपाद इति समशब्दः सर्वानुदात्तः पादशब्दो वृषादित्वादाद्युदात्तस्तत्र पूर्व
पदप्रकृतिस्वरेण समासांतोदात्तत्वे बाधिते पादशब्दस्याद्युदात्तः श्रूयेत प्रकृत्या द्विधेति उदात्तत्वस्य यत् प्रकृतं विधानं तस्मात् प्रकृतिभावद्वारेण नुज्ञायमानाद्

= असंभवबाधो वेकिल्लि बंधनो बाध्यबाधकभावोत आह सामान्येति । २= बाधक इति । नापाते प्रत्ययस्वरे पूर्वपदप्रकृतिस्वरस्य नार्थं आदिति भावः । ३= उदात्तेति । बहुव्रीहौ समासे पूर्वपदस्येयं ... इति । सत्स्वभावे नाबाधिविकारस्य ... इति भावः । ४=

प्रत्ययेऽपि संभवे बाधनं भवति तद्यथा दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति एवमिहा-
पि सत्यपि संभवे पूर्वपदप्रकृतिस्वरत्वं समासांतोदात्तत्वं बाधिष्यते एवं तर्हि प्रकृत्या द्विधेः बहुव्रीहौ प्रकृत्या पूर्वपदं प्रकृतिस्वरं भवतीति ॥
किं च प्रकृतं उदात्त इति वर्तते एवमपि कार्यप्रियः हार्यप्रियः इत्यत्र न प्राप्नोति । स्वरिते ऽप्युदात्तोऽस्ति अथवा स्वरितग्रहणमपि प्रकृत-
मनुवर्तते क्व प्रकृतं । तित्स्वरितमिति बहुव्रीहाविति सिद्धं अंतरेणापि बहुव्रीहिग्रहणं सिद्धं तत्पुरुषे कस्मान्न भवति । तत्पुरुषे तुल्या-
र्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्या इत्येतन्नियमार्थं भविष्यति ॥ ॥श्री॥ ॥ ॥

प्रियादौ प्रकृतिस्वरो न भवतीत्यर्थः स्वरितेऽपीति नन्वत्र उदात्तसंज्ञा विहिता वर्णैकदेशस्य वर्णग्रहणेन न गृह्यते एवं तर्ह्युदात्तावयवत्वात् स्वरितोऽप्युदात्तग्रहणेन गृ-
ह्यते गौणमुख्यन्यायस्य लक्ष्यदर्शनवशान्नाश्रीयते अत एवास्मिन् पक्षे असमाधेयपक्षांतरमाह । अथवेति बहुव्रीहाविति विनापि बहुव्रीहिग्रहणेन प्रप्र०
बहुव्रीहौ पूर्वपदप्रकृतिस्वरः सिद्ध इत्यर्थः ॥ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥ ८१

द्विगौ तर्हीति। यद्यपि द्विगुस्तत्पुरुषस्तथापि तत्र नियमं तत्र प्रतिपादनाय प्रश्नः। इष्टतश्चेति। प्रयुक्तानामन्वाख्यानान्नानिष्टार्था शास्त्रप्रवृत्तिः। एतेषामिति। तत्पुरुषादीना
मित्यर्थः। समस्ति बहुव्रीहिग्रहणे समासान्तोदात्तत्वस्य पूर्वपदप्रकृतिस्वरस्य चैकविषयत्वाद्द्विगोः धातुपर्यायः प्राप्नोति। चित्रगुस्तत्पुरुषश्चेतः पंचारत्निरित्यादौ यस्मान्न तत्पुरुषादि
षु तत्प्राप्यादीन्येव पूर्वपदप्रकृतिस्वरातिभवेति नान्यानीत्येवं नियमः कृतो न तु प्रकृतिस्वर एवेति नियमस्तस्य पर्यायः द्विपादिति द्वौ पादावस्य द्विपादित्यादौ समासान्तोदात्त

यप्रसंगः।

द्विगौ तर्हि कस्मान्न भवति। इंगते द्विगाविस्ते तन्नियमार्थं भविष्यति। द्वंद्वे तर्हि प्राप्नोति। राजन्यबहुवचनद्वंद्वेऽन्धकवृष्णिष्वित्येतन्नियमार्थं भवि
ष्यति। अव्ययीभावे तर्हि प्राप्नोति। परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेष्वित्येतन्नियमार्थं भविष्यति। एवमपि कुत एतत् एवं नियमो भविष्यति एतेषामेव तत्
पुरुषादिष्विति। न पुनरेवं नियमः स्यात् एतेषां तत्पुरुषादिष्वेवेति। इष्टतश्चावधारणं इष्टतश्चावधारणं भविष्यति। एतेषां तर्हि बहुव्रीहेश्च पर्यायः
प्राप्नोति। द्विपादिष्टेर्विततस्तेषु पर्यायो न प्रकल्पते। यदयं द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहाविति द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहौ ... पर्याये पर्यायं शास्ति तत्
ज्ञापयत्याचार्यः पर्यायो न भवतीति। उदात्ते ज्ञापकं स्वेतत्। उदात्त एतत् ज्ञापकं स्यात्। स्वरितेन समाविशेत्। स्वरितेन च समावेशः प्राप्नोति॥०

=द्विवितस्योक्तत्वपदयोः पूर्वपदप्रकृतिस्वरं द्विगौविति तदर्थः। तत्र सामान्यापेक्षमिदानेषामिहेति।=

त्व पूर्वपदप्रकृतिस्वरोऽपर्यायेण सिद्धाविति द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहाविति स्वंतोदात्तविकल्पो न विधेयो विहितस्तु ज्ञापयति बहुव्रीहिस्वंतोदात्तो भवतीति तत्र यादि
ष्विति तस्योच्चेति ज्ञापकं येषामिह पूर्वपदप्रकृतिस्वरो नियमस्तेषां समासान्तोदात्तत्वं पक्षे न भवतीति बहुव्रीहिग्रहणं प्रसाख्यातं उदात्ते ज्ञापकमिति। इ
होदात्तग्रहणानुवृत्तसाद्धयोरुदात्तयोः पर्यायाभावज्ञापकात् कार्यप्रिय इत्यादौ न उदात्तस्वरितयोः समावेशः प्राप्नोत्येवेत्यर्थः॥ ॥श्री॥

स्वरितेपीति एतत्पूर्वमेव व्याख्यातम्। तत्पुरुषे। कर्मधारये प्रतिषेध इति विशेषणसमासो नञ्‌ तत्पुरुषः। तत्र स्मर्यमाणयोः पूर्वोत्तरपदयोः विभक्तिविशेषमनुपादाय सामान्यलक्षणेनायं समासो विहित इत्यर्थः। नञ्कुनिपातनामिति निपातत्वादेव सिद्धेन प्रत्यग्रहणं विस्पष्टार्थं कारान्तादिस्वरादिबाध

प्रतिपदोक्तयोः॥

=फलांतरमप्याह अकारान्त इत्यादि पुनर्विधानस्य बाधकबाधनार्थता तत्र पदिक ... बाधितत्वात्

स्वरितेषु दृष्टान्तोऽस्ति बहुव्रीहिस्वरं शास्ति समासान्तविधेः सुकृत नञ्सुभ्यां नियमार्थं तु परस्य शिति शासनात् क्षेपे विधिविनेत्रोऽसिद्धः परस्य तु नियमो भवेत्। इत्यन्तस्य बहुव्रीहियेऽपि सिद्धः संभवात्प्रकृताद्विधेः बहुव्रीहावतेऽसिद्धमिष्टतस्त्वावधारणं द्विपादिष्टेऽवितस्तेऽप्यपर्यायो न प्रकल्प्यते। उदात्ते ज्ञापकं तु तत्स्वरितेन समाविशेत्। तत्पुरुषे तत्पुरुषे विभक्तिप्रकृतिस्वरत्वे कर्मधारये प्रतिषेधः तत्पुरुषे विभक्तिप्रकृतिस्वरत्वे कर्मधारये प्रतिषेधो वक्तव्यः। परमकारकं। परमेणकारकेण परमे समे कारके परमकारके इति सिद्धं तु लक्षणप्रतिपदोक्तस्यैव ग्रहणात्। सिद्धमेतत्। कथं। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति प्रतिपदं यो द्वितीया सप्तमी तृतीया समासस्तस्य ग्रहणं। लक्षणोक्तश्चायं अव्ययेपरिगणनं कर्तव्यं अव्यये नञ्कुनिपातनं। अव्यये नञ्कुनिपातानामिति वक्तव्यं। नञ् अब्राह्मणः अवृषलः। नञ्। कु। कुब्राह्मणः कुवृषलः॥ कुनिपात निष्कौशाम्बिः निर्वाराणसिः। इह मा भूत्। स्नात्वाकालकः पीत्वास्थिरकः स्त्वायां वा प्रतिषेधः त्वायां वा प्रतिषेधो वक्तव्यः। स्नात्वाकालकः पीत्वास्थिर

×कारकेण पर×॥ ॥ ॥कः उभयं न वक्तव्यं। निपातनात्सिद्धं किं निपातनं॥ ॥ श्री

=सोहति अव्ययीभावे सति शिष्टमपि प्रत्ययस्य स्वरं बाधितामने वेत्यर्थः। १ सामीप्यादयः स्वरद्योतनिपाताः। २ चिंत्यमिति दिंगादी अंतरुदात्ती भावादिषु सामिकृताद्रीनांपाठात् ...

नार्थस्तेन यच्चोपपदं कृति नञ् तस्य च स्वरो बलीयान् भवति। सैहनिर्दिष्टस्य च नञ्स्वरो बलीयान् भवतीति न वक्तव्यं भवति। स्त्वायां वेति परिगणनं वा कर्तव्यं स्त्वायां प्रतिषेधो वक्तव्य इत्यर्थः नन्वभिन्नफलत्वाद्विकल्पोऽनुपपन्नः परिगणने सति सामिकृतं स्वयं धौतमित्यादिषु प्रकृतिस्वराभावः स्त्वायां प्रतिषेधे तु प्रकृतिस्वरस्य संग इति
वा
॥ चिंत्यमेतत्॥ ॥

अवधारणमत्रेति अनेकप्रयोजनसंपत्तिर्निपातनात्भवतीत्यर्थः तेनैवेति अंतोदात्तानांपाठेनेत्यर्थः सदृश अविरविकन्यायेनेति अविरविक इतिसमुदायैकदेशानु
करणमितितुल्या भांल्लोपाभावः अनेनैवेतदृश्यते अवेर्मांसमितिप्राप्नोपि तद्धितोः न भिधानान्न भवतिकिंतुनः पित्रासदृश इत्यत्राविहितेनतृतीयासमासोभविष्य
बा°
=भप्तरवंसकादित्रु°१=
=दर्पसदेसत्रसदृशग्रहणाभावइतिभावः°१=

अवधारणमत्रसमासार्थत्वमभावार्थंचनिपातनंकर्तव्यं तेनैवयत्नेनस्वरेणभविष्यति सदृश सदृशग्रहणमनर्थकं तृतीयासमास [redacted]
वचनात् सदृशग्रहणंमनर्थकं किंकारणं तृतीयासमास [redacted] वचनात् सदृशशब्देनतृतीयासमासउच्यते तत्रतृतीयापूर्वपदंप्रकृतिस्वरंभव
तीत्येवसिद्धं षष्ठ्यर्थंतर्हीदंवक्तव्यं पितुःसदृशः पितृसदृशइति। षष्ठ्यर्थमितिचेत्तृतीयासमासवचनानर्थक्यं षष्ठ्यर्थमितिचेत्तृतीया
समासवचनमनर्थकंस्यात्। किंकारणं। इहास्माभिस्त्रिशब्द्यंसाध्यंपित्रासदृशः पितुःसदृशः पितृसदृशइति। तत्र द्वयोःशब्दयोःसमाना
र्थयोरेकेन विग्रहः अपरेणवृत्तिर्भविष्यति अविरविकन्यायेन तद्यथा अवेर्मांसमितिविगृह्याविकशब्दादुत्पत्तिर्भवति आविक
मिति एवंपितुःसदृशइतिविगृह्यपितृसदृशइतिभविष्यति पित्रासदृशइतिविगृह्यवाक्यमेवभविष्यति। अवश्यंतृतीयासमासोवक्त
व्यं [redacted] यत्रषष्ठ्यर्थोनास्तितदर्थं भोजनसदृशः अध्ययनसदृशइतियदितर्हितस्यनिबंधनमस्तितदेववक्तव्यं इदंनवक्त
व्यं इदमप्यवश्यंवक्तव्यंयत्रषष्ठीश्रूयतेतदर्थंदास्याःसदृशः वृषल्याःसदृशइति॥ ॥ ॥ ॥

ति भोजनसदृशइति हेत्वाविति भोजनादिभ्यस्तृतीया अत्रषष्ठ्यभावात्षष्ठीसमासाभावः दास्याःसदृशइति षष्ठ्या आक्रोशइत्यलुक् उदात्तयणोहल्पूर्वादिति
१ द्विअक्षे रुद्रात्तं [redacted] ॥श्री॥ ॥श्री॥ ॥

भा० कै० ६
९३

इगंत॰ यणगुणयोरिति पंदस्य स्वरविधानात् सुप्सुपेत्यत्रे निसत्वाघ एणगुणयोः कृतयोरिगन्तत्वाभावात् प्रकृतिस्वरेण न प्राप्नोतीति वचनम् पंचारत्न्यादिति पंचारत्न
यः प्रमाणमेषामिति तद्धितार्थे द्विगुः प्रमाणे लो द्विगोर्नित्यमिति मात्रचो लुक् जसृजसि चेति गुणे गाजसादिषु छंदसो वा वचनमिति वचनान्न भवति तन्नोयणादेशः
नवेति। पदग्रहणस्य परिमाणार्थत्वात् प्राक् सुबुत्पत्तेः स्वरो भवन्निति तरंगः संपद्यते। यणगुणौ तु सुव्यपेक्षत्वात् बहिरंगलात्स्वरे कर्तव्ये असिद्धाविर्सत्वार्थः परिप्रप

= [illegible]

इगंत॰ इगंतप्रकृतिस्वरत्वे यणगुणयोरुपसंख्यानं इगंतप्रकृतिस्वरत्वे यणगुणयोरुपसंख्यानं कर्तव्यं पंचारत्न्यादशारत्न्यः पंचारत्न
यः दशारत्नयः यणगुणयोः कृतयोरिगंतेहि गाविसेषस्वरेण न प्राप्नोति। नवा बहिरंगलक्षणत्वात्। नवा वक्तव्यं किं कारणं बहिरंगलक्षण
त्वात् बहिरंगौ यणगुणौ अंतरंगः स्वरः असिद्धं बहिरंगमंतरंगे परिप्रत्ति परिप्रत्युपायेभ्यो वनं समासे विप्रतिषेधेन। परिप्रत्युपाये
भ्यो वनं समास इत्येतद्भवति विप्रतिषेधेन परिप्रत्युपापाव वर्ज्यमानाहोरात्रावयवेषु इति तस्यावकाशः परित्रिगर्तं परिसौवीरं वनं समास इत्य
स्यावकाशः प्रवणे यक्ष्यं इहोभयं प्राप्नोति। परिवनं उपवनं वनं समास इत्येतद्भवति विप्रतिषेधेन। नवा वनस्यांतोदात्तवचनं तदपवाद
निवृत्त्यर्थं॥ नवा योविप्रतिषेधेन किं कारणं वनस्यांतोदात्तवचनं तदपवादनिवृत्त्यर्थं सिद्धमत्रांतोदात्तत्वमुत्सर्गेणैव तस्य पुनर्वचन

= [illegible] = ९ एतत्प्रयोजनं येन्येतदपवादाः प्राप्नुवंति तद्बाधनार्थं॥ ॥ ॥
= [illegible]

प्रत्युपायेभ्य इति सर्वं निर्दिष्टं शेष उपपरी एव गृह्येते तयोरेव वर्जने विषयत्वसंभवादनशब्दस्य वर्ज्यमानार्थत्वसंभवात्। प्रवणइति तत्पुरुषः वनं समास इत्येत
त्तत्तंत्रकर्मापेक्षया प्राधान्यात् बहुव्रीहितत्पुरुषयोः पूर्वपदप्रकृतिस्वरस्यापवादं मत्वा विप्रतिषेधोपन्यासः अनेन तु सूत्रेण परिशेष्यादव्ययीभावे स्वरविधिः प एम०
९३
९ परिवनमिति वनं वर्जयितेत्यर्थः अपपरीबहिरंचवः पंचम्येत्यव्ययीभावः॥ ॥ ॥

सयथैवेति वाध्यसमुदायापेक्षायांविशेषाभावात्सर्वस्यप्रकृतिस्वरस्यासौबाधकः आचार्यो आनेकस्यापीति। द्वयोर्द्वंद्वे ऽस्यचरितार्थत्वात् बहूनांद्वंद्वे संदेहाद्प्रतिपत्तिः
पर्यायोवाप्राप्नोति लोकविज्ञानादिति। आद्यस्याव्यभिचारिपूर्वपदत्वंमध्यमस्यतुपरापेक्षयापूर्वपदत्वंपूर्वापेक्षयातुनपूर्वपदत्वमितितस्यग्रहणं सर्वपूर्वइति स

सयथैवतत्प्रवादमव्ययस्वरं बाधते एवमिममपिबाधिष्यते आचार्योपसर्जन आचार्योपसर्जने नेकस्यापिपूर्वपदत्वात्संदेहः आचार्योपसर्जने
नेकस्यापिपदस्यपूर्वपदत्वात् संदेहोभवति आपिशलपाणिनीयव्याडीयगौतमीयाः एकंपदंवर्जयित्वासर्वाणिपूर्वपदानि। तत्रनज्ञायतेकस्य
पूर्वपदस्यस्वरेणभवितव्यमिति। लोकविज्ञानात्सिद्धं तद्यथालोके अमीषांब्राह्मणानांपूर्वमानयेति उक्तेयः सर्वपूर्वः सआनीयते एवमिहा
पियत्सर्वपूर्वपदंतस्यप्रकृतिस्वरत्वंभविष्यति महान्व्रीह्य किमर्थंमहतः महच्छब्दउत्तरपदेपूर्वपदप्रकृतिस्वरत्वमुच्यतेनकर्मधारये
निष्ठेसेवसिद्धं नसिद्ध्यतिकिंकारणं श्रेण्यादिसमासइसेवंततःकिंपुनःकारणंश्रेण्यादिसमासइसेवंततत् इहमाभूत् महानिरष्टो दक्षिणादीय
ते कुरुगार्हं कुरुवृज्योर्गार्हपते [redacted] कुरुवृज्योर्गार्हपत इतिवक्तव्यं कुरुगार्हपतंवृजिगार्हपतं [redacted] कुरुगार्हपतरिक्तगुर्वसूतजरस
श्लीलदृढरूपापारेवडवातैतिलकद्रूः पण्यकंबलोदासीभाराणीनामितिवक्तव्यं इहापियथास्यात् देवहूतिः देवनीतिः वसुनीतिः ओषधिश्चंद्रमाः

=अन्यथानिर्देशएवप्रतिषेधःस्यात्। तत्रहिवक्तव्यंनवक्तव्यंयोगविभागः करिष्यते॥ ॥ ॥

वैयांपूर्वइ सत्ययवावयविसंबंधेषष्ठीविधायसमासोविधेयः महान्व्रीहि श्रेण्यादिसमासइतिलक्षणप्रतिपदोक्तपरिभाषयाक्तांतेनप्रतिपदोक्तोयःकर्मधारयस्तस्यग्रह
णमिसर्थः कुरुदासीभाराणीनामितिवक्तव्यमिति॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

पा०कै०६ ए ४ दासीभाराणामिति बहुवचनं द्वन्द्वसमासार्थो ऽयं मत्वा वचनं विभक्त्यलोपस्तु सौत्रत्वान्निर्देशस्य स्यात्। योगविभाग इति नायं द्वन्द्वः किं तर्हि ऽसमस्तान्येव पदानि
निर्दिष्टानि तथा च तैत्तिलकद्रूः पण्यकंबल इति विभक्तिरहिता रीतां तत्र दासीभार शब्दसहचरितेषु तद्रूपारोपेण बहुवचननिर्देशः एवं च गणपाठः संगृहीतो भव
ति पण्यकंबलः संज्ञायामिति कुरुप्रसंगान्त्वात्पूर्वपदप्रकृतिस्वरे सिद्धे नियमार्थं वचनं संज्ञायामेव पण्यकंबलः प्रकृतिस्वरः पूर्वपदो भवति नान्यत्रेति
तत्र नियतप्रमाणो नियतमूल्यो व्यावहारिको यः कंबलस्तस्य पण्यकंबल इति संज्ञेसा दृ। ऽपर आहेति कंबल एवोत्तरपदे पण्यशब्दः प्रकृतिस्वरो य [illegible]

कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैत्तिलकद्रूः पण्यकंबल इति ततः दासीभाराणां चेति तत्र बहुवचन
निर्देशात् दासीभारादीनां चेति विज्ञायते। पण्यकंबलः संज्ञायां। पण्यकंबलः संज्ञायामिति वक्तव्यं योहि पणितव्यः कंबलः पण्यकं
बल एवासौ स्यात्। अपर आह। पण्यकंबल एव यथा स्यात्। क्व मा भूत् पण्यगवः पण्यहस्ती। अहीने। अहीन इति किमर्थं॥ ॥

=नन्वज्ञासेति नियमः कथमत्र समासो तत आह कृत्येति यत्र सामान्यलक्षणेन [illegible] पूर्वनिपातानियमप्राप्तिस्तत्र तन्नियमार्थमिदं स च गुणक्रियावाचिभ्यां समासः एवेति अन्यत्रास्याप्रसक्तिरिति किं तेन्यायसिद्धार्थकथनमज्ञासेतीसर्पः भेउभों

थासादश्वत्रमा भूदिति नियमः पण्यगव इति पण्यो गौरिति विशेषणसमासः गोरतद्धितलुकीति टच् समासान्तः ऽत्र नु चिन्त्यादेवानोदाजत्वं सिद्धमिति द्वितीयमुदाह
रणमुक्तं पण्यहस्तीति। कृत्यतुल्याख्या ऽजात्येति एतनु गुणक्रियावाचिनो विशेषणविशेष्यभावस्यानियमात्पूर्वनिपातानियमप्रसंगे कृत्सान्तस्य पूर्वनिपातार्थे
वचनं न तु जाति प्रतिषेधार्थमजात्येति तु वचनं न्यायसिद्धार्थानुवादरूपमेवेति भाष्यकारमतानुसारिणा ऽऽहुः ततत्सुरूषे तुल्यार्थे सत्र प्रतिपदोक्तपरिभाषा कृत्सेषु यदा ना
श्रीयते तदा नियमार्थत्वमुच्यते तदाश्रयणे तु विध्यर्थत्वान्नियमानुपपत्तिर्नापि पण्यगव इत्यादौ प्रकृतिस्वरप्रसंगः। अहीने। थाथादिस्वरापवादो योगः। अही प्पा० ए ४
न इति किमर्थमिति। प्रसाख्यानायप्रश्नः॥ ॥

=तत्पुरुषे तुल्यार्थे सत्रे नासिद्धस्तत्र्यर्थमत आह थाथेति ९=

कांताराती तइति कांतारंसक्तवानित्यर्थे द्वितीयाश्रितेतिसमासो हीनवाच्यत्र द्वितीयान्त्रमिति थाथादिस्वरो भवति सुखप्राप्तइति अत्रापि थाथादिस्वरः अनुपसर्गग्रहणे चेह
क्रियमाणे प्रहृढादिषु स्वढात्रू ढशब्दो न पठितव्य आरूढशब्दस्य सोपसर्गत्वादेव तत्स्वराभावे थाथादिस्वरेणांतोदात्तत्वसिद्धत्वात् गति अनंतरइति किमर्थमिति किंव्यव
हितगतिनिवृत्त्यर्थमथानंतरस्यैवाप्रूर्वेपरस्यापि गतेस्थाथादिस्वरबाधनार्थं [redacted] प्रकृतिस्वरविधानार्थं अथ कृद्ग्रहणे गतिकारकपूर्वस्या

कांताराती तः योजनातीतः अपहीने द्वितीयानुपसर्गे अपहीने द्वितीयानुपसर्गे इति वक्तव्यं इह माभूत् सुखंप्राप्तः सुखप्राप्तः दुःखप्रा
प्तो दुःखप्राप्त इति तत्रहि वक्तव्यं यद्यप्येतदुच्यते अथ वैतर्ह्यपहीनग्रहणं न करिष्यते इहापि कांतारातीतो योजनातीत इति अनुप यो
सर्ग इत्येव सिद्धं गतिरनंतरः अनंतर इति किमर्थं अभ्युद्धृतं उपसमाहृतं गतेरनंतरग्रहणमनर्थकं गतिर्गताविति वचनात् ।
गतेरनंतरग्रहणमनर्थकं किं कारणं गतिर्गताविति वचनात् गतौ परतो गतेरनुदात्तत्वमुच्यते तद्बाधकं भविष्यति ॥ ॥

गतिरनंतरः स्वमकाप्रः प्रकृतमिति गतिर्गताविसस्याव कामाः असमासे अभ्युद्धृतमिति समासेत्वभ्युद्धृतमिति अभयोः प्राप्तोपरत्वेनयथस्याः

पि ग्रहणमिति परिभाषाज्ञापनार्थमिसनेकार्थसंभवात् प्रश्नः अभ्युद्धृतमिति कृद्ग्रहणपरिभाषयाक्तान्त उद्धृतशब्दे परतोऽभिशब्दस्य प्रकृतिस्वरो मा
भूदित्येवमर्थमनंतरग्रहणं ननु च क्रियमाणेप्यनंतरग्रहणे प्राप्नोत्येव उद्धृतशब्दस्य क्तांतस्यानंतर एव हि गतिर्भवतीति अनंतरग्रहणसामर्थ्याद्धातोर
नंतरो गतिराश्रीयत इत्यदोषः तत्र बाधकमिति परत्वादिति भावः तस्माद्व्यवहितगतिनिवृत्त्यर्थमनंतरग्रहणं न कर्तव्यं ॥ ॥ ॥

भा० कै० ६
९५

तत्र यस्येति गतिर्गतौ विति निघाते कृते उभे प्रकृतिस्वरो नास्तीति तस्मात्तु परस्मोद्धृत शब्दस्य सति शिष्टत्वात् थाथादिस्वरेणान्तोदात्तत्वं प्राप्नोति न त्वकृयं उच्यते उ

द्धृत शब्देनाव्ययस्तसमास स्वराद्यंयस्वर कृत्स्वर थाथादिस्वरेषु प्राप्तेषु गतिस्वरस्ततो भेस्य समासे कृते न कृष्यां नाप्राप्तः थाथादिस्वरः प्राप्नोतीति कृदुत्तरपदप्रकृतिस्वरो भवतीति

स्पष्टत्वात्तनपारिभ [redacted] समासे कृते समासान्तोदात्तत्वं प्राप्नोति ततस्तदपवादः कृत्स्वरेणोद उदात्तत्वं प्राप्नोति ततस्तदपवादः थाथादिस्वरप्रसंगः प्रकृति

स्वरश्च नास्तीति। नाप्राप्ते थाथादिस्वरे गतिस्वरस्यारभ्यमाणस्तस्य बाधकः यएको गतिरिति एकस्मिन्नेव गता वस्य बाधकत्वमभ्युद्धृता दौनुकृष्यान्तर

= [redacted] गते॰ =अव्ययपूर्वपदप्रकृतिस्वरत्वादितरोकृः तस्यापि गतिर्गतावितसनेनबाधात्कः २ =यद्यप्यनंतरग्रहणेनैवकाक्रगतापरिभाषाज्ञाप्यतीयेतिनेदानीतस्मात्संचाराद्य

तत्र यस्यां प्रकृतिस्वरत्वं तस्मादन्तोदात्तत्वप्रसंगः तत्रायस्यां प्रकृतिस्वरत्वं तस्मादन्तोदात्तत्वं प्राप्नोति उच्यते स्थाप्यपज्जाजविचकारणमिति प्र

कृतिस्वरवचनाद्धनन्तोदात्तत्वं प्रकृतिस्वरवचनसामर्थ्यादन्तोदात्तत्वं न भविष्यति यदि हि स्यात् प्रकृतिस्वरवचनं किमर्थमिति चेत् एकगत्यर्थं

॥ यएको गतिस्तदर्थमेतत्स्यात् प्रकृतं प्रकृतं एवमप्यर्थमेव तर्ह्यनंतरग्रहणं कर्तव्यं उच्यते यथा स्यात् क्रियमाणेऽपि वैश्वनंतरग्रहणे चैव न

सिध्यति किं कारणं गतिरनंतरं पूर्वपदं प्रकृतिस्वरं भवतीत्युच्यते यश्चात्र गतिरनंतरः नासौ पूर्वपदं नासावनंतरः ॥×चनमित्रानीकिमर्थं स्या

×यश्च पूर्वपदं×

=नन्वभ्युद्धृतयुगपदेवकांते तस्य समासे। विशेषाद्धोपरिपूर्वपदत्वमतआह कुगती तिः २=

प्राप्तत्वात्थाथादिस्वर एव सतिशिष्टत्वात् बलवत्वात् प्राप्नोति एवमप्यर्थमेवेति कृष्यांतरप्राप्तस्यापि थाथादिस्वरस्य बाधनार्थमनंतरग्रहणमित्यर्थः यत्रह्येक एव ग

तिस्तत्रानंतरग्रहणेन न प्रयोजनमित्यनेकगतिसंनिधावप्राप्तस्य गतिस्वरस्यानंतरग्रहणेन पुनः श्रुत्याप्राप्तिः क्रियते क्रियमाणेऽपीति कुगतिप्रादय इत्यत्रस्तुपे

तिनिहन्तेस्तु विस्तृतत्वं नेत एव निष्कृतादिषु पदकार्यप्रसिद्ध्यर्थं तत्र युगपत्स्तुवन्तसमुदायस्य सुवन्तत्वाभावात् समासस्याप्रसंगात् क्रमेण सौ विधेयस्ततोऽभिशब्द

स्योद्धृत शब्देन समासे सत्यभिशब्द एव पूर्वपदं नोद्धृत इति पूर्वपदस्य गतेः प्रकृतिस्वरो विधीयमानः ससमनंतरग्रहणे पूर्वपदत्वादुदात्तं न प्राप्नोतीत्यर्थः॥ राम०
९५

अपूर्वपदार्थे तर्हीति। अशुसामकराणां दुर्बलत्वात् अतेनत्र योगविभागः क्रियते गतिः पूर्वपदं प्रकृतिस्वरो भवति। ततो नंतरो गतिरपूर्वपदमपि प्रकृत्या सेति इदानीमतिप्रसंग
माह। अपूर्वपदार्थमिति चेदिति दूरादागत इति अत्र कर्मणि क्तो विधेयस्त् तीया कर्मणि इत्यतः इह कर्मग्रहणानुवर्त्तनात् कर्मवाचिनः क्तस्य ग्रहणं अत्र थाथा
दिस्वर इष्यते गतिस्वर अनंतरग्रहणात् प्राप्नोति सिद्धं त्विति थाथादिसूत्रे चकारको पपदग्रहणमेवानुवर्त्तते न गतिग्रहणमस्वरितत्वात् नत प्रागतिस्वरः कृ

= न त्वपूर्वपदाधिकारे सति कथमपूर्वपदार्थलं तमाह भुतेति ३८ अचेति दूरादागत इत्यत्र सत्यर्थः। इहेति गतिरनंतरस्तत्र ३८

अपूर्वपदार्थे तर्हीदं वक्तव्यं अपूर्वपदस्यापि गतेः प्रकृतिस्वरत्वं यथा स्यात् अपूर्वपदार्थमिति चेत्कारके ऽतिप्रसंगः अपूर्वपदार्थमि
तिचेत्कारके ऽतिप्रसंगो भवति। आगतः दूरादागतः स यथैव गतिपूर्वपदस्य भवति एवं कारकपूर्वस्यापि प्राप्नोति सिद्धं तु गतेरंतोदात्ता
प्रसंगात् सिद्धमेतत्कथं यत्तदं तः थाथघञ्क्ताजबित्रकाणामिति सेत कृतेनेप्रसंक्तव्यं किं कृतं भवति। कृत्स्वर एषवादो ऽयं भवति
तत्र गतिरनंतर इत्यस्यावकाशः प्रकृतं प्रहृतं। अंतः थाथघञ्क्ताजबित्रकाणामित्यस्यावकाशः दूराद्भुतः दूरागतः इहोभयं
प्राप्नोति आगतः दूरादागतः अंतः थाथघञ्क्ताजबित्रकाणामि सेतद्भवति विप्रतिषेधेन॥ ॥ ॥

दूरात्

त्वरस्यापवादो न थाथादिस्वरस्य तत्र दूरादागते कृत्स्वरापवादयोगे तिस्वरः थाथादिस्वरयोः प्रसंगे परत्वात् थाथादिस्वर एव प्रवर्त्तते अनंतरग्रहणात्त्वपूर्वपदार्थम
प्युद्भूतादावेव स्वरं सं पादयति प्रकृतमिति अवकाशप्रदर्शनमात्रमेवानेन कृतमनंतर इत्यस्य त्वप्युद्भूतादिरवकाशः प्रदर्श्यितव्यः॥ ॥

भा०कै०६ अवग्रहपूर्वे गतेरिति थाथादिसूत्रे ऽव ग्रहानुवर्से गतिग्रहणमन्यथाप्रभेद इत्यत्र कृत्स्वरेण घञ्जोन्तोदात्तत्वं स्यादन्तोदात्तत्वं चेष्यते एवं तर्हीति थाथादिसूत्रात्
१९६ कृद्ग्रहणमपनीय एष कर्तव्यं गतिग्रहणं निवृत्तमिति। ननु विभुषु कृ इत्यादौ कृत्स्वरेणोत्तरपदाद्युदात्तत्वं प्राप्नोति अथ क्व षष्ठ्यादि सा द्युदात्तविधानादन्तोदात्तं
चेष्यते इत्याशंक्य योगविभागान्तरमाह कारकादिति [redacted] तत्र दूराघात इत्यादौ थाथादिस्वरेणोत्तोदात्तत्वस्य सिद्धत्वात्कारकादित्ययं योगो गतिरनन्तर इत्यस्य
बाधको विज्ञायते एवं चेति कारकादितियोगविभागे सत्यनन्तरग्रहणं न कर्तव्यं कथमितिचेत् उच्यते। आगत इत्यस्य गतिस्वरेणाद्युदात्तत्वे प्रवृत्ते इह इत्यस्य स्तोकां

अवग्रहपूर्वे गतेस्तत्र संस्कृत्यं भेदः प्रभेद इत्येवमर्थं एवं तर्हि योगविभागः करिष्यते छन्दतः थाथ घञ्क्तजबित्रकाणां ततः क्तान्तमुत्तरपदं ख्रन्तोदात्तं
भवति। अत्र कारकोपपदग्रहणमनुवर्तते गतिग्रहणं निवृत्तं अथ वोपरिष्टाद्योगविभागः करिष्यते इदमस्ति सूपमानात्क्तः संज्ञाया
मनाचितादीनां प्रवृद्धादीनां चेति ततो वक्ष्यामि कारकात् कारकाच्च क्तान्तमुत्तरपदमन्तोदात्तं भवतीति ततः दत्तश्रुतयोरेवाशिषिकारका
इति एवं चकृत्वानार्थोनन्तरग्रहणेन कथमभ्युद्धृतः ॥

=नन्वकृत्याथेनाभ्युद्धृतस्य सिद्धेः अस्मान्नुपपत्तिरत आह अथ... युगपद्... =ननु परत्वा ल्लिघाते पि पुनः प्रसंगविज्ञानात्... =गतिकारकोपपदादिसत...

तिकेतिसमासस्ततः कस्यान्तरप्राप्ता समासस्वरः प्राप्नोतित ततः कृत्स्वरस्ततः कृत्स्वर इत्येवं कृत्स्वरे सिद्धे कारकादिति सूत्रं नियमार्थं तत्र गतिग्रहणमनुवर्ततेतेनायमर्थः
कारकादेव परं गतिपूर्वपदं क्तान्तमन्तोदात्तमिति तेनाभ्युद्धृत इत्यादौ परत्वात् गतिनिघाते उदात्तस्वरितानुदात्तस्य सर्वानुदात्तस्य प्रकृतिभावाभावे थाथादिस्वरे च नियमेन निवर्त्ति एम०
ते कृत्स्वरेणादः एवोदात्तत्वं भविष्यतीत्यर्थः कथमिति अपूर्वे परत्वाद् उत्स्थगतिस्वरो न प्राप्नोतीति तदर्थमनन्तरग्रहणं स्यादिति मत्वा प्रश्नः ॥ " " १९६

=नतुसमसंनिज्ञापकेगतिर्गताविति निघातेनव्यवहितनिर्दृष्टेरत्यथाभिधेद्रनंतरग्रहणस्यचाभिनार्थ्यनसंनवत्तनआह्॰ यदेति॰२=

उद्धरति क्रियमिति ॥ अयमर्थः । उच्छद्रेन हरतेरस्ववंधारेकउद्धृतमाद्वयोरसमासन्नचोच्छदस्य पूर्वपदत्वात् भवतिगतिस्वरः पश्चाद्विभिशद्वस्य समासेऽभेर्गतिस्वरं वाधित्वानिघातेनपार्थ्यंतत्र उत्तरपदप्रकृतिस्वरेणाउदएवगतिस्वरोभविष्यतिनाथोनंतरग्रहणेनत्रपथवोद्धरतिक्रियामित्यादिना भेर्गतित्वं प्रतिपाद्यते। एवं तर्हीति पूर्वविप्रतिषेधमनपेक्ष्यव्यवहितगतिनिवृत्त्यर्थमनंतरग्रहणं क्रियते यदि चकृद्ग्रहणपरिभाषा न स्यात् ततः क्तान्त उत्तरपदे गतेः स्वरोविधीयमानोव्यवहितस्यन


किमर्थं तर्हि लुगलुगनुक्रमणं क्रियते। उदाहरणभूयस्त्वात्। ते वै खल्वपि विधयः सुपरिगृहीता भवन्ति। येषां लक्षणं प्रपंचश्च। केवलं लक्षणं प्रपंचो वा न तथाकारकं भवति। अवश्यं खल्वप्यस्माभिरिदं वक्तव्यं बहुलमन्यतरस्याम् उभयथैकेषामिति। सर्ववेदपारिषदं हीदं शास्त्रं तत्र नैकः पन्थाः शक्य आस्थातुम्। षष्ठ्या आक्रोशे। षष्ठीप्रकरणे वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषूपसंख्यानं। षष्ठीप्रकरणे वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषूपसंख्यानं कर्तव्यं। वाचोयुक्तिः दिशोदण्डः पश्यतोहरः॥ आमुष्यायणामुष्यपुत्रिका। आमुष्यायणामुष्यपुत्रिकेषूपसंख्यानं कर्तव्यं। आमुष्यायणः। आमुष्यपुत्रिका। आमुष्यकुलिकेति वक्तव्यं। आमुष्यकुलिका। देवानांप्रिय इति च। उपसंख्यानं कर्तव्यं। देवानांप्रियः। शेपपुच्छलाङ्गूलेषु शुनः संज्ञायामुपसंख्यानं। शेपपुच्छलाङ्गूलेषु शुनः संज्ञायामुपसंख्यानं कर्तव्यं। शुनःशेपः

८॥ शुनःपुच्छः। शुनोलाङ्गूलः। दिवश्च दासे उपसंख्यानं कर्तव्यं। दिवोदासाय गायते॥ ॥

तत्र चोदनीयं वाग्रहणमेव क्रियतां व्यवस्थितविभाषा वाश्रीयतां किं बहुलग्रहणेनेति। षष्ठ्या आक्रोशे पश्यतोहर इति। षष्ठी चानादर इति षष्ठी पश्यन्तमनादृत्य हरतीत्यर्थः। शुनःशेप इति। अविशेषसंज्ञेयमकारान्तोऽप्यस्ति शेपशब्देन केवलं सकारान्तः शुनःशेपोऽस्येति बहुव्रीहिः॥ ॥ श्री॥ ॥

ऋतो नत्पूर्वपदोत्तरपदग्रहणमिति। अस्मिन्निवर्त्तति परत्वादस्य व्यतिकरेपि कार्यप्रवृत्तिः। आनङ् द्वन्द्वेयमिति। कार्योर्थः अवगतार्थो वा वर्णानामुपदेश इति मत्वाग्र

=तत्पूर्वपदोत्तरपदग्रहणे होतुःपुत्र इत्यत्र [illegible] संगतिरतमात् अन्यतिव्यतिकरेपीति [illegible] संबंधे इत्यर्थः तेन [illegible]॥ ॰

ऋतो विद्यायोनि। विद्यायोनिसंबंधेभ्यस्तत्पूर्वपदोत्तरपदग्रहणं। विद्यायोनिसंबंधेभ्यस्तत्पूर्वपदोत्तरपदग्रहणं कर्त्तव्यं। विद्यासंबंधेभ्यो वि
द्यासंबंधेषु यथा स्यात्। योनिसंबंधेभ्यो योनिसंबंधेषु यथा स्यात्। व्यतिकरो माभूत्। अपयोर्व्यतिकरे न भवितव्यं। वा ढं भवितव्यं। होतुःपुत्रः
पितुरंतेवासी। आन। कार्यं नकारः श्रूयते न क्वचिच्छ्रूयते लोपोऽस्य भवति न लोपः प्रातिपदिकांतस्येति। यदि न क्वचिच्छ्रूयते किमर्थमु
च्चार्यते रपरत्वं माभूदिति। क्रियमाणेपि वै नकारे रपरत्वं प्राप्नोति। किं कारणं। न लोपे कृते एषोऽपि हि उः स्थाने अण् शिष्यते। नैष दोषः।
उः स्थाने अण् प्रसज्यमान एव रपरो भवतीत्युच्यते न चायं उः स्थाने अणो विशिष्यते किं तर्हि अणश्चानेकश्चे पुनरिदं विज्ञायते ऋकारांतानां एत४
यो द्वंद्व इति। आहोस्वित् द्वंद्वे ऋकारांतस्येति। कश्चात्र विशेषः। ऋकारांतानां द्वंद्वे पुत्रे उपसंख्यानं कर्त्तव्यं। पितापुत्रौ। कार्यी चानिर्दिष्टः। का
यी चानिर्दिष्टो भवति। ऋकारांतानां द्वंद्वे न ज्ञायते कस्यानङ् भवितव्यमिति। अस्तु तर्हि द्वंद्वे ऋकारांतस्येति। अविशेषेण पितृपितामहा
दिष्वतिप्रसंगः। अविशेषेण पितृपितामहादिष्वतिप्रसंगो भवति। पितृपितामहाविति। अस्तु तर्हि ऋकारांतानां यो द्वंद्व इति। ननु चो
(९ क्तं ऋकारांतानां द्वंद्वे पुत्रे उपसंख्यानमिति॥ ॥ ॥

अणः। क्रियमाणेपीति। उः स्थाने यः कृतो णस रपर इति सूत्रार्थं मन्यते इतरः स्थानेग्रहणं दृष्ट्वा [illegible] नैष दोष इति॥ ॥श्री॥ ॥ॐ॥

[redacted] पुत्रेपीति। अनाक्रोशेपि भ्रातुः पुत्रादावित्यभिप्रायः॥ संबंधमिति। आक्रोशग्रहणे न संबंधात् संबंध्यं तेरण पुत्रशब्दो न संबध्यते तन्निवृत्तौ तु संबध्य

=प्रकल्पयिष्यतीति। नचोभयोरपि चारितार्थ्यात्सामर्थ्येन तस्मादिपुत्रवक्ष्ये वमकल्पकं स्यादिति वाच्यं उत्तरपदस्याधिकारे षष्ठ्यन्तेन सामानाधिकरण्यानुरोधात्सप्तम्याः षष्ठी कल्पकत्वमिसाधयान्=ः८=

नैष दोषः। पुत्रग्रहणमपि प्रकृतमनुवर्त्तते। क्व प्रकृतं। पुत्रेऽन्यतरस्यामिति। यदि तदनुवर्त्तते विभाषा स्वसृपत्योः पुत्रे चेति पुत्रेपि विभाषा प्राप्नोति नैष दोषः। संबंधमनुवर्त्तिष्यते। षष्ठ्या आक्रोशे पुत्रेऽन्यतरस्यां। षष्ठ्या आक्रोशेऽतो विद्यायोनिसंबंधेभ्यः। पुत्रेऽन्यतरस्यां षष्ठ्या आक्रोशे विभाषा स्वसृपत्योः। पुत्रेऽन्यतरस्यां षष्ठ्या आक्रोशे। आनङृतो द्वंद्वे पुत्रग्रहणमनुवर्त्तते षष्ठ्या आक्रोश इति निवृत्तं। यद्युच्यते कार्यी चानिर्दिष्ट इति। कार्यी च निर्दिष्टः। कथं। उत्तरपद इति वर्त्तते। ऋ इत्यावं क्रियते। सोऽन्तरेणापि कार्यिनिर्देशं ऋकारस्यैव भविष्यति। पुत्रे तर्हि कार्यी अनिर्दिष्टः। पुत्रे च कार्यी निर्दिष्टः। कथं। ऋकारग्रहणमपि प्रकृतमनुवर्त्तते। क्व प्रकृतं। ऋतो विद्यायोनिसंबंधेभ्य इति। न हि पंचमीनिर्दिष्टेन चेहार्थः। पुत्र इत्येषा सप्तमी ऋत इति पंचम्याः षष्ठीं प्रकल्पयिष्यति। तस्मिन्निति निर्दिष्टे पूर्वस्येति। देवतादेवताद्वंद्वे उभयत्रवायोः प्रतिषेधः। देवताद्वंद्वे उभयत्रवायोः प्रतिषेधो वक्तव्यः। अग्निवायू। वाय्वग्नी। ब्रह्मप्रजापत्यादीनां च। ब्रह्मप्रजापत्यादीनां च प्रतिषेधो वक्तव्यः। ब्रह्मप्रजापती। शिववैश्रवणौ। स्कंदविशाखौ। एतर्हि वक्तव्यः। द्वंद्व इति ऽवर्त्तमाने पुनर्द्वंद्वग्रहणस्येतत्प्रयोजनं लोकवेदयोर्यो द्वंद्वः तत्र यथा स्यात्॥ ॥

वक्तव्यः।न२

निर्दिष्टं षष्ठी२

तइत्यर्थः। देवताउभयत्रेति। पूर्वपदत्वे उत्तरपदत्वे चेत्यर्थः॥ ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

लोकवेदयोः॥ इति। साहचर्येणायौ लोकवेदयोः प्रसिद्धौ द्वंद्वसमासवाच्यौ नञ्ज्ञानदिः स्यर्थेः। सहनिर्वापः सहहानं॥ मातरापितरौ उत्तरपदयोरिति। सप्तम्यंतमेतत्तत्र मातरपितरावित्यत्र पूर्व
पदस्यारशब्दोऽत्रादेशो निपात्यते उत्तरपदस्य तु स्तनोऽ॥ इ. सर्वनामस्थानयोरिति गुणोरपरत्वं च। पितरामातरेत्यत्र पूर्वपदस्यारशब्दोऽतस्य निपात्यः समासांतु परस्य प्रथमाद्विवचन

कस्मात्तु लोकवेदयोर्द्वंद्वः वेदे येसहनिर्वापुनिर्दिष्टाः नचैते वेदे सह निर्वापनिर्दिष्टाः। इद्धौ। इद्धौ विस्रोः मति षेधः।
इद्धौ विस्रोः मतिषेधो वक्तव्यः। आग्नावैष्णवं चरुं निर्वपेत्। मातरपितरावुदीचां। पितरामातरा च छंदसि। किं
निपात्यते। पूर्वोत्तरपदयोरकारस्यारौ। मातरपितरौ भोजय। मातरपितरावानय। आमांतं पितरा
मातरा चामा सो मोऽप्यमृतत्वाय गम्यात्॥ ॥ इति श्रीभगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये
९ षष्ठाध्यायस्य तृतीये पादे प्रथममान्हिकम्॥ ॥

स्यसुतु॥ स्याकारः पूर्ववत् गुणरपरत्वे॥ ॥ इत्युपाध्यायजैय्यटपुत्रकैय्यटकृते भाष्यप्रदीपे षष्ठाध्यायस्य तृतीये पादे प्रथममान्हिकम्॥ ॥श्री॥
९ ॥श्री॥ ॥श्री॥ ॥ ॥७॥

भा॰कै॰ ६ स्त्रियाः पुंवत्। कथमिति। भाषितः पुमान्यस्मिन्नर्थे प्रवृत्तिनिमित्ते तल्लक्षणे स भाषितपुंस्क इति प्रवृत्तिनिमित्तस्यान्यपदार्थे श्रयणे तद्योगाच्च शब्दस्यापि भाषितपुंस्कत्व

११३ विज्ञाने समानायामाकृतावित्ययोगो लभ्यते। प्रत्यासत्तेश्च यस्य शब्दस्य पुंवद्भावो विधीयते तेनैव पुमान्भाषित इति गम्यते। भाषितपुंस्कग्रहणसामर्थ्याच्च शब्दान्तरेण

सर्वस्यार्थस्य भाषितपुंस्कत्वादन्तं तेनार्थे शब्देनापीति व्यवच्छेद्याभावादनर्थकं भाषितपुंस्कग्रहणं स्यात्। यदा तु भाषितः पुमान्येन शब्देन स भाषितपुंस्क इति

शब्दोऽन्यपदार्थ आश्रीयते तदा समानायामाकृतावित्यस्य विशेषणस्य नास्ति लाभः। गर्भिभार्य इति। स्त्रियां वर्त्तमानस्य गर्भिण्या नवयवभूतगर्भसंबंधः प्रवृ शद॰

=ननेवं करदाभार्य इत्यादौ हंसभार्य इत्यादिना शब्दान्तरेण पुंसोऽभिधाने स्यादत आह असामान्ये वेति॥२= अर्थशब्देनापीति अर्थशब्दः सामान्यशब्दोऽपि पदार्थवद्वादिवितज्जनसामान्यावलंबेन वर्त्तते तदा समानं प्रवृत्तिनिमित्तमित्याशयः॥२=

स्त्रियाः भाषितपुंस्कादिति कथमिदं विज्ञायते समानायामाकृतौ यद्भाषितपुंस्कमाहोस्वित् क्वचिद्यद्भाषितपुंस्कमिति। किं चातः यदि

विज्ञायते समानायामाकृतौ यद्भाषितपुंस्कमिति। गर्भिभार्यः प्रसूतभार्यः अत्र न प्राप्नोति। अथ विज्ञायते क्वचिद्यद्भाषितपुंस्कमि

ति द्रोणीभार्यः कुटीभार्यः पात्रीभार्यः। अत्रापि प्राप्नोति। अस्तु तर्हि समानायामाकृतौ यद्भाषितपुंस्कमिति। कथं तर्हि गर्भिभार्यः

१ प्रसूतभार्यः प्रजातभार्य इति॥ ॥ ॥

=अर्थभेदाच्छब्दभेद इति नये आद्यं तदभेद इति पक्षे द्वितीयं तत्वेऽसादेरक्त देवेदं रजतमिति प्रत्यभिज्ञानवदित्यर्थः॥२= =ज्वालासु सैवेयं ज्वालेति प्रत्यभिज्ञानवदित्यर्थः॥२=

त्तिनिमित्तं गर्भी व्रीहिरित्यादौ तु पुंसि वर्त्तमानस्यावयवभूतगर्भसंबंधः इति समानाकृतित्वाभावः। प्रसूतप्रजातशब्दौ स्त्रियां वर्त्तमानौ गर्भविमोचनं प्रवृत्तिनि

मित्तमाश्रयतः पुंसि तु गर्भाधानमिति समानाकृतित्वाभावः। द्रोणीभार्य इति। द्रोणशब्दः परिमाणवृत्तिर्भाषितपुंस्कः स एव चसौदस्पनिबंधनप्रत्यभिज्ञानवशा

त्तन्निबंधनप्रत्यभिज्ञानवशाच्च अभेदेनावसीयमानो गवादिस्त्रीवर्त्तत इति नास्ति समानाकृतित्वमेवं कुटशब्दोऽपि घटे भाषितपुंस्को गेहे स्त्रीलिंगः पात्रशब्दोऽपि रास॰

१ चादित्वात् भाषितपुंस्को भाजनविशेषे स्त्रीलिंगः॥ ॥ ॥ ११३

कर्त्तव्योऽत्र यत्न इति। गर्भिशब्दस्य गर्भसंबंधः प्रवृत्तिनिमित्तं पुंसि स्त्रियां च समानम् अवांतरभेदस्त्वविवक्षितः प्रसूतप्रजातशब्दयोरपत्यापत्यवत्संबंधः समानं प्रवृत्तिनिमित्तमस्तीति दोषाभावः। पृथग्गीति। पृथक् प्रतिषेधः प्रतिषेधांतराद्वैलक्षण्यं सूचयतीत्यर्थः। अयवानायमिति। स सामेवानुवर्त्तनोपयुदाहरणप्रश्री

=ति पाणावइति। इहतुपलक्षणं। गर्भी युवनाश्वः प्रसूतश्चेति मांधातृपितरि राजविशेषे प्रसिद्धतावचनमस्मात् अवयवत्वे गर्भसंबंधो गर्भविमोचनं च प्रवृत्तिनिमित्तं प्रस्येति सिद्धांतामयस्याविवक्षां विनामुच्यमानात्वः एतेन पृथक् सूत्रार्थसंबंधस्य

कर्त्तव्योऽत्र यत्नः। अयवा किमर्थमूङः। पृथक् प्रतिषेध उच्यते न यत्नैवान्यः प्रतिषेधः तत्रैवायमप्युच्येत न कोपधायाः इत्युक्ता ततः ऊङ्। सूत्रे सेवोच्येत तत्रायमप्यर्थः द्विः प्रतिषेधो न वक्तव्यो भवति। नैवं शक्यं। पठिष्यति ह्याचार्यः पुंवत्कर्मधारये प्रतिषेधार्थेमिति। स पुंवद्भावो यथेह भवति कारिकावृंदारिका कारकवृंदारिका एवमिहापि स्यात्। ब्रह्मबंधूवृंदारिका ब्रह्मबंधूवृंदारिकेति॥ अथ पृथक्प्रतिषेधे पियस्मादेवसप्रतिषिद्धार्थ आरंभः कस्मादेवात्र न भवति। पृथक् प्रतिषेधवचनसामर्थ्यात्॥ अपयवा ऊङ्। इति तत्रानुवर्त्तिष्यते॥ अयवानायं प्रसज्यप्रतिषेधः किं तर्हि पर्युदासोऽयं पदस्य ऊङ् इति॥ स च प्रतिषेधार्थ आरंभः॥ ॥

=पूर्वस्मिन्पक्षे नुवर्त्तिः प्रसज्यप्रतिषेधः स्त्वनुवर्त्तिः पर्युदासस्त्विति। तेनास्मिन्पक्षे ब्रह्मबंधवृंदारिके सत्र न दोषः। १७=

यत्ते न प्रसज्यप्रतिषेध इति पूर्वस्मात्पक्षाद्दस्य पक्षस्य भेदं भाष्यकारेणाश्चान्यूङ् ग्रहणाद्यिवान्तरत्राऽनुवृत्तिर्दर्शितानत्वप्ररणी प्रियादिष्विति स्पष्टेनमहानवमी महाद्वादशी

(१त्याद्यावपिपुंवत्भावो भवतीति॥ ॥ ॥

किंपुनरिति। यदा स्त्रीग्रहणं स्वर्यते तदा स्वरितेनाधिकारगतिर्भवतीति स्त्र्यधिकारविहितटाबादिग्रहणं भवति तेन भाषितपुंस्कादनूङः स्त्रीप्रत्ययस्य पुं
वद्भवतीति सूत्रार्थः संपद्यते। यदा तु स्त्र्यर्थवाची शब्दः स्त्रीशब्देनोच्यते तदा शब्दग्रहणं भवति यदा तु स्त्रीत्वमुक्तं वस्तु स्त्रीशब्देनोच्यते तदार्थग्रहणं भवति तत्रा

किं पुनरिदं पुंवद्भावे स्त्रीप्रत्ययग्रहणं उत स्त्रीशब्दस्य ग्रहणं आहोस्वित् स्त्र्यर्थस्य ग्रहणं। कश्चात्र विशेषः। पुं
वद्भावे स्त्रीग्रहणं स्त्रीप्रत्ययग्रहणं चेत् तत्र पुंवदित्युत्तरपदे तत्प्रतिषेधविज्ञानं॥ पुंवद्भावे स्त्रीग्रहणं स्त्रीप्रत्यय
ग्रहणं चेत् तत्र पुंवदित्युत्तरपदे तत्प्रतिषेधोऽयं विज्ञायेत। कस्य स्त्रीप्रत्ययस्य किमुच्यते स्त्रीप्रत्ययस्य प्रतिषेध इ
ति। न पुनरन्यदपि किंचित्पुंसः प्रतिपदं कार्यमुच्यते यत्समानाधिकरणे उत्तरपदे भाषितपुंस्कस्यातिदिश्येत॥
[redacted]। अनारंभात्तु सि। न किंचित्पुंसः प्रतिपदं कार्यमुच्यते यत्समानाधिकरणे उत्तरपदे भाषितपुंस्कस्यातिदि
श्येत। तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः स्त्रीप्रत्ययप्रतिषेधात्॥ ॥ श्री॥

र्थग्रहणे स्त्रीशब्दो मुख्यः। अर्थस्य तूत्तरपदेन पौर्वापर्यानुपपत्तिः शब्दग्रहणे तु स्त्रीशब्दो गौणः उत्तरपदेन तु शब्दस्य पौर्वापर्योपपत्तिः॥ ॥ श्री ॥

१ ॥श्री॥ ॥श्री॥ ॥श्री॥

कथं पुनरिति। पुंवदित्यनेन प्रतिषेधो न प्रस्याप्यत इति मत्वा प्रश्नः। वृत्तिनिर्देशोयमिति। उपमानोपमेयभावविषयो वृत्तिस्तत्रोपमाने सत्त्वं वा प्रसिद्धोपमेये प्रतिपा
द्यत इति यथासंभवं वाक्यशेषपरिकल्पने कामचार इत्यर्थः। पुंसि च स्त्रीप्रत्ययस्याभावात् स्त्रियाम भावोऽतिदिश्यत इति न भवतीति वाक्यशेषः कल्प्यते प्रसि
द्धप्रक्षेपयद्धत्वं तदाह। प्रातिपदिकस्य चेति चशब्दो वक्ष्यमाणापेक्षः। एनी भार्येति। एतशब्दाद्वर्णादनुदात्तात्तोपधात्तो न इति ङीप्नकारस्य च नकारस्तत्रैकदे

कथं पुंवदित्यनेन स्त्रीप्रत्ययस्य प्रतिषेधः शक्यो विज्ञातुं। वृत्तिनिर्देशोयं। [redacted]। कामचारश्च वृत्तिनिर्देशो वाक्यशेषं सम
र्थयितुं। तद्यथा। उशीनरवन्मद्रेषु यवाः संतिन संतीति। मातृवदस्याः कलाः संतिन संतीति। एवमिहापि पुंवन्न भवतीत्येव वाक्यशेषं समर्थ
यिष्यामहे यथा पुंसः स्त्रीप्रत्ययो न भवति एवं समानाधिकरणे उत्तरपदे भाषितपुंस्कस्यापि न भवतीति। प्रातिपदिकस्य च प्रत्याप त्तिः।
प्रातिपदिकस्य च प्रत्यापत्तिर्वक्तव्या। एनी भार्या अस्य एतभार्यः। श्येनी भार्या अस्य श्येतभार्यः। पुंवद्भावेन किं क्रियते स्त्रीप्रत्ययस्य निवृ
त्तिः। ऊप्रत्ययोऽनिवृत्तः स्त्रीत्वं। तस्यानिर्वर्तत्वात् केनेन शब्देन श्रूयते। स्त्रियामिति च मानः प्राप्नोति। स्थानिवत्प्रसंगाच्च। स्थानिवद्भावश्च
प्राप्नोति। पद्वी भार्या अस्य पटुभार्यः। पुंवद्भावेन किं क्रियते स्त्रीप्रत्ययस्य निवृत्तिः। तस्य स्थानिवद्भावाद्यणादेशः प्राप्नोति। किमर्थोमि
१८दमुभयमुच्यते॥ ॥ ॥

=नवनकारस्यस्मधिकारविधिरितलाशकारयसुंपआवेनेवनिहीतः।नस्यमाविनतंकासरलाभावादिसायथातद१=

शविज्ञातमनन्यवदिति भाषितपुंस्कादेतशब्दात् पर ईकार इति तन्निवृत्तावर्थस्यानिवृत्तत्वान्नकारश्रवणप्रसंगः। ननु च सन्नियोगशिष्टत्वादीकारनिवृत्तौ नकारस्या
पि निवृत्तिर्भविष्यति। एवं तर्हि स्थानिवद्भावात् पुनर्नकारस्यान्यज्ञानं मन्यते उत्तरपदनिमित्तत्वाच्च स्त्रीप्रत्ययनिवृत्तेः स्थानिवद्भावः॥ ॥ ॥

स्थानिवद्भावोऽपि चोदितः स्यादिति। ननु च प्रातिपदिकस्य च प्रत्यापत्तिरिति परिहारः स्थानिवत्प्रसंगश्चेति तु चोद्यं। तत्रैवं वक्तव्यं स्थानिवद्भावोऽपि परिहृतः स्यादिति।
नैष दोषः। अयं हि भाष्यार्थो यथा दोषप्रसङ्गात् प्रत्यापत्तिवचनं परिहारस्तथा स्थानिवद्भावोऽपि चोदितः परिहृतश्च भवति। पुरस्तादिदमिति। यद्यपि पश्चात्प
ठितं तथापि पाठक्रमो बलवानिति पूर्वं दृष्टमित्युच्यते पूर्वं चोद्यदर्शनं पश्चात्समाधानमिति न्यायात् तत्पठितमिति। पुरस्तादपि दृष्टं पश्चात्पठितमित्यर्थः। प्र

क्रमादर्थः १ =पठितमित्यत्र पुरस्तादिति नानुषज्जनीयमिति भावः १=

न प्रातिपदिकस्य प्रत्यापत्तिरित्येव स्थानिवद्भावोऽपि चोदितः स्यात्। पुरस्तादिदमाचार्येण दृष्टं स्थानिवत्प्रसंगश्चेति तत्पठितं। ततउत्तर
कालमिदं दृष्टं प्रातिपदिकस्य प्रत्यापत्तिरिति। तदपि पठितं। न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति। वतण्डादिषु पुंवद्वचनं।
वतण्ड्यादिषु पुंवद्भावो वक्तव्यः। के पुनर्वतण्डादयः। लुगलुक्स्त्रीविषयद्विस्त्रीप्रत्ययाः। लुक्। गार्ग्यो वृन्दारिकाः गर्गवृन्दारिकाः। पुं
वद्भावेन किं क्रियते। स्त्रीप्रत्ययस्य निवृत्तिः। अर्थात् निवृत्तः स्त्रीत्वं तस्यानिवृत्तत्वात् केन शब्दो न श्रूयते। आ स्त्रियामिति हि लुगुच्यते।
लुक्। अलुक्। वतण्डी वृन्दारिकाः वातण्डवृन्दारिका। पुंवद्भावेन किं क्रियते। स्त्रीप्रत्ययस्य निवृत्तिः। अर्थात् निवृत्तं स्त्रीत्वं तस्यानिवृत्तत्वात्
१ लुक् स्त्रियां वतण्डाच्चेति यकारस्य लुक् प्राप्नोति॥ ॥ ॥

=[illegible]

सा प्रत्यापत्तिवचनमेव व्याख्यापरमुपगम्यतां स्थानिवत्प्रसंगश्चेत्येतन्न परिसंख्यातमित्याशंक्याह। न चेदानीमिति। सूत्रव्याख्यानार्थत्वाद्भाष्याणां विस्पष्टार्थमुभयोरुपादानमित्य
र्थः। तत्रैतद्भाष्ये यद्यपि स्थानिवद्भावाश्रयो दोषस्तथापि सन्नियोगशिष्टत्वात् संभावितनिवृत्तेनकारस्य स्थानिवद्भावाश्रयं पुनरुत्पत्तिः स्थानं नन्वीकारेण नकारस्य निमित्तत्वे
कारनकारयोः सहविधानाद्यणादेशस्य तु निमित्तमीकार इत्येतावता भेदेनैतद्भाष्यं पठितं भाष्ये योः पृथगुपन्यासः। लुगलुगिति। लुगलुकोर्यथायोगमिष्यमाणे न सिध्यत इति
१ पुंस्त्वं लक्षणानां यानि दृशंक्य न त्वर इत्यर्थः॥ ॥

=स्थानिवद्भावप्रतिषेधइति॰ प्रातिपदिकप्रत्यापत्तिवचनेनेतिभावः। यद्यपिलुकईकारनिमित्ततायामपिमत्यपलेषसिद्धेर्लुग्यथा पुंवद्भावेननिवृत्तेस्त्रीप्रत्ययेस्थानिवद्भावेनतन्निमित्तविकारनिवृत्तिःप्राप्तासाक्रियतेन्यथावैयाकरणभार्यादौयणोनिवृत्तिः

यदिपुनरीतिलुक्स्त्रियामित्यनेनचेदीकारेपरतोलुग्विधीयतेतदेकारेपुंवद्भावेननिवर्त्तितेयकारनिवृत्तौकर्त्तव्यायांस्थानिवत्प्रसंगश्चेतिस्थानिवद्भावेप्रतिषिद्धेवातं
प्यवंदारिकेतिसिध्यतीतिभावः। स्त्रीईइति। स्त्रियांयईकारस्तस्मिन्परतइत्यर्थः। एकादेशस्यपूर्वान्तवद्भावात् स्त्रियाइतिइयङादेशः। ईकारविधावितिं। शार्ङ्गरवा
दिगणेवृतंदशब्दःपठ्यतेयत्रलुक्पठ्यतेतत्रश्राहतेलुकीकारोनास्यकृतेचैवंलुकोप्रसंगइतीतरेतराश्रयदोषप्रसंगः। अंतरंगत्वाच्चेति। उत्तरपदमनपेक्ष्यलु

कार॰

=पंकते॰२= =इत्यपति॰२=दोषांतरमाह॰अंतरंगत्वाद्धेति॰२= [redacted]

यदिपुनरयमीकारएवलुगुच्येत। तदीकारग्रहणंकर्त्तव्यंनकर्त्तव्यंक्रियतेन्यासएव। प्रश्लिष्टनिर्देशोऽयंस्त्रीईस्त्री। स्त्रियामिति। ईकारविधाव
स्य२ प्रत्ययकस्यपाठःक्रियतेवृतंदेति। शार्ङ्गरवादौवैसप्रत्ययकस्यपाठःकल्पिष्यते॥ सवैसप्रत्ययकस्यपाठःकर्त्तव्यः। अंतरंगत्वाच्चलुक्प्राप्नोति। अ
लुक्। अस्त्रीविषय। कौंडीवृसीवृंदारिकाकौंडीवृस्यवृंदारिका। पुंवद्भावेनकिंक्रियतेस्त्रीप्रत्ययस्यनिवृत्तिः। अर्थोऽनिवृत्तेःस्त्रीत्वं। तस्या
निवृत्तत्वात्केनपशब्दःश्रूयेत। अस्त्रियामितिहिण्योविधीयते। अस्त्रीविषय [redacted] । द्विंस्त्रीप्रत्यय। गार्ग्यायणीवृंदारिकागा
र्ग्यवृंदारिकाइत्यत्रपुंवद्भावोनप्राप्नोति। किंकारणंभाषितपुंस्कादनूङः समानाधिकरणेउत्तरपदेपुंवद्भावोभवतीत्युच्यते॥ ॥

ण्विधीयमानोऽन्तरंगत्वात्प्रागेवस्त्रीप्रत्ययनिवृत्तेःप्राप्नोतितत्रैतस्यान्निमित्ताभावाल्लुक्निवर्त्स्यतइति। एतच्चनास्तिनत्येषापरिभाषासर्वत्राश्रीयतेइ
यानिसादौनिवृत्तायामपिप्रकृतौप्रत्ययस्यानिवर्त्तनाददसिद्धवहिरंगमंतरंगइतीकारनिवृत्तेरसिद्धत्वाच्च। कौंडीवृस्यवृंदारिकेति। स्त्रीत्वस्यानिवर्त्तनात्प्रातप्य
त्रोरस्त्रियामितिण्योनप्राप्नोति। गार्ग्यायणीति। ष्यप्रत्ययोत्तरपदेनानंतर्याभावात्पुंवद्भावेननिवृत्तिर्नप्राप्नोति। ईषस्त्वभाषितपुंस्कात्विधानात्श्रवणप्रसं
ंगइत्यर्थः॥ ॥

भा० कै० ६ सर्वप्रसंग इति। यथा प्रत्ययपक्षे भाषितपुंस्कात्परः स्त्रीप्रत्यय इति शक्यते विशेषयितुं नैवं स्त्र्यर्थाभिधायी शब्दो भाषितपुंस्कात्पर इति शक्यते विशेषयितुं प्रमुल्कचू

११६ डादौ पुंवद्भावस्याप्रसंगात् नन्वप्युत्र प्रमुल्का शब्दो भाषितपुंस्कात्परः। अंगारका इति। अंगारक शब्देन न कदाचित् स्त्रिया अभिधानं कालिका शब्देन च पश्चिजातौ

=अत्र पक्षे रूपातिदेशः। एवं वक्ष्यमाणस्तीयपक्षेपि १=

पश्चात्तु भाषितपुंस्कात्परं नैतदुत्तरपदे यच्चोत्तरपदे नैतद्भाषितपुंस्कात्परमिति। अस्तु तर्हि स्त्रीशब्दग्रहणं स्त्रीशब्दस्य पुंशब्दवदा
तिदेश इति चेत् सर्वप्रसंगो विशेषात्। स्त्रीशब्दस्य पुंशब्दातिदेश इति चेत् सर्वस्य स्त्रीशब्दस्य पुंशब्दातिदेशः प्राप्नोति। अंगारकाना
म शकुनयः तेषां कालिकां स्त्रियः कालिकावृंदारिकाः अंगारकवृंदारिकाः प्राप्नुवंति। हंसस्य वरटा कच्छपस्य डुली ऋश्यस्य रो
हित्। अश्वस्य वडवा पुरुषस्य योषित्। किं कारणं। अविशेषात्। न हि कश्चिद्विशेष उपादीयते एवं जातीयकस्य स्त्रीशब्दस्य पुंशब्दाति
देशो भवतीति। अनुपादीयमाने हि विशेषे सर्वप्रसंगः। कथं च नाम नोपादीयते यावता भाषितपुंस्कादित्युच्यते। भाषितपुंस्का
नुपपत्तिश्च। स्त्र्यर्थे चायं चः पठितः। सर्वो हि शब्दो भाषितपुंस्कात्परः शक्यं कर्तुं॥ ॥ श्री ॥

तस्याः स्त्रिया एवाभिधानमिति। पुंवत्कर्मधारये सनेनार्थेन ज्ञातं यदंगारकशब्दादेरप्रसंगः शक्यते हि कालिकांगारकशब्देन साहचर्यादभिधातुमेवमन्यत्रा राम०
पि योज्यं। सर्वो हि शब्द इति। एताः कालिकावृंदारिका इति भवेत् सति छेदात् भाषितपुंस्कात्परः कालिका शब्द इति पुंवत्प्रसंगः॥ ॥ श्री॥ ॥ ११६

अर्थातिदेशादिति। ह्यर्थस्य पुमर्थोऽभवतीत्यर्थे। तिदिष्टेन ह्वाचीशब्दः प्रवर्त्तते। भिन्नविषयत्वात्तु विप्रतिषेधानुपपत्तिरेवो ह्रस्वोऽर्थस्य पुंवद्भावः। पुंवद्भावोऽपि निर्व
र्त्तमान इति। स्त्रीप्रत्ययस्य निवृत्तौ दीर्घो तत्त्वाभावाद्ध्रस्वस्याप्रवृत्तिः स्यादि। ह्रस्वत्वमिति। ननु ह्रस्वे प्रवृत्ते प्यर्थस्यानिवृत्तत्वात् कथं पुंवद्भावो ह्रस्वेन बाध्यते। उच्यते।

अस्तु तर्हि अर्थग्रहणं। अर्थातिदेशे विप्रतिषेधानुपपत्तिः। अर्थातिदेशे विप्रतिषेधो नोपपद्यते। पठिष्यति ह्याचार्यो विप्रतिषेधं पुंवद्भावाद्ध्रस्व
त्वं वि द्वारिके व्रितिस विप्रतिषेधो नोपपद्यते। किं कारणं। द्विकार्ययोगो हि नाम विप्रतिषेधः। न चात्रैको द्विकार्ययुक्तः। शाकस्य ह्रस्वत्वं अर्थस्य पुंवद्भा
वः। किं च सर्वप्रसंगोऽविशेषादिति सर्वस्य अर्थस्य पुंवदर्थः प्राप्नोति। अस्यापि प्राप्नोति। अंगारकाः नाम शकुनयः तेषां कालिकाः स्त्रियः। कालि
कावृंदारिकाः अंगारकवृंदारिकाः प्राप्नुवंति क्षेमवृद्धयः क्षत्रियाः तेषां तनुकेश्यः स्त्रियः तनुकेशी वृंदारिकाः क्षेमवृद्धिवृंदारिकाः प्राप्नुवंति हं
सस्य वरटा। कच्छपस्य डुली ऋश्यस्य रोहित् अश्वस्य वडवा पुरुषस्य योषित्। किं कारणं। अविशेषात्। न हि कश्चिद्विशेष उपादीयते एवं जातीयकस्य
स्त्र्यर्थस्य पुंवदर्थो भवतीति। अनुपादीयमाने हि विशेषे सर्वप्रसंगः। कथं नाम नोपादीयते यावता भाषितपुंस्कादित्युच्यते भाषितपुंस्कानुपपत्ति
स्तु भवति। न ह्यर्थे नपौर्वापर्यमस्ति। अयं तावद्दोषः। यदुच्यते अर्थातिदेशे विप्रतिषेधानुपपत्तिरिति। नावश्यं द्विकार्ययोग एव विप्रतिषेधः। किं
तर्ह्यसंभवोऽपि। स चात्रास्त्यसंभवः। कोऽसावसंभवः। पुंवद्भावोऽपि निर्वर्त्तमानो ह्रस्वत्वस्य निमित्तं विहन्ति ह्रस्वमपि निर्वर्त्तमानं पुंवद्भावं बाधते एषोऽ
ऽसंभवः। अस्य संभवे युक्तो विप्रतिषेधः॥ ॥ ॥

यदि कृतं ह्रस्वत्वं प्रयोगे श्रूयते एवं तत्कृतं भवति यदि तु कृतमपि पुंवद्भावेन निवर्त्यते ततः अकृतमेवैतत्स्यादिति परत्वात्प्रवर्त्तमानं ह्रस्वत्वं पुंवद्भावं बाधते॥ ॥
१ ॥श्री॥ ॥७॥ ॥

=कालिंमन्ये स्यादि विषयं ह्रस्वत्वं सामर्थ्याद्बाधकं भवतीति भावः।१=

तस्मादस्त्विति। शाकृपक्षेसाक्षाउन्तरपदेनपौर्वापर्यसंभवात्। भाषितपुंस्कादनूङ्. यस्मिन्निति। समुदायः समासार्थोऽवयवेनविग्रहः। निपातनादिति। नन्वलौकिक
त्वादस्यवक्यंनिपातनादितिपरिहारः लुकापित्तर्ह्यलौकिकत्वान्नभाव्यंयथालुकमसंगोऽश्ववसीयतेः लुगप्यश्ववसीयतामित्यदोषः। अथवेति। ननुचपराग्र्यत्वात्

=कांपुनरिति·अयंभावः·भक्त्रूशब्देनोक्रूभिन्नोभावरूपः·शब्दोप्यभिधीयतेतद्धउविद्धाशौधंदारिकाचेति[redacted]वाकेरशूविद्भ्यापुनरस्यकास्यविग्रहवत्स्या=इत्यत्रेशब्दइति·एवंचनिपातनादिस्यस्योभ्यातादित्यर्थः=शाब्दातिरेकेणलोकेऽगपुंस्मानतादितिभावः॥=
स्यामावादैऽउविद्धंदारिकेस्वादौपुंस्त्वाभावेनप्राप्नोति·तस्माद्धाचकप्रत्ययेनतादृशमाश्रीयतेतद्धावनयत्स्याप

अयंतर्हिदोषः। सर्वप्रसंगोऽविशेषादिति। तस्मादस्तुसएवमध्यमः पक्षः। ननुचोक्तं स्त्रीशब्दस्यपुंशब्दातिदेशइतिचेत्सर्वप्रसंगोऽविशेषा
दिति। नैषदोषः समासनिर्देशोऽयंभाषितपुंस्कादनूङ्यस्मिन्सोऽयं भाषितपुंस्कादनूङिति। यद्येवंलुकप्राप्नोति। निपातनान्नभविष्यति।
अथवा अलुक्प्रकृतः सोऽनुवर्तिष्यते। कंपुनरनूङिस्यनेनस्त्रीप्रत्ययस्यग्रहणं शक्यंविज्ञातुं। नत्रिवयुक्तमन्यसदृशाधिकरणे
तथाह्यर्थगतिः। नञ्युक्तेचान्यस्मिंस्तत्सदृशेकार्यंविज्ञातेतथाह्यर्थोगम्यते। नद्यथाब्राह्मणमानयेत्युक्तेब्राह्मणसदृशआनीय
ते। नासौलोष्टमानीयकृतीभवति। एवमिहाप्यनूङिस्युक्तेऊङःप्रतिषेधादन्यस्मिन्नूङ्सदृशेकार्यंविज्ञास्यते। किंचान्यत् अनूङ्ऊङ्स
दृशंस्त्रीप्रत्ययइति। एवमपिइउविद्धंदारिकाऐउविद्धंदारिकाश्युवंदारिका[redacted]पार्थ्यवंदारिकाउष्णिकूवंदारिकाऔशिजंवंदारिकाअत्र

इवमुक्तेर

पुंवद्भावोनप्राप्नोति॥ ॥×वंदारिका·दरवंदारिकादारद× ॥

कथंलक्षणयोः संबंधः उच्यते। लुगधिकारसामर्थ्याल्लक्षणांगमपिलक्षणंभविष्यतिसंज्ञापरिभाषवत्। इउविद्धिति। इउविद्धेपरंपद्योऽपत्यंजनपदशब्दादिसत्र। राम०
उशिगस्यापत्यमणगपत्यएउभयोरतस्यैतिवियालुक॥ ॥ ॥श्री॥ ॥७॥ ॥०॥ ११७

कर्त्तव्योऽत्र यत्न इति। नेह। दात्री नामेव ग्रहणं। किं तर्हि प्रत्ययमात्रस्य लुक्स्थानिवद्भावात्तस्य योगे भवति सेयं यदा तु भाषितपुंस्कादूङ् यस्मिन्नकृतः स भाषितपुंस्कादनूङिति प्रसज्यप्रति-
षेध आश्रीयते तदा दोषः स्यात् प्रसंग एव। पट्वीमृद्वीभार्य इति। पट्वीशब्दस्योत्तरपदेनानन्तर्याभावात्पुंवद्भावाभावो मृद्वीशब्दस्यानन्तर्यात् पुंवद्भावः। इतरो यथोक्तमप्रतिपद्याह।
पुंवद्भावः कस्मान्न भवतीति भाषितपुंस्कादिति। एकदेशेन समस्तं सत्तेन लक्ष्यते तत्रोत्तरपदेनानन्तर्याभावात् पट्वीशब्दस्य पुंवद्भावाभावः। इतरस्तु भाषितपुंस्कत्वमप्रत्नास्तीत्यनेन

[=प्रत्ययस्तेन ... श्रीयत इति भावः॥२=]

कर्त्तव्योऽत्र यत्नः। अथेह कथं भवितव्यं पट्वीमृद्वीभार्य इति। किं पट्वीमृदुभार्यः। आहोस्वित् पटुमृदुभार्यः पट्वीमृदुभार्य इति भवितव्यं पुंवद्भावः क-
स्मान्न भवतीति भाषितपुंस्कादित्युच्यते। ननु च भोः पटुशब्दो मृदुशब्दश्च पुंसि भाष्येते समानायामाकृतौ यद्भाषितपुंस्कं आकृतं तद्गौ चैतौ भाषितपुंस्कौ।
समानायामाकृतावपि भाषितपुंस्कौ। कथं। आरभ्यतेऽत्र मतुब्लोपः। एवं तर्हि भाषितपुंस्कादनूङः समानाधिकरणे उत्तरपदे पुंवद्भवतीत्युच्यते। यस्त्वा-
त्र भाषितपुंस्कादनूङ् समानाधिकरणे उत्तरपदे कृतस्तस्य पुंवद्भावः। यस्य चाकृतः नासौ भाषितपुंस्कादनूङ् समानाधिकरणे उत्तरपदे पूरण्यां प्रधा-
॰ तत्पूरणीग्रहणं कर्तव्यं। प्रधानं या पूरणी तत्रेति वक्तव्यं इह मा भूत्॥ ॥ ॥

नोक्तमिति मत्वाह। ननु चेति। इतरः शिष्यबुद्धिपरीक्षार्थमाह समानायामिति। आकृतौ इति। पटुर्गुणो मृदुर्गुण इति गुणो भाषितपुंस्को भार्यार्थो नु स्त्रीलिङ्गवृत्तिर्भावः।
आरभ्यत इति। तत्र स्वपाठ एवमाह एवं च समाने प्रवृत्तिनिमित्ते पटुमृदुशब्दौ पुंसि स्त्रियां च वर्त्तेते इदानीमाचार्यः स्वाभिप्रायं प्रकाशयति। एवं तर्हीति॥ ॥ ॥

भा०वृ०६ ११८

कल्याणपंचमीक इति। पक्षेऽन्यपदार्थः अवयवानामस्पष्टत्व तिरोधानाच्चाक्षिप्रणापः प्राधान्यमपूरणी प्रमाणयोरिति समासान्तोपि प्रधानपूरणाण्एव विहितः स्पष्टवचन भवतीति नघन्तस्त्वेति कप्भवति। इतरस्तु सर्वत्र बहुव्रीहौ वर्त्ति पदार्थस्य प्राधान्यं मतमाह इष्यति। अथेह कथमिति। रात्र्योः त्रेति। उद्भूतावयवा रात्र्योः प्रधानं तत्र यथैव प्रथमार्थात्रयः समासाभिधेया एवं पंचम्यपीति वर्त्ति पदार्थस्यान्यपदार्थः नु प्रवेशान्न प्राधान्यमित्यर्थः। प्रधाने कार्यसंप्रत्ययात् प्रधानपूरणीग्रहण

=तिरोहितावयवभेदस्य समुदायस्यान्यपदार्थत्वेनाभिधानात् =

कल्याणी पंचमी आसां पक्षस्य कल्याणपंचमीकः पक्ष इति अथेह कथं भवितव्यं कल्याणीपंचमी आसां रात्रीणामिति कल्याणीपंचमा रात्रय इति भवितव्यं। रात्र्योः त्र प्रधानं। तसिलादय इह केचित्तसिलादयः प्राक्पशस्तु चः पठ्यंते येषु पुंवद्भावो इष्यते। तत्र किं न्याय्यं। परिगणनं कर्त्तव्यं। तसिलादी त्रतसौ त्रसौ तसिलादी द्रष्टव्यौ। तस्यां शालायां वसति तत्र वसति। तस्याः ततः। यस्याः यतः। तरप् तमपौ तरप् तमपौ तसिलादी द्रष्टव्यौ। दर्शनीयतरा [redacted]। दर्शनीयतमा। चरट् जातीयरौ। चरट् जातीयरौ तसिलादी द्रष्टव्यौ। पटुचरी। पटुजातीया। कल्पप् देशीयरौ कल्पप् देशीयरौ तसिलादी द्रष्टव्यौ। दर्शनीयकल्पा दर्शनीयदेशीया। रूपप्पाशपौ। रूपप्पाशपौ तसिलादी द्रष्टव्यौ। दर्शनीयरूपा दर्शनीयपाशा। थमुथालौ थमुथालौ तसिलादी द्रष्टव्यौ। कया कथं। यया यथा। दार्हिलौ तसिलादी द्रष्टव्यौ। तस्यां वेलायां तदा तस्यां वेलायां तर्हि तिल्थ्यनौ। तिल्थ्यनौ तसिलादी द्रष्टव्यौ। वृकीष्टकन्तिः॥ ×वोनेष्यते केचिन्नान्यत्र पठ्यंते

x पुंवद्भावश्चेष्यते

मिसादुः। तसिलादिषु वृकत्वेः स पाठः। घरूप कल्पेति परत्वात् ह्रस्वस्य भावात् तस्माद् दर्शनीयकल्पेति पाठः। वृकतिरिति। लिंगविशिष्टपरिभाषया वृकीशब्दात् वृकज्येष्ठाभ्यामिति तिल्प्रत्ययः। परिगणनसामर्थ्यात् जाने स्त्रुतिपुंवद्भावप्रतिषेधाभावः॥ ॥ श्री ॥

ग्रम० ११८

=स्यानिमित्ता (?) … ॥१॥=

अजथ्येति। पूर्ववद्रजाशब्दाद्रजाविभ्यां थ्यन्निति थ्यन्प्रत्ययः। हास्तिकमिति। यद्यत्र पुंवद्भावो न स्यात्। तदा हस्तिनीशब्दस्य यस्येति चेति लोपे कृते तेन स्यच्छाणि वत्त्वात् सिद्धं वदस्त्रा भादित्यसि कृत्वा च न तद्धितं इति टिलोपो न स्यादिति पुंवद्भावो विधीयते। ठक्छसो श्चेत्य नेनात्र पुंवद्भावो न भवति। छसा सहचरितस्य ठकोग्रहणात्। शेषे नेय इति। शेषे तस्मै हितामित्यां वर्णादिति टिखपन कारो पुंवद्भावे शेषे ते यौ हितेयइतिस्यात्। अग्नायीति। अग्नेर्हे गितिनिवासर्वेत्राग्निक लिभ्यां ढग्वक्तव्य इति ढक्। तत्र पुंवद्भाव

=… ॥=

अजथ्यायूथिः। शसिवद्बह्वल्पार्थस्य। बह्वल्पार्थस्य शसि पुंवद्भावो वक्तव्यः। बह्वीभ्यो देहि बहुशो देहि। अल्पशो देहि। [redacted] त्वतलोर्गुणवचनस्य। त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः। पट्वीभावः पटुत्वम्। पट्वीभावः मृदुत्वं। पटुता मृदुता। गुणवचनस्येति किमर्थं कठीत्वं। कठीता। भस्याढे तद्धिते। पुंवद्भावो वक्तव्यः। हस्तिनीनां समूहो हास्तिकं। अढ इति किमर्थं। शेषे नेयो रौहिणेयः। पथ्यढ इत्युच्यते। अग्नायी देवता अस्य स्थालीपाकस्य आग्नेयः स्थालीपाकः। अत्र न प्राप्नोति। इह च प्राप्नोति। कौण्डिन्यं सापत्न इति। यदि पुन रनपत्य इत्युच्यते नैवं शक्यं इह हि न स्यात्। गार्ग्यायण्या अपत्यं माणवकः गार्गीजाल्मः। अस्तु तर्हि अढ इत्येव। कथं कौण्डिन्यः सापत्न इति। कौण्डिन्ये निपातनात् सिद्धं किं निपातनं आगस्त्यकौण्डिन्ययोरिति। सापत्नः प्रकृसंतरत्वात्॥ =कृपादिदेषान् ॥२॥= ॥ ॥

=पुंवत्वे … ॥१॥=

प्रतिषेधाद्याय्येयइतिप्राप्नोति। कौण्डिन्य इति। कुण्डिन्या अपत्यं गर्गादित्वात् यञ्। तत्र पुंवद्भावे सति कौण्ड इति प्राप्नोति। सपत्नीशब्दाद् शिवादित्वात् सापत्न इति प्राप्नोति। यदि पुन रिति। अढ इत्यपनीयानपत्य इति उच्यमाने आग्नेय इत्यनपत्यत्वात् सिध्यति। शेषे नेय रौहिणेय कौण्डिन्य सापत्नानां अपत्यप्रत्ययान्तत्वात् न सिध्यंति। गार्ग्यायण्या इति गोत्रस्त्रियाः कुत्सने णचेति णे अपत्यप्रत्यये पुंवद्भावो न प्राप्नोति॥ ॥ ॥ श्री॥ ॥श्री॥ ०

=सपत्नीशब्दादिति … ॥२॥=

भा० कौ० ६
११५

सपत्नशब्द इति। अन्यसपत्न इति निर्देशोऽत्र लिंगं। तस्मादेव ज्ञापकं। रवादिषु दृष्टान्तं। इति निरुक्ते सपत्न्याः सापत्न्यमिति शिवाद्यणि पुंवद्भावे सापत्नः सिध्यति। कर्तेव्योऽत्रे
ति। स्त्रियां यो योऽणो विहितः स्त्रीभ्यो ढगित्यनेन तत्र पुंवद्भावप्रतिषेधो नत्वन्यत्र ढगि सर्वस्मिन्निति व्याख्येयं। ढकृ छसो रिति। छसंनियोगेन तत्र विहितिचेति पदसंज्ञाविधानात्
भत्वाभावात् ढच नं। तो तादिति कादेशो न भवतीति। ढस्येति वर्णमात्रस्य स्थानित्वे ऽल्विधित्वात् स्थानिवत्वाभावात् संघातस्य तु स्थानित्वे संनिपातपरिभाषोपस्थि

= ननु पंचमी समासेन नाधिकसिद्धे ... = सपत्नशब्द एव शिवादौ पठ्यते ... तेन समानः पतिर्यस्याः ... इति भवति। किं तु पुंवद्भावे ... एवेति भावः। = २ =
... पंचमी समासाभावपक्षे ... इति भावः। १ =

सपत्नशब्दः प्रकृत्यंतरमस्ति। कथमग्नायी देवता अस्य स्थालीपाकस्य आग्नेयः स्थालीपाक इति। अस्तु तर्ह्येनपसर्गे त्वेवा तथ्यं गार्गी जात्यः। गा
२ गार्ग्ये यौनसंदेते। ढक्व्योऽत्रयपत्नः। ढकृ छसो स्त्री। ढकृ छसोस्तु पुंवद्भावो वक्तव्यः। भवत्याः छात्राः भावत्काः भवदीयाः। ढकू यग्रहणं किमर्थं। नइके
हृते अजादावित्येव सिद्धं। नैवं शक्यं। अजादिलक्षणो हि मा भूदिति कादिवस्यसंगः। अजादिलक्षणो हि मा भूदिति कादिवस्य सज्येत। तद्यथा मयि
तं पणपमस्य माभूदिति कइसकारलोपे कृते तो तादिति कादेशो न भवति एवमिहापि न स्यात्। तसिलादि। क्य उ. मा। मानिन्ग्रहणं किमर्थं। मा
नि न्ग्रहणमसत्यर्थं समानाधिकरणार्थं च। मानिन्ग्रहणं क्रियते असत्यर्थमसमानाधिकरणार्थं च। असत्यर्थं तावत्। दर्शनीयां मन्य
तेदेवदत्तो यज्ञदत्तां दर्शनीयमानी अयमस्याः। असमानाधिकरणार्थं च. दर्शनीयां मन्यते देवदत्ता यज्ञदत्तां दर्श

नात्। क्य उ. मा। मानिन्ग्रहणमिति। स्त्रीलिंगे समानाधिकरणे उत्तरपदे पूर्वेण सिद्धत्वाद्यथा दर्शनीयमात्मानं मन्यते दर्शनीयमानिनी देवदत्तेति। अन्यथा कस्मा एम०
व कर्मत्वात् कर्त्रीत्वाच्चास्तिसामानाधिकरण्यं॥ ॥श्री॥ ॥श्री॥ ॥ ११५

न कोप- स्वाद्यस्पो पाणिनि पठितं सत्त्रत्रयस्येत्यर्थः। पुंवद्भावमात्रस्येति। ख्योपसंख्यानिकस्यापीति यावत्। माध्यमिकीया इति। मध्यमिकायां भव इति वैणुकादिभ्य

श्छण् वक्तव्य इति छण् प्रत्ययः। तेत्र भस्याढ इति पुंवद्भावप्रसंगः। शाल्लूकिकीया इति। शाल्लूकानिविद्यंते स्यामितिकुमुद्यादिकेतिकः। शाल्लूकिकायां भव इति वृद्धाद्के कां

त स्वोपधादितिछः। विधिरपीति। नगर्यो ग्रामे चा भाषितपुंस्कत्वात्। वैलेपिकमिति। ञ्क्रण् महिष्यादिभ्य इत्यण्। एवं तर्हीति। प्रयोगमूलो ह्याख्यानात्। यथेष्टवि

= न तत्र्वे कार स्यक्षवर्णन सातः २ =

न कोपधायाः। किमिदमेव माद्यनुक्रमणं स्वाद्यस्य योग सविषये आहोस्वित् पुंवद्भावमात्रस्य। किं चातः। यद्याद्यस्य योगस्य विषये माध्यमिकी

याः। शाल्लूकिकीयः अत्र न प्राप्नोति। विधिरप्यत्र न सिध्यति। किं कारणं। भाषितपुंस्कादनूङ् इह तर्हि वैलेपिका याधर्म्ये वैलेपिकं विधिप्स्रुति

द्धो भवति। प्रतिषेधश्च न प्राप्नोति। अथ पुंवद्भावमात्रस्य विषये। हस्तिनीनां समूहो हास्तिकं जातिलक्षणः पुंवद्भावप्रतिषेधः प्राप्नोति। एवं

तर्हि न कोपधाया इत्ययं योगः पुंवद्भावमात्रस्य विषये। न त उत्तरमेव माद्यनुक्रमणमाद्यस्य योगस्य विषये। कोपधप्रतिषेधे तद्धितवुग्रहणं। को

पधप्रतिषेधे तद्धितस्य यः ककारो वोश्च यः तस्य ग्रहणं कर्त्तव्यं। इह माभूत्। पाकभार्या भेकभार्यः। स्वांग। [redacted] स्वांगाच्चेतो

मानिनि। स्वांगाच्चेतो मानिनीति वक्तव्यं। इहापि यथा स्यात्। दीर्घमुखमानी। श्लक्ष्णमुखमानी। यद्यमानिनीत्युच्यते दीर्घमुखमानिनी श्ल

क्ष्णमुखमानिनीति न सिध्यति। प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणं भवतीत्येवं भविष्यति॥ ४ङि लुच्यते न हेतद्भवति भाषितपुंस्कादनू ४।५

षयविभागस्ताभः। पाकभार्य इति। पाकशब्दः प्रथमवयोवाची ततो ङीव प्रवाद्यो जातिलक्षण प्रभेकभार्य इति। भेकशब्दः क्रियाशब्दो मंडूकजातिवाचित्वेतु भे

कीभार्य इति भाव्यं। जातेश्चेति पुंवद्भावनिषेधात्। स्वांगाच्चेतः। स्वांगाच्चेत इत्येतावत् सूत्रमिति मत्वा वार्त्तिकारंभः॥ ॥ श्री ॥

= भयपुक्तोभेकः ।० =

पुंवत्। किमर्थमिति। कर्मधारये स्त्रियाः पुंवदिति सिद्धः पुंवद्भावो जातीयदेशीययोरपि तसिलादिषु निमित्ताभावः प्रतिषिद्धार्थमिति। प्रतिषिद्धोऽपि पुंवद्भावो यथा

कारकवृंदारिका२

पुंवत्। किमर्थमिदमुच्यते। न सामान्येन सिद्धं पुंवत्कर्मधारये प्रतिषिद्धार्थं प्रतिषिद्धार्थोयमारंभः गनको पधायाः इत्युक्तं तत्रापि पुंवद्भावो भवति। कारिका वृंदारिका। कारकवृंदारिका। कारकजातीया। कारकदेशीया। संज्ञापूरण्योश्चेत्युक्तं तत्रापि पुंवद्भवति दत्ता वृंदारिका दत्तवृंदारिका। दत्तजातीया। दत्तदेशीया। पंचमी वृंदारिका पंचमवृंदारिका। पंचमजातीया। पंचमदेशीया। वृद्धिनिमित्तस्येत्युक्तं तत्रापि पुंवद्भावो भवति। स्रौघ्नी वृंदारिका स्रौघ्नवृंदारिका। स्रौघ्नजातीया। स्रौघ्नदेशीया। स्वांगाच्चेतोऽमानिनीत्युक्तं। तत्रापि पुंवद्भावो भवति। श्लक्ष्णमुखी वृंदारिका श्लक्ष्णमुखवृंदारिका। श्लक्ष्णमुखजातीया श्लक्ष्णमुखदेशीया। जातेश्चेत्युक्तं। तत्रापि पुंवद्भवति कठी वृंदारिका कठवृंदारिका कठजातीया कठदेशीया। कुक्कुट्यादीनामंडादिषु पुंवद्भवचनं। कुक्कुट्यादीनामंडादिषु पुंवद्भावो वक्तव्यः। कुक्कुट्या अंडं कुक्कुटांडं। मृग्याः पदं मृगपदं काक्याः शावः काकशावः॥ न वा स्त्रीपूर्वपदविवक्षितत्वात्। न वा वक्तव्यं किं कारणं अस्त्रीपूर्वपदविवक्षितत्वात्। नात्र स्त्रीपूर्वपदं विवक्षितं [redacted] किं तर्हि अस्त्रीपूर्वपदं विवक्षितं। उभयोरंडं उभयोः पदं उभयोः शावः॥ ॥ ॥

स्यादित्येवमर्थं। न वेति। पुमान् वृत्तिवाक्यविषयः स्त्रियां तु वाक्यमेव भवति वृत्तिस्त्वनभिधानान्न भवति॥ ॥ श्री ॥

इहतु कस्मादिति। नहि पुंसा क्षीरस्य संबंधसंभवः। अत्रापीति। जात्यंतरनिवृत्तिपरायां स्त्रीत्वमनुपकारित्वाद्विवक्षितमित्यर्थः। यत्र तु लिंगविशेष उपकारक
स्तत्रासौ विवक्षित एव यथा जामूत्रेण पर्युक्षितं त्याज्यमिति। असतश्चेति। विवक्षाया एव बलीयस्त्वमित्यनेन प्रतिपाद्यते। समुद्रः कुंडिकेति। असदेव समुद्रत्वं कुं के२
डिकायामसत् कुंडिकात्वं समुद्रे वारोप्य शब्दप्रयोगः। वायुव्वारुणमिति। उभयत्र वायोः प्रतिषेधो वक्तव्य इत्यानङ्. न भवति वायुवरुणौ देवतास्य सास्य देवते
चोदनायां

इह तु कथं मृग्याः क्षीरं मृगक्षीरं। अत्रापि न वा स्त्रीपूर्वपदविवक्षितत्वादिसेव। कथं पुनः सतोऽन्नामाविवक्षा स्यात्। सतोऽप्यविवक्षा भवति। त
द्यथा। अलोमिका एडका। अनुदरा कन्या। असतश्च विवक्षा भवति। तद्यथा। समुद्रः कुंडिका। विंध्यो वर्द्धितकमिति। अग्नेरीत्वाद्वरुणे वृद्धिर्वि
प्रतिषेधेन। अग्नेरीत्वाद्वरुणस्य वृद्धिर्भवति विप्रतिषेधेन अग्नेरीत्वस्यावकाशः। अग्नीषोमौ वरुणस्य वृद्धेरवकाशः॥ वायुवारुणं। इहो
भयं प्राप्नोति। आग्निवारुणीमनड्वाहीमालभेत। वरुणस्य वृद्धिर्भवति विप्रतिषेधेन। नैष युक्तो विप्रतिषेधः। द्विकार्ययोगो हि विप्रतिषेध
ः। नात्रैको द्विकार्ययुक्तः। कथं अग्नेरीत्वं वरुणस्य वृद्धिरिति। नावश्यं द्विकार्ययोग एव विप्रतिषेधः। किं तर्ह्यसंभवोऽपि। स चात्रास्त्यसंभवः। कोऽ
ऽसावसंभवः। अग्नेरीत्वमभिनिर्वर्त्यमानं वरुणस्य वृद्धिं बाधते॥ ॥ ॥

=परित्यज्य चापवादविषयमिति न्यायात्.२=

स्तद्धि

स्यात् देवताद्वंद्वे चेत्युभयपदवृद्धिः। आग्निवारुणीमिति। नन्वीत्वमंतरंगं बहिरंगा तत्रापदे वृद्धिस्तापेक्षणादिति युक्तो विप्रतिषेधः। नैतदस्ति। इद्वृद्धाविती ईत्वस्याप
वाद इत्वं विधीयते ततोऽपवादविषयापेक्षणान्नास्त्यंतरंगत्वमीत्वस्यात्र विषये॥ ॥ ॥ ॥

=इद्वृद्धावितीत्वमीत्वस्यापवाद इत्यर्थः।

भा॰कै॰६ वरूणस्य वृद्धिमिति। दीर्घोच्चवरूणस्येति निषेधात्। ईत्वं बाधत इति। इहृद्वाविति वचनात्। कालिंमन्ये इति। कालीमात्मानं मन्यते कात्येवाहमिति मन्यत इत्य
१२१ र्थः। न॰ त्रेकित्ररेति। अत्र न कोपधाया इति पुंवद्भावः प्रतिषिद्धः। हारदिकेति। हरदोऽपत्यं स्त्री घञ्यण्गवेस्य एतत्स्यात्तस्यैति लुक् ततः प्राग्दीव्यतः इति कः।

=कालीमप्रियात्मनं मन्यते इत्यर्थे वैयधिकरण्यात् पुंवत्प्रतिषेधः कालीम्मन्येति २=

वरूणस्य वृद्धिरभिनिर्वर्त्तमाना उग्रे ईत्वं बाधते। एषोऽसंभवः। सत्संभवे युक्तो विप्रतिषेधः। पुंवद्भावाद्ध्रस्वत्वं दिह्वादिकेषु। पुं
स्विह्वादिकेषु२ वद्भावाद्ध्रस्वत्वं भवति विप्रतिषेधेन। पुंवद्भावस्यावकाशः। पटुभार्यः। मृदुभार्यः। ख्विन्नि ह्रस्वत्वं भवतीत्यस्यावकाशः। कालिंमन्यः हरि
णिंमन्यः। इहोभयं प्राप्नोति। कालिंमन्या। हरिणिंमन्या। ह्रस्वो भवति विप्रतिषेधेन। घादिषु न घादि ह्रस्वो भवतीत्यस्यावकाशः। नर्त्त
कितरा नर्त्तकितमा। पुंवद्भावस्यावकाशः दर्शनीयतमा। इहोभयं प्राप्नोति। पटुतरा पटुतमा। ह्रस्वो भवति विप्रतिषेधेन। के ह्रस्वो
भवतीत्यस्यावकाशः। नर्त्तकिका। पुंवद्भावस्यावकाशः। हारदिका। इहोभयं प्राप्नोति। पटुका। मृद्विका। ह्रस्वत्वं भवति विप्रतिषेधेन
। अथेदानीं ह्रस्वत्वे कृते पुनः प्रसंगविज्ञानात् पुंवद्भावः कस्मान्न भवति। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति॥ ॥घरूपः॥
ग्रहणं किमर्थं। अनेकाचो ह्रस्व इतीयत्युच्यमाने रवद्भातरा मालातरा अत्रापि प्रसज्येत। नैतदस्ति प्रयोजनं भाषितपुंस्कादित्युच्यते।
×दर्शनीयतरा× ॥ एवमपि दन्तानरापुत्रातरा [redacted] अत्रापि प्राप्नोति॥ " "
तसिलादिष्विति पुंवद्भावः। ननु परिगणितास्तत्र तसिलादयो न च कल्पप्रत्ययः परिगणितः एवं तर्हि विप्रतिषेधात् कल्पप्रत्ययोपि तत्रास्युपगत इत्यनुमीयते तेन रामः
॥ नासौ परिगणितः॥ घरूप॥ ॥श्री॥ भिधाना॥ ॥श्री॥ १२१

=हारदिके सवकाशप्रदर्शनात्संहिकेसु ह्रस्वत्वेसनिबोधः १=

ईत इति। स्त्रांगाच्चेतः इसतः। स्त्रियां स्त्रियां इति वर्त्तते इति। तेन स्त्रीवाचिन ईकारस्य ह्रस्वो विधीयमानो ग्रामणी शब्दस्य न भविष्यत्यनेकत्वादीकारस्य शेषप्रकृत्यर्थमिति। विशिष्टस्य शेषस्य [redacted] प्रकृत्यर्थमित्यर्थः। ग्रामणीच्च यानदीति। ग्रस्त वंधुनरावस्त्वं धूनतरेति। ईदंतं चेति। स्त्रितरा स्त्रीतरेति। अविशेषेणेति। ईतो नेकाच इति विशेषानाश्रयात्। यद्येवमिति। यदीत इत्यनुवर्त्तते ङी ग्रहणं च प्रसारव्याय स्त्रिया इत्यनेनेनेकाशो विशेषणं तेन दाल क्ष्मीतं ग्योरीकारः स्त्रियां न विहित इति निसं ह्रस्वत्वं नास्ति

शेषग्रहणं

= ननु ग्रामणीशब्दस्यापि स्त्रीवाचकत्वाद्यत्र स्त्रियाइत्यस्यानुवृत्तौ कथमतिप्रसंगनिरासनिरत आह नेनेति = नन्वस्य पिङी ग्रहणे शेषग्रहणं सिद्धेरेवप्रयुक्तोऽनन्यस्य शेषत्वादत आह विशिष्टस्येति = नच ग्रामणीच्च यानद्यादिनाभावे दर्शितं =

ईत इति वर्त्तते तेनेकमकृतं स्त्रांगाच्चेतो मानिनीति। एवमपि ग्रामणीतरः सेनानीतरः। अत्रापि प्राप्नोति। स्त्रियामिति वर्त्तते। एवमपि ग्रामणीतरा सेनानीतरा अत्रापि प्राप्नोति। स्त्रियाः स्त्रियामिति वर्त्तते शेषप्रकृत्यर्थे तर्हि ङी ग्रहणं कर्त्तव्यं। नद्याः शेषस्यान्यतरस्यामिति। कस्य शेषः। अङी वयानदी ख्यंतं चयदेकाच्। अंतरेणापि ङी ग्रहणं प्रकृतः शेषः कथं ईत इति वर्त्तते। अनीच्चया [redacted] नदी ईदंतं चाऽपियदेकाच्। शेषग्रहणं चापि शक्यमकर्त्तुं कथं। अविशेषेण घादिषु नद्या अन्यतरस्यां ह्रस्वत्वमुत्सर्गस्तस्यानेकाच इति नित्यं ह्रस्वत्वमपवादः। तस्मिन्नित्ये प्राप्ते ऊङितो विभाषे पमारभ्यते। यद्येवं लक्ष्मितरा तंत्रितरा इति न सिध्यति। लक्ष्मीतरा तंत्रीतरा इति प्राप्नोति। इष्टमेवैतत्संगृहीतं लक्ष्मीतरा तंत्रीतरा [redacted] [redacted] इसेव भवितव्यं। एवं हि सौनागाः पठंति घादिषु [redacted] नद्या ह्रस्वत्वे कृते नद्याः प्रतिषेध इति॥ ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य तृतीयपादे द्वितीयमाह्निकम्॥ ॥ ॥

= ईदंतं चापीति अत्रपरामर्शः =
= नत्वेसादिष्वा प्राप्तिः स्त्रिया =
= इत्यनुवर्त्तनादिति बोध्यं =

= नवेत्यनुवर्तते स्याप्यपि नित्यं ह्रस्व
= त्वमपवादः स्यादेवं न विदुषि तं वैसा
= तैः लिक्ष्म्यानापत्तिरत आह नलक्ष्मि
= ल्लिते विभाषा ... ह्रस्वत्वलक्ष्मी का
= चोऽसंज्ञत्वेन नदस्यावाचित्वात्तर्था दि
= तिभावः =

[illegible]

नद्या अन्यतरस्यामित्यत्रापि स्त्रिया इत्यनुवर्त्तनान्नात विकल्पेन ह्रस्वत्वं नास्ति सति हि ङी ग्रहणे स्त्रिया इत्यस्य प्रयोजनाभावादननुवृत्त्या भावान्नद्याः शेषस्येत्यनेन ह्रस्वः सिध्यतीति भावः। इष्टमिति। सति हि ङी ग्रहणे नद्याः शेषस्येति विकल्पे नप्राप्तं ह्रस्वत्वं वचनं प्रतिषेधमसति तु ङी ग्रहणे। स्त्रिया इति सस्य सत्त्वद्वये प्यनुवृत्त्या ह्रस्वस्याप्रसंगः कृते स्त्रिया इति नास्तिलक्ष्म्यमेदइति निर्द्धं सर्वमिष्टं॥ ॥ इत्युपाध्यायकैयटकृते भाष्यप्रदीपे षष्ठस्याध्यायस्य तृतीयपादे द्वितीयमाह्निकम्॥ ॥

= स्त्रियाइत्यनुवृत्तिस्तु न विच्छिन्नत्वात् = स्त्रियाइत्यनुवर्त्तनादिति श्रीतरेत्यादिष्वाह्रस्वत्वेपिइतिभावः =

= एवं च ङी ग्रहणमसारव्याने शेषग्रहणं च कृत्वा यत्र इति चरन कुप्रमितिमत्कथापचकं =

भा० कै० ६ आन्महतः समानाधिकरणजातीययोः। महद्भूत इति। महच्छब्दो भूतशब्दश्चैकस्मिन्नर्थे चन्द्रादौ वर्त्तेते इति सामानाधिकरण्यत्वं प्राप्नोति। अन्यप्रकृतिरि-
१२२ ति। अन्यस्य महतः प्रकृतिः कारणमन्यप्रकृतिरमहान् भूतप्रकृताविति भूतशब्दस्य प्रकृतिः कारणं योऽर्थः प्रतिपादनाय शब्दोच्चारणाच्छब्दस्यार्थः कार-
णमुच्यते तदयमर्थो भूतशब्दार्थे महान् वर्त्तते। आमहतो भूतेन सामानाधिकरण्ये न तु महत इत्यर्थः। महान्महत्स्येवेति। महच्छब्दो महत्स्येव वर्त्तते न तु भूता

=कर्तृकरणोर्पदद्वयर्थः।२=

आन्महतः॥ इह कस्मान्न भवति आमहानमहान् संपन्नो महद्भूतश्चन्द्रमा
इति। अन्यप्रकृतिरमहान् भूतप्रकृतौ महान्महत्स्येव। अन्यो महान् अन्यः
आमहान् भूतप्रकृतौ वर्त्तते। महान्महत्स्येव तस्मादात्वं न स्यात्॥ तस्मादात्वं
न भविष्यति॥ ॥ ॥श्री॥ ॥

र्थे चिद्विषये हि प्रकृतिः कर्त्री न विकृतिः। तथा हि। संपद्यीभवति ब्राह्मणाः पटीभवन्ति तन्तव इति प्रकृतिसंख्याश्रयं वचनं दृश्यते न विकृतिसंख्याश्रयं तथा आ-
त्वं त्वं संपद्यते त्वद्भवतीति प्रकृत्याश्रयः प्रथमपुरुषो भवति न विकृत्याश्रयो मध्यमपुरुषः। ततश्च भूत इति निष्ठाप्रत्ययो भवन् क्रियायाः कर्त्र्ये महत्सु सन्नो न तु रामं०
१ विकारे महति॥ ॥श्री॥ ॥श्री॥ ॥ १२२

पुंवत्विति। वैयधिकरण्ये त्वत्वयुंवद्भावो ऽपि न प्राप्नोति। यथा च प्रकृतेः कर्तृत्वं दृश्यते तथा विकृतेरपि सुवर्णपिंडः खदिरांगारसवर्णौ कुंडले भवत इति विकारसंख्या श्रयं द्विवचनं दृश्यते। तथा क्लृपि संपद्यमाने चतुर्थीति विकाराच्चतुर्थी दृश्यते न प्रकृतेः। मूत्राय संपद्यते यवागूः उच्चारणाय कल्पते यवान्नमिति। तथा अ संघो ब्राह्मणाः संघः संपद्यते अपरे स्तनकाः पटः संपद्यत इति विकारसंख्याश्रयं वचनं दृश्यते। तत्र यदि महद्भूतेत्यत्र सामानाधिकरण्यमाश्रित्य पुंवद्भावो विधीयते तदा गोमतीभूतेत्यत्रापि प्राप्नोति। आत्वप्रसंगश्च। तत्र पुंवद्भावं तावत्साधयितुमाह। एवं तर्हीति। अमहत्सर्वमहच्छब्दो वर्त्तते इति भूतशब्दसामानाधिकरण्ये पुं

=तेन संपत्तिक्रियाकर्तरि विधीयमाना चतुर्थी विकाराद्देवो संपद्यत इति विकारस्यैव कर्तृत्वमावेदयत इत्यर्थः।।१= अमानिनस्तेन निजायशोगुणं दिकालवद्धिकुरुतः शिरः स्थितमिति श्रीहर्षप्रयोगे ऽपि वगतिः।।२=

पुंवत्कर्मधारयेत्यत्र पुंवद्भावो ऽपि तर्हि न प्राप्नोति। अमहती महती संपन्ना महद्भूता ब्राह्मणी। एवं तर्हि अमहन्महान्हितत्र स्तद्वा ची चात्र भूतशब्दोयं।। ।।अमहति हि महत्शब्दो वर्त्तते तद्वाची भूतशब्दो [redacted] यं प्रयुज्यते।। ।।किं वाचीम हद्वाची।। तस्मात् सिध्यति पुंवत्। तस्मात् सिध्यति पुंवद्भावः।। ।। ।।श्री।। ।।

=ननु महद्वाची सम्पुर्कं च्व्यं न प्रकृतेरेव कर्तृत्वादत आह। अयं भाव इति। = संमूर्छित इवेति। उभयरूपतया व्यवसीयमानत्वात् अभिधीयत इति। व्यंजने निशेषः। एवं चैकस्यैव वस्तुनः कर्त्तारावस्योपाधि ... विरुद्धयोरपि क=

वद्भावो भवतीत्यर्थः। महद्वाचीति। अयं भावः। छं तोत्र महच्छब्दः। च्विप्रत्ययश्च यदा प्रकृतिर्विकाररूपतामापद्यमाना विवक्ष्यते तदोत्पद्यते परिणामविषयत्वात् च्विप्रत्ययस्य। यदा चैको ऽर्थः प्रकृतिविकारात्मकतया ऽपाश्रीयते तदा परिणामव्यवहारो भवति। यथोक्तम्। जहद्धर्मो नरं पूर्वमुपादत्ते यदापरं। तत्वादप्रच्युतो धर्मी परिणामः स उच्यत इति। यदा तु न त्वावस्थापूर्वावस्थावानाश्रीयते तदा च्वेरभावस्तत्तदा भवन्ति पटो भवतीति। उक्तं च हरिणा। पूर्वावस्थामविजहत्संस्पृशन्धर्ममुत्तरं। संमूर्छित इवार्थात्मा जायमानो ऽभिधीयत इति। तत्र विकारस्य कर्तृत्वात्भूतशब्देन सामानाधिकरण्यात् सिद्धः पुंवद्भावः।। ।।

=अमहदिति। ननु सकृत्यानः किंविदन्त्यात्। यथा तु अवस्थायां स्थितं द्रव्यादि दृश्यमवस्थायां।

निवृत्त्यमिति। पुंवद्भाववदात्वस्यापि प्रसंगात्। नदत्र क्वचित्सामानाधिकरण्यं क्वचिद्वैयधिकरण्यमा। श्रीस प्रयोगाः समर्थ्यन्ते महद्भूते स्वत्र विकारभागः कर्तृ
त्वेनाश्रीयते। गोमती भूते स्वत्र तु प्रकृतिभागो महद्भूतश्चन्द्रमा इत्यत्रापि प्रकृतिभागः संघीभवन्ति क्रोहलएण इत्यादौ तु प्रकृतेरेव कर्तृत्वं। छान्तस्य गतित्वात् ग
तीनां च क्रियाविशेषकत्वात् संघीभवनलक्षणायां विशिष्टायां क्रियायां क्रोहलएणानां कर्तृत्वात्। संघः संपद्यते इत्यादौ तु वाक्ये जन्ममात्रस्य संघः कर्त्ता यथा
व्याकरणस्य सूत्रं करोतीति मात्रस्य सूत्रं कर्म व्याकरणं सूत्रयतीत्यत्र विशिष्टस्य करोतेर्व्याकरणमेव मिहापि कृतिविकृतो भिन्नक्रियाविषयं कर्तृत्वं तेनेह तौ प्र
कृतिसंख्याश्रयं वचनमेवं महद्भूतश्चन्द्रः प्रकृतेरेव कर्तृत्वमवगमयितुं शक्तो महद्भूते सर्यं तु विकृतेरिति द्वौ भावः [redacted] तत्र तु

तीतिकरो

प्र

यद्येवमात्वमपि प्राप्नोति महद्भूतश्चन्द्रमा इति निवृत्त्यमात्वं तु मन्यन्ते। आत्वमपि प्राप्नोति नैष दोषः। कथं यस्तु महतः प्रतिपदं समास उक्तः तदा
श्रयं ह्यात्वं कर्त्तव्यमन्यन्तेन न लक्षणेन न लक्षणोक्तस्यायं। एवं तर्हि लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति प्रतिपदं यः समासो विहितः तस्य
ग्रहणं लक्षणोक्तस्यायं। इहापि तर्हि न प्राप्नोति महानवाहुरस्य महाबाहुरिति॥ ॥श्री॥ ॥७॥

विकृतेः कर्तृत्वे प्रकृतिरनुमानिकी। महती संपन्ना केतिसामर्थ्यादेवा महतीति गम्यते प्रकृतेस्तु कर्तृत्वे सामर्थ्यो द्विकारवस्थामतीयते महान् संपन्नः केन धर्मे
ति महत्त्वेनेति गम्यते। अल्पं संपद्यते लड्डवती सत्र तु वर्णो वा केवल प्रकृतेरेव कर्तृत्वमिति तदाश्रयः पुरुषो भवति। मध्यमे तु क्रियमाणे तु स्वादर्थस्य प्रकृतित्वेम
तीयेत त्वमन्यो भवति सर्वत्र चात्र शाब्दशक्तिः प्रयोगानुसारिणी प्रमाणमेव तु न्यायो महद्भूत इत्यत्र परिहारान्तरसंभवात् महद्भूते सत्र च पुंवद्भाववदात्वप्रसंगा
त् भाष्यकृता नोक्तं दर्शयति। यस्तु महत इति। सन्महदिति प्रतिपदोक्तसमासस्येह ग्रहणं महद्भूत इत्यत्र तु कुगतिप्रादय इति लाक्षणिकः समास इत्यात्वा
९ भावः॥ ॥ श्री ॥

नार्थः पुनर्विधा मुखमिव

शेषवचनादिति। शेषग्रहणमन्यपदार्थग्रहणं वा कर्तव्यम् अन्यतरेणोपस्थितलाभात् उभयोपादानं तु पुनर्विधानाच्च प्रतिपदोक्तः बहुव्रीहिर्भवतीत्यर्थः
संपद्यते। प्रधानतो वेति। यस्मात् प्रधानस्य वृत्तिरस्तीति तस्माद् गौणस्यात्वं न भवतीत्यर्थः। गुणशब्दात् गौणः। मुख्यः प्रधानमित्यर्थः। शालादिभ्यो
य इति यप्रत्ययः। लोके हि शब्दैरुच्चारितैर्गौणमुख्यार्थसंभवे मुख्य एवार्थे कार्याणि क्रियन्ते व्याकरणेऽपि स्वं रूपमित्यत्र रूपग्रहणेन ज्ञा
पितं रूपवदर्थयोः प्रयोगो क्रियत इति तत्रापि मुख्यस्यैवार्थस्य कार्ये प्रयोगीकरणं कथं पुनरत्र गौणता महदर्थस्य उच्यते। यस्मात् उपचरितं महत्त्वं समुख्योऽ

= ननु शेषग्रहणं प्रथमं तावत् समासः अन्यपदार्थे ... अधिकारः तस्मात् ... अन्यपदार्थग्रहणं च न ... बहुव्रीहेरभिधानेन तस्मात् =

पोषवचनात् त्वयोः सोमप्रस्थं मात्कृतो बहुव्रीहिः। तस्मात् सिध्यति तस्मिन्। यस्माच्छेषो बहुव्रीहिरिति सिद्धेः नेकमन्यपदार्थे इत्याह ते
न प्रतिपदोक्तं तत्र भवति [redacted] प्रधानतो वा यतो वेत्रिः। अथवा गौणमुख्ययोर्मुख्ये संप्रत्ययः यथा गोरनुबन्ध्यो ऽजोऽग्नीषोमी
य इति न वाहीको ऽनुबध्यते। कथं तर्हि वाहीके वृद्ध्यात्वे भवतः। गौस्तिष्ठति गामानयेति। अर्थाश्रय एतदेवं भवति। यद्धि शब्दाश्र
यं शब्दमात्रे तद्भवति॥ ॥ ॥

= कथं तर्हि ... पुंवद्भावे ... गौणमुख्यन्यायाभावात् ... तस्मात् ... मुख्यमेवेति ... =

र्थः। च्युतेन पूर्वावस्था उपचरितो न रावस्थोः व्योत्मा पिधीयत इति महत्त्वमहत्सु पचरितमिति गौणार्थाभिधायी महच्छब्दो यथा गौर्वाहीक इति वाहीके गो
शब्दः। पुंवद्भावे तु शब्दविशेषस्यानाश्रयणात् गौणमुख्यन्यायानवतारान्महद्भूतेति पुंवद्भावः सिद्धः। कथं तर्हि स्योदि सत्र शब्दविशेषानाश्रये यिगो भवदि
सत्र गौणमुख्यमेव तदाश्रयः पुंवद्भावो गौणमती भूते सत्र तु महत्ते कर्तव्याश्रयणात् ह्यधिकरणात् पुंवद्भावाभावः। गौणं भवदि सत्र त्वोदं तत्सन्निपातस्य गौ
×न्यायाश्रयेण प्रगृह्यसंज्ञापरिहृता। एवं तर्हि महद्भूते सत्र स्त्रीत्वमर्थस्य मुख्यस्य× ॥ णार्थत्वात्तत्र न ह्यसंज्ञाभावः॥ ॥

भा०कै०६
१२४

शाद्वाश्रयेच वद्धात्वे इति। प्रातिपदिकस्य सर्वनाम स्थाने ऽम् शसो श्च वृद्धात्व विधानात् प्रातिपदिकस्यैवान्वय व्यतिरेकाभ्यां कल्पिताभ्यामर्थवत्त्वात् कल्पनात्
स्यामवस्थायां नास्ति गौणार्थत्वं पदान्तर संबंधे हि परस्य गौणार्थोत्ताभिव्यक्तिः। अथवा शाद्वे न कदाचित् स्वार्थ परित्यागेनार्थान्तरमभिधात्त्वमिति स्वत्व प्रसंग
त् शाद्वार्थ संबंधस्य गौणत्वं तु कश्चिदारोपितं गोशद्वस्य प्रयोजकं गौर्वाहीक इति कश्चित्तु मुख्यं यथा रज्जु सर्प्यत्वेनाध्यवसायस्य पशद्वः प्रयुज्यमानो न स्वार्थं
जहाति सर्पस्तु विपर्ययस्तः। तत्र परस्य पदान्तर संबंधेऽर्थ विपर्यासासंभवात् पदकार्येष्वेव गौणमुख्य न्यायो न प्रातिपदिक कार्येष्विति विपर्ययस्त्वेव वचा

=अमुंपसंहृत्यव्यक्तगौणत्वंमकार्यंतरेणाह-अप्यवेति-१=

शाद्वाश्रयेच वद्धात्वे। महदात्वे घासकरविशिष्टे षूपसंख्यानं पुंवद्वचनं चासामानाधिकरणार्थं महदात्वे घासकरविशिष्टेषूपसंख्या
नं कर्त्तव्यं पुंवद्भावश्चासमानाधिकरणार्थोऽद्दष्टव्यः। महतो वा सो महाघासः॥ महतः करो महाकरः॥ महतो विशिष्टो महाविशिष्टः॥
अष्टनः कपाले हविषि उपसंख्यानं कर्त्तव्यं। अष्टाकपालः। हविषीति किमर्थं॥ [redacted] ॥ श्री॥ ॥

र्थे वद्धात्वे अनुभूय गोशद्वो वाहीके समारोपितगोत्वे प्रवर्त्तते। अग्निसोमौ माणवकावित्यत्रान्येषुस्तोमसोमा इति षत्वं न भवति। गौणत्वात् ग्निसोमश
द्वार्थयोः प्रसिद्ध्यप्रसिद्धि कृतत्वान्मुख्य गौणव्यवस्थायाः। महदात्व इति केचित् द्वन्वाचयेच शद्वं मन्यमाना महतो घासो महाघास इत्यत्राप्यात्वं वर्णयं
ति। यथा तु भाष्यं तथा समुच्चये च शद्व इति पुंवद्भाव सन्नियोगेनात्वं विधीमान मन्यत्र न भवतीति लक्ष्यते। अष्टाकपाल इति। अष्टसु कपालेषु संस्कृ
तत्र इति तद्धितार्थे समासः संस्कृतं भक्षा इत्यणं तस्य द्विगोर्लुगिति लुक्॥ ॥ श्री॥ ॥ राम०
१२४

अष्टकपालमिति। समाहारे द्विगुः पात्रादिभ्यः प्रतिषेध इति स्त्रीत्वाभावः। अष्टागवेनेति। अष्टौ गावो युक्ता अस्मिन्निति त्रिपदे बहुव्रीहौ द्वयोर्द्विगुर्गोरद्धितलु
कीति टच् समासान्तस्तत्र दीर्घत्वेन युक्तार्थे संप्रत्ययात् गतार्थत्वाद्युक्तशब्दस्य निवृत्तिर्यथा समाहारे द्विगुस्तत्र साहचर्यादभेदोपचारादष्टगवेन युक्तं शकटम

अष्टकपालं ब्राह्मणस्य। गवि च युक्ते। गवि च युक्त उपसंख्यानं कर्त्तव्यं। अष्टागवेन शकटेन। युक्त इति किमर्थं। अष्टगवं ब्राह्मणस्य। अन्यप्रकृतिरम
हान्भूतप्रकृतौ महान्महत्सेवा। तस्मादात्वं न स्यात्पुंवत्तु कथं भवेदत्र। अमहति महान्हेमन्तस्तद्वाचीचात्र भूतशब्दोयं तस्मात्सिध्यति पुंवद्भावेन कर्मधा
रये तु मन्यन्ते। यस्तु महतः प्रतिपदं समास उक्तस्तदाश्रयं स्यात्त्वं कर्त्तव्यं मन्यन्ते न लक्षणेन लक्षणोक्तस्यायं। शेषवचनात्तु योऽसौ प्रत्यारंभात्
तो बहुव्रीहिः तस्मान्न सिध्यति। तस्मिन्प्रधानतो वा यतो वृत्तिः। द्व्यष्टनः। प्राक्शतादिति वक्तव्यं। इह माभूत् द्विशतं॥ द्विसहस्रं अष्टसहस्रं। वि अष्टशतं४
भाषा। सर्वेषां ग्रहणं किमर्थं। चत्वारिंशत्प्रभृतौ सर्वेषां ग्रहणं सर्वेषां विभाषा यथा स्यात्। द्व्यष्टनः त्रेस्त्रैन तदस्ति प्रयोजनं प्रकृतं द्व्यष्टनोर्ग्रह
णमनुवर्त्तिष्यते। यदितरनुवर्त्तते त्रेस्त्रयस् द्व्यष्टनोरपि त्रयसादेशः प्राप्नोति। नैष दोषः। मण्डूकगतयोऽधिकाराः। तद्यथा मण्डूका उ
त्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः। अथवा एकयोगः करिष्यते। द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः त्रेस्त्रयः। ततो विभाषा चत्वारिंशत्प्र
भृतौ सर्वेषामिति॥ ॥

विधेयभेदेन वाक्यभेदस्य युक्तत्वात् एके तु प्रतिपत्तिलाघवमेकं प्रक्रियालाघवं त्वभिमतमिति भावः। २

शागवमुच्यते। विभाषा। मण्डूकगतय इति। द्व्यष्टशब्दार्थे त्रयसादेशेन शक्नोति वक्तुमिति त्रयसादेशेन संबन्धाभावादिहैव द्व्यष्टनोरभिसंबन्धः। अथवेति।
एका भवति क्रिया आत्वत्रयसादेशकर्त्तृकोपादीयते। ततो यस्मिन्काले द्व्यष्टनोरात्वं तस्मिन्नेव त्रिशब्दस्य त्रयसादेश इत्यर्थः॥ ॥ ॥

भा० कै० ६
१२५

अयवर्णमयमिति। समुदायोऽपेक्ष्यते स तु एक एवेत्यनंतरस्य विधिर्वा भवति प्रतिषेधो वेत्यपि नास्ति। ह्रस्वयणोऽपि ग्रहणमिति स्वरूपस्य ग्रहणं नन्तु तदंतस्येत्यर्थः। लेखग्रहणादिति। एतद्वचनान्यथानुपपत्त्या च लेखशब्दोऽदंतो गृह्यते न तु घञंत इति घत्रि ह्रस्वयलेख इत्येव भवति। सर्वत्रैवेति। प्रकरणापेक्षं संज्ञापकमाश्रीयते न त्वेतद्योगापेक्षमेवेत्यर्थः। कुमारीगौरितरेति। उदाहरणदिग्ग्रियं समासस्तु द्वाहार्थः कुमार्यगौरितरेति। अत्र हि घांत उत्तरपदे पुंवद्भावं बाधित्वा ह्रस्वः स्यात्

ह्रस्वस्य ह्रस्वे॥

नैव योगेः नु वृत्तिर्भवति। अर्थवाउभयं निवृत्तं तदपेक्षिष्यामहे॥ यद्गणग्रहणमिदं प्रत्ययग्रहणं तत्प्रत्ययग्रहणे यस्मात्स विहितः तदादेर्ग्रहणं भवतीति यदंतं ते प्राप्नोति। पदग्रहणे रूपग्रहणं लेखग्रहणात्। यदगणग्रहणे रूपग्रहणं द्रष्टव्यं। कुतः लेखग्रहणात्। यद्यं लेखग्रहणं करोति तत्ज्ञापयत्याचार्यो न यदंतं ते भवतीति। अपर आह। अत्यल्पमिदं ज्ञाप्यते। सर्वत्रैवोत्तरपदाधिकारे प्रत्ययग्रहणे रूपग्रहणं द्रष्टव्यं। कुतः। लेखग्रहणादेव। किं प्रयोजनं कुमारीगौरितरा द्यारिषुनघा ह्रस्वो भवतीति ति ह्रस्वत्वं प्रसज्येत। यद्यपि तावदेतत्ज्ञाप्यते खित्यनव्ययस्येति खित्येवानंतरस्यानव्ययस्य ह्रस्वत्वं प्राप्नोति खिदनंतरे ह्रस्वभावीनास्तीति कृत्वा खिदंते उत्तरपदे भविष्यति। ननु चाय

= ननु संज्ञाश्रये विधौ न दंतग्रहणं नावश्यमुक्तिरिंग तन्निसंतव्य ह्रस्वेन तत्प्रसिलालभ्यंन तत्र संगोत आह संज्ञाविधाविति। विधेयं तेदर्थः॥ = ॥ मस्तिस्तनंधय इति॥ ॥ ॥

संज्ञाविधौ च प्रत्ययग्रहणे तदंतविधेः प्रतिषेधः उत्तरपदाधिकारे तूत्तरपदस्य घे न विशेषणात्स्यादेवं दंतविधिः संज्ञाविधौ तदंतविधिनिषेधस्तु फलं ह्रस्वशीसंज्ञस्य त्वथा तु कारस्य नत्वनिवारणं विशेष्यानिर्देशान्नत्वेनिषेधयात तदंत विध्यभावात् ऋकवतु त कारस्यैव नत्वं प्रवर्तते। ननु चायमिति। खशेवक र्तुरभिधाना राम०
॥ उपोः प्रवृत्तिर्मन्यते॥ ॥ १२५

यस्य पुनरिति ननु च भूमावस्यासिद्धत्वाद् दुःशब्दस्य वायमिति स्यादेव गुणः नैष दोषः गुणो हि न्येयं भूमाव इत्यस्यासिद्धत्वात् पूर्वं गुणो कृते भूमावः न च गुणभूमावयोश्च कार्य न्निश्चक्रके इष्टतो व्यवस्था प्रयणात् भूमेति भत्वा भावाद् गुणाभावः निपातनादिति ह्रस्वान्ते प्यादेशे क्रियमाणे भूमेत्य च निपातनादीर्घो भविष्यतीत्यर्थः आभादिति चेदि ति भाग्भादित्यस्य पक्षस्य प्रतिपक्षभावे नोपादानात् पिवि धावाकारो वो द्रष्टव्यः पपुषइत्यादीनां परिहृतानां पिपुनरुपादान मस्मिन् पक्षे दोषः प्राग्गुण्ड इति इतिप्रदर्शना

यस्य पुनः सहते नासिद्धत्वं उपसिद्धत्वान्न स्यन भविष्यति यस्यापि प्राग्भा दसिद्धत्वं तस्याप्येष न दोषः कथं दीर्घोच्चारण सामर्थ्यान्न भविष्यति उपस्यस्य दीर्घोच्चारणस्य प्रयोजनं किं भूमेति निपातनादेतत्सिद्धं किं निपातनेन बहोर्नञ्च वदुत्तरपदभूम्नि इति अथवा पुनरस्तु सहतेनेति आ भादिति चेत् वसुसंप्रसारणयलोपप्रस्थादीनां प्रतिषेधः आभादिति चेत् वसुसंप्रसारणयलोपप्रस्थादीनां प्रतिषेधो वक्तव्यः पपुषः पपुषस्तस्थु षः निन्युषः चिच्युषः लुलुवुषः पुपुवुष इति वसुसंप्रसारणे कृते तस्यासिद्धत्वात् उपचीत्याकारलोपादीनि न सिध्यन्ति नैष दोषः उक्तमेतत् समा नाश्रयवचनात् सिद्धमिति कथं वसावाकारलोपादीनि वस्वंतस्य विभक्तौ संप्रसारणमिति यलोपः सौरीबलाका योसावरप [redacted] कारे लुप्यते तस्यासिद्धत्वात् ईतियलोपो न प्राप्नोति उपत्राप्येष परि हारः समानाश्रयवचनात् सिद्धमिति कथं अणि अकारलोपः अणन्तस्य ईतियलोपः प्रस्थादिषु प्रेयान् स्थेयान् प्रस्थादीनामसिद्धत्वात् प्रकृत्यैका

र्थ सौरीति सूर्येण एकदिक् इत्यण् यस्येति लोपस्ततो ङीप् पुनर्यस्येति लोपः तत्र द्वयोरल्लोपयोरसिद्धत्वाद्यकार उपधा न भवतीति यलोपाप्रसंगः ननु च प्राग्भादसि द्धत्वे लोपद्वयस्यासिद्धत्वात् उपधा यकारो न भवतीति लोपस्याप्रसंग एव स्थानिवद्भावोपि यलोपविधौ प्रतिषिद्धः भूतपूर्वगत्या उपधाश्रयणाद्दोषः वचनसामर्थ्याद्वा पूर्वं वा यलोपः

पश्चादकारलोपः इति क्रम आश्रयिष्यते निसत्वेप्यकारलोपस्य॥ ॥०॥

टिलोपोपीति नन्वादेशलक्षणः प्रकृतिभावोसिद्धत्वान्न भवतीति वक्तुं युक्तं टिलोपः पुनरुत्सर्गलक्षणः प्राप्नोति नैष दोषः आदेशेन निरवकाशत्वात्प्रकृतेनेन स्था
निनो निवर्त्तितत्वादसतः कुतः टिलोपः तत्र यथा पिप्रादीनामसिद्धत्वात्प्राक् टिलोपः क्रियते तेन यथाप्यादेशे प्रवृत्ते सुते षाम सिद्धत्वान्न तल्लक्षणष्टिलोपो ना
प्युत्सर्गलक्षणः उत्सर्गेषु प्रागेव प्रवृत्तत्वात् अनवकाशत्वाच्च भादीनां च कृतदोषो पिन्नास्ति आन्नलोपः किमर्थमिति यथान्तरेण मकारनिर्देशं आदितिश्म
मेव गृह्यतेऽन्यस्यासंभवात् तथा विनापि शिन्निर्देशेन श्ममेव ग्रहीष्यत इति भावः नंदितेति इदित्वमस्य किमर्थं स्यादिति चेत् उपदेशावस्थायां नुमिसति

× [illegible] यथैव प्रस्थादीनामसिद्धत्वात्प्रकृतिभावो न भवति ×

एवं टिलोपोपि न भविष्यति आन्नलोपः अथ किमर्थं श्नमः सशकारस्य ग्रहणं क्रियते न नान्नलोप इत्येवोच्येत नान्नलोप इत्युच्य
माने नंदिता नंदक इत्यत्रापि प्रसज्येत एवं तर्हि वक्ष्यामि नान्नलोपोऽनिदितां ततं हल उपधायाः क्ङितीति अनिदितामिति नैवं शक्यं इ
ह हि न स्यात् हिनस्ति तस्मान्नैवं शक्यं न चेदेवं नंदिता नंदक इत्यत्रापि प्रसज्येत एवं तर्हि क्ङितीति वर्त्तते एवमपि हिनस्तीत्यत्र न प्राप्नो
ति नैषा परसप्तमी का तर्हि सत्सप्तमी क्ङिति सतीति एवमपि नंदमान इत्यत्रापि प्राप्नोति॥ ॥ श्री ॥

=तस्मिन्ननुवर्त्तमाने गुणेप्यप्रहलात्स्वेनेन ·१=

देवा १

अप्रत्ययादिस्सकारार्थं तथा नन्दतु रिसादौ कृतेपि न लोपे तस्यासिद्धत्वाम्यास लोपाप्रवृत्त्यर्थं स्यात् क्ङिति सतीति श्नमेव हि .दस्ति इति हिनस्तीत्यादौ न लो
पः सिद्धः कथं पुनः संभवंसा परसप्तम्या सत्सप्तमी शक्या विज्ञातुं यथेष्टं वाक्यशेषाध्याहारः इह दोषः क्ङिति सतीत्येव हि विज्ञायमाने पौर्वापर्यानाश्रयणान्नास्ति त
स्मिन्निति इत्यस्याः परिभाषाया उपस्थानं यदा त्वौपश्लेषिकेऽधिकरणे सप्तमी तदा क्ङिद्द्वस्यकार्ये अथ परस्येति अनियमप्रसंगे नियमाय परिभाषोपस्थानं
नंदमान इति ताच्छील्यादिषु चानश् कृते शपि च चानश्प्रोष्य वृहितस्यापि ङि. तोभावान्नलोपप्रसंगः क्वचिन्नंद्यमान इति पाठस्तत्र यगाश्रयो न लोपप्रसं
गः अर्थवद्ग्रहणपरिभाषात्तु विकरणानामानर्थक्यान्नोपन्यस्ता॥ ॥

=नंदतेः परस्मैपदिता चानशोऽभावः ·१=

=अन्यथा दिनष्टीत्यत्रापि विकरणं ङि. तमाश्रित्य नलोपप्रसंगो युक्तः स्यात् ·१=

नशब्द एवेति । अर्थवशाद्विभक्तिविपरिणामो भवतीति सप्तमीपरित्यागेन पंचम्याश्रयणात् प्रत्ययाप्रत्यययोः प्रत्यये संप्रत्यय इत्यत्र परिहारः संभवति यज्ञानामिति पूर्वत्रासि-
द्धमिति श्रुत्वस्यासिद्धत्वान्नशब्द उत्तरो नकारः परत्वान्न लोप इति । अग्नीनामित्यादौ नामीति दीर्घत्वं सावकाशं नलोपो हि नत्तीत्यादौ सावकाशो यज्ञानामित्यादावुभयप्रसं-
गे परत्वान्नलोपप्रसंगः प्रत्ययश्च चेति दीर्घत्वं तत्संनिपातलक्षणपरिभाषावशान्न भवति लक्षणप्रतिपदोक्तयोरिति लाक्षणिकस्यानुमेयरूपत्वादितरस्य तु प्रत्यक्ष-

=नामीत्यनेन नलोपं असामर्थ्यात् दिनाबाध्यते । कर्तृणामित्यर्थं तु कृते नामीत्ययमदोषः एवं च न किंचिदिति न कर्त्तव्यं भवतीति न्यायविदितिभावः ।=

एवं तर्हि नशब्द एवात्र क्रियते न विशेष्यते किं चेन्नशब्दो भवति एवमपि यज्ञानां यत्नानामित्यत्र प्राप्नोति दीर्घत्वमत्र बाधकं भविष्यति इदमत्र संप्र-
धार्यं दीर्घत्वं क्रियतां नलोप इति किमत्र कर्त्तव्यं परत्वान्नलोपः तस्मात्सशकारस्य ग्रहणं कर्त्तव्यं अथ क्रियमाणेऽपि सकारग्रहण इह कस्मान्न भवति
विश्वानां प्रश्नानामिति लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति । अनिदितां हल उपधा । अनिदितां नलोपे लंगिकंप्योरुपतापशरीरवि-
कारयोरुपसंख्यानं । अनिदितां नलोपे लंगिकंप्योरुपतापशरीरविकारयोरुपसंख्यानं कर्त्तव्यं विलगितः विकपितः उपतापशरीरविकारयोरिति किम-
र्थं विलंगितः विकंपितः वृंहेरच्यनिटि । बृंहेरच्यनिटि उपसंख्यानं कर्त्तव्यं निबर्हयति निबर्हकः अचीति किमर्थं निबृंह्यते अनिटीति किमर्थं नि-
=व्यतिरेकरक्षणं ततः।१२= (१ बृंहिता निबृंहितुं वा नर्हि उपसंख्यानं कर्त्तव्यं न कर्त्तव्यं ॥ ॥ ॥

त्वात् यद्वा तु विकरणानामपि स्वार्थे नार्थवत्ताश्रीयते तथाप्येवं ग्रहणपरिभाषया विश्वानां प्रश्नानामिति नलोपाभावसिद्धिः । अनिदितां हल इति । विलगित इति गत्यर्थत्वात्क-
र्त्तरि क्तः कृच्छ्रप्राप्तिरत्रोपतापो गम्यते न तु रोगो यथा दुःखोपतापगम्यादिति । अन्यथा शरीरविकारग्रहणं केवलं कुर्यात् विकपित इति गत्यर्थाकर्मकेति गत्यर्थत्वात्कर्त्तरि
क्तः शरीरविकारो त्र व्याधिरुच्यते न तु स्थौल्यादि कंपेरतद्विषयत्वात् वृंहेरिति वृंहि वृद्धावित्यस्य ॥ ॥श्री॥ ॥

भा०कौ० ६ वृहिंप्रक्लसंतरमिति वृह वृहि वृद्धाविति पाठात् अजादावपि न दृश्यत इति ततश्चादोषायैवोपसंख्यानं स्यान्न धातुलोप इति गुणनिषेधनिवारणाय यत्नश्चकर्त्त-
१५४ व्यः स्यादित्यनारंभणीयमेवोपसंख्यानं रजयतीति नलोपे वृद्धौ च जनी जृष् क्नसु रञ्जो मन्ताश्चेति मित्त्वाद्ध्रस्वः प्रत्ययान्तस्येति शवन्तस्येत्यर्थः यङ्लुङ्निवृत्त्यर्थे
श्चुत्वत्र शप्निर्देशः घिनुण्णतुताच्छील्ये विधीयते रूढिशब्दप्रकाराश्चताच्छीलिका इति यङ्लुगन्ताद्रजेर्न भवति औणादिका इति रजक इत्यत्र क्वुन् शिल्पि

=ननु घिनुणि विधावपि रञ्जेश्च तेन नलोपेन रजेर्निपातनानिर्देशो यङ्लुङ्निवृत्त्यर्थ एवेत्याह घिनुणीति ॥२=

वृहिः प्रक्लसंतरं कथं ज्ञायते अचीति लोप उच्यते न जादावपि दृश्यते निवृह्यते अनिटीत्युच्यते इडादावपि दृश्यते निवर्हिता निवर्हितुं अ-
जादावपि न दृश्यते निबृंहयति निबृंहकः रंजेणौ मृगरमणे रंजेणौ मृगरमणे उपसंख्यानं कर्त्तव्यं रजयति मृगान् मृगरमणे इति किमर्थं रं-
जयति वस्त्राणि घिनुणि च घिनुणि चोपसंख्यानं कर्त्तव्यं रागी घिनुणि निपातनात्सिद्धं किं निपातनं त्यज रञ्जेति अशाकं धातुनिर्देशो नि-
न पातनं आश्रयितुं इह हि दोषः स्यात् दशनहं करणे दंष्ट्रा नैतद्वा तु निपातनं किं तर्हि प्रत्ययान्तस्यैतद्रूपं तस्मिंश्च प्रत्यये लोपो भवति दंशसंज-
स्वंजां शपीति रजकरजनरजः सूपसंख्यानं रजकरजनरजः सूपसंख्यानं कर्त्तव्यं रजकः रजनं रजः इति रजकरजनरजः सु किलास्तिद्धं कितएवै-
ते औणादिकाः तद्यथा रुचकः भुवनं शिर इति शास इदङ् हलोः शास इत्वे आशासः क्वौ उपसंख्यानं शास इत्वे आशासः क्वौ उपसंख्यानं कर्त्तव्यं
आशीरिति किं पुनरिदं नियमार्थं आहोस्विद्विध्यर्थं कथं नियमार्थं स्यात् कथं वा विध्यर्थं यदि तावच्छासिमात्रस्य ग्रहणं ततो नियमार्थम् ॥ ॥

संज्ञयोरिति क्वुन् प्रत्ययः रजकीति पुंयोगादाख्यायामिति ङीष् अपुंयोगे तु ङीषानभावमिति भाष्यकाराभिप्रायः रजनमित्यत्र रंजेः क्युन् प्रत्ययः स च वाहुलकादित्य-
द्रष्टव्यः तेन रजनीति ङीप् भवति रजइत्यत्र भूरंजिभ्यां कित् इत्यसुन् प्रत्ययः कित् भवति शास इदङ्हलोः शासिमात्रस्येति शासु अनुशिष्टावित्यस्य आङः शा- रा०म०
सु इच्छायामित्यस्य चेत्यर्थः नियमार्थमिति क्वौ एवाशास इत्वं यथा स्यादाशास्त इत्यादौ मा भूत् इत्यर्थः ॥ ॥ ॥ १५४

=ननु शिल्पिनि ष्वुन्नावेरजकीति ङीष् स्यादत आह रजकीति ॥२=

यस्माच्छासेरिति शास्तुरनुशिष्टाविन्यस्माद्रविहितः सन्निशास्त्युर्जिम्पश्चेत्यत्र परस्मैपदाधिकाराज्ञ्याऽः संसर्गोद्विशिष्टस्य शासो ग्रहणं संसर्गस्य विशिष्टस्येति
हेतुत्वात् यथा सक्तिशोराधेनुरानीयतां सवत्सा सकरभेति विशिष्टा धेनुः प्रतीयते यद्येवं शासिमात्रग्रहणं कथमाशंकितं अथ हलोप्युपादानान्नसस्य च शासिमा
त्रेणासंबंधसंभवात् इत्युच्यते तन्न साधारणासाधारणसन्निपातेप्यसाधारणसंबंधिग्रहणं दृश्यते यथा दृढानां किशोरीणां च मध्ये धेनवो ध्यंतामित्युक्ते वडवा एव ब
ध्यंते न तु गवादयः एवं तर्हि एकशेषाद्याश्रयणाच्छासिमात्रग्रहणपक्षसंभवः यद्यपीति आचार्यदेशीयस्येदं वचनं विधेयैश्चाशास्त इत्यादाविलमनिवारितं
बे२

अथ हि यस्माच्छासेरड्विहितः तस्य ग्रहणं न तो विध्यर्थम् यद्यपि शासिमात्रस्य ग्रहणं एवमपि विध्यर्थमेव कथं अङ् हलोरित्युच्यते न चात्र ह
लादिं पश्यामः ननु च क्विप् हलादिः क्विपो लोपे कृते हलाद्यभावान्न प्राप्नोति इदमिह संप्रधार्यं क्विब्लोपः क्रियतां अङ् हलोरित्वमिति किमत्र कर्तव्यं
परत्वादङ् हलोरित्वं नित्यः क्विलोपः कृतेप्यङ् हलोरित्वं प्राप्नोति अकृतेपि नित्यत्वात् क्विलोपे कृते हलाद्यभावान्न प्राप्नोति एवं तर्हि प्रत्ययल
क्षणेन भविष्यति वर्णाश्रयेनास्ति प्रत्ययलक्षणं यदि वा कानि चिद्वर्णाश्रयाण्यपि प्रत्ययलक्षणेन भवंति तथा चेदमपि भविष्यति॥ ॥

स्यात् आर्यशीरित्यत्र च न प्राप्नोति यदि वेति यथैवेत्यर्थः तथा चेति तथैवेत्यर्थः यत्र कार्ये वर्णरूपमेव निमित्तत्वेनोपादीयते तत्र प्रत्ययलक्षणेन न भवति य
थाराय कुलं रैकुलमित्यादि शः यत्र तु वर्णविशिष्टप्रत्ययनिमित्तं तद्भवत्येव यथा तृणेढि इति हलादैपिति सार्वधातुके विधानात्प्रत्ययनिमित्तत्वादीमागमः इ
त्वमपि हलादौ प्रत्यये क्विति विधीयमानं प्रत्ययनिमित्तत्वात्प्रत्ययलोपे भवति॥ ॥ श्री॥ ॥ ॥

भा० कै० ६
१५५

अथवेति वुणोऽप्यत्वात्प्रत्ययलक्षणेनाप्राप्तमित्वं क्वावित्यनेन विधीयते अविशेषेणेति प्रत्ययमात्रे क्ङितीत्यर्थः अङ्गेवाजाद्यवित्ति तेन शासति शशासुरि
त्याद्यविलाभावः हलादौ क्ङिति क्वौ च नियमाभावादित्वं भवत्येव तुल्यजातीयापेक्षत्वान्नियमस्याजादिरेव व्यावर्त्यते इहापीति शासिमात्रग्रहणं मत्वा चो
दयति यस्माच्छासेरिति वाक्यान्तरे श्रुतः संसर्गो विशेषावगतिहेतुर्भवति यथा धेनवो मुच्यन्तां किशोरीवत्सानामिति वद्वा एवं प्रतीयते निपातनादिति य

अथवैवं वक्ष्यामि शास इदङ्हलोः ततः क्वौ च शास इद्भवति आर्यशीः मित्रशीः ततः आङः आङ्पूर्वाच्च क्वौ शास इद्भवति आशीरिति इदमिदा
नीं किमर्थं नियमार्थम् आङ्पूर्वाच्छासः क्वावेव कमाभूत् आशास्ते आशास्यते आशासमान इति तत्राहि वक्तव्यं न वक्तव्यं अविशेषे
ण शास इद्भवति इत्युक्ता ततः अङीति वक्ष्यामि तन्नियमार्थं भविष्यति अङ्गेव अजादौ नान्यस्मिन्नजादौ इहापि तर्हि नियमादित्वं प्रा
प्नोति आशास्यते आशासमान इति यस्माच्छासेरङ्विहितस्तस्य ग्रहणं न चैतस्माच्छासेरङ्विहितः कथं आशीरिति निपातनात्सिद्धं किं
निपातनं क्षियाशीःप्रैषेषु तिङाकांक्षमिति अनुदात्तो अनुदात्तोपदेशे अनुनासिकलोपोऽल्यपि च अनुदात्तोपदेशे अनुनासिकलो
पोऽल्यपि चेति वक्तव्यं प्रमस्य प्रतत्य ततो वामः वाम इति वक्तव्यं प्रयत्य प्रयम्य प्ररत्य प्ररम्य प्रणत्य प्रणम्य गमः क्वौ गमादीनामिति वक्त

=तेनन्नमते नियमस्य तद्विभाषामभ्युपगम्येष्टसिद्धिः सम्पादिता॰२= १ व्यं इहापि यथा स्यात् परीतत्सहकुण्डिकायाः ॥ ॥ श्री ॥ ॥

यान्यासे तु पूर्वोक्तेन न्यायेन प्रत्ययलक्षणासद्भावादार्यशीरित्यत्रेत्वं भवति आशीरित्यत्र तु निपातनादेव अनुदात्तो वाल्यपीति सूत्रन्यासेः विशेषेण विकल्पः
प्राप्नोतीति वार्त्तिकारम्भः तेनामन्तानां गमियमिरमिनमीनां ल्यपि विकल्पोऽन्येषां त्वनुदात्तोपदेशवनतितनोत्यादीनां नित्यं लोपः गमः क्वौ परीतदिति तनोतेः ग्रम०
क्विपि नलोपे कृते तुकि नहिवृतिवृषीति पूर्वपदस्य दीर्घः ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ १५५

=सत्वे आङ्पूर्वस्य ग्रहणमर्थग्रहणाभावात्॰२=

संयदिति यमेः क्विप् तुङ् चेत्यननुनासिकलोपो ऽकारस्तोऽङ् च विनापि दित्वेनान्यस्य सिध्यन्नकार इति नार्थो दित्वग्रहणेन । अग्रेगूरिति । ओः सुपीति यणादेशो धा
तुत्वाङ्वस्य अग्रेग्वाविति । भ्रूरिति । अचिश्नुधातुभ्रुवां इत्यत्र भ्रूग्रहणं न कर्तव्यं धातुत्वादुवङः सिद्धत्वात् । जन । अथ किमयमिति यदि द्वन्द्वनिर्देशः ततः समुच्च
यः । अथ सौत्रो निर्देशस्ततो विशेषणविशेष्यभाव इति पक्षद्वयसंभवः । सिसनिषतीति सनीवन्तर्धेति पक्षे इडागमः । ततः सन्निचेति अकित्त्वमेनत् । जंतु

[illegible]

संयत् सुनदिति तुङ् च तुङ्ङ् गमादीनामिति वक्तव्यं लोपश्च । अग्रेगूः । अग्रेभ्रूः । जनसनखनां सञ्झलोः । अथ किमयं समुच्चयः सनि
च झलादौ चेति आहोस्वित् सन्विशेषणं झल्ग्रहणं सनि झलादाविति । किं चातः । यदि समुच्चयः सन्यझलादावपि प्राप्नोति सिसनिषति जि
जनिषते चिखनिषति । अथ सन्विशेषणं झल्ग्रहणं जातः जातवान् इत्यत्र न प्राप्नोति । यथेच्छसि तथास्तु । अस्तु तावत् समुच्चयः न
नु चोक्तं सन्यझलादावपि प्राप्नोति । नैष दोषः प्रकृतं झल्ग्रहणमनुवर्तते । तेन सनं विशेषयिष्यामः सनि झलादाविति । अथ वा पुनरस्तु
सन्विशेषणं कथं जातो जातवानिति । प्रकृतं झलि क्ङितीत्यनुवर्तते । यद्येवं नार्थो झल्ग्रहणेन । योगविभागः करिष्यते । जनसनखनामनुना
सिकस्याकारो भवति झलि क्ङिति । ततः सनि । सनि च जनसनखनामनुनासिकस्याकारो भवति झलीत्येव । तस्मान्नार्थो झल्ग्रहणेन । सनोतेरनु
नासिकलोपादात्वं विप्रतिषेधेन । सनोतेरनुनासिकलोपादात्वं भवति विप्रतिषेधेन । सनोतेरनुनासिकलोपस्यावकाशः । अन्येतनोत्यादयः

रिसादौ आत्वस्य संगाद्यो हि सर्वत्र क्ङिद्ग्रहणानुवृत्तिः । सनोतेरनुनासिकलोपस्येति । सनोतेर्योऽनुनासिकलोपः प्राप्नोति तनोत्यादित्वात् तस्यात्वेन तनोत्यादयो
वकाश इत्यर्थः ॥ सनोतेस्तु तनोत्यादिषु पाठस्तनादित्वान्न मम उक्त तनादिभ्यस्तथासोरित्येवमर्थः ॥ ॥श्री॥ ॥७॥ ॥

अन्येजनादय इति समुदायस्य कार्ये विधीयमानमवयवानां प्रवर्त्तते तेन त्रकस्य चिदप्यवयवस्य कृतं समुदायस्य कृतं भवतीति भावः जनादय इति बहुवचन निर्दे
शः प्रयोगभेदापेक्षोऽपि तद्बहुत्वं जनखनोपेक्षः आत्वं भवतीति सातः सातवानित्यादौ सन्ग्रहणं तु सनोऽन्यत्र्यर्थमेव सिषासतीति जनखनोर्भ्यांतुसनः सेद्ध्वा

अन्येजनादयः सनोतेरनुनासिकस्योभयं प्राप्नोति [redacted] आत्वं भवति विप्रतिषेधेन नैषयुक्तो विप्रतिषेधः नहि सनोतेरनुना
सिकलोपस्यान्येतनोत्यादयोऽवकाशः सनोतेर्ये तनोत्यादिषु पाठः सोऽनवकाशः न खल्वप्यात्वस्यान्ये जनादयोऽवकाशः सनोतेर्यदात्वे ग्रहणं
तदनवकाशं तस्यानवकाशत्वादयुक्तो विप्रतिषेधः एवं तर्हि तनोत्यादिषु पाठस्यावसावकाशः कोऽवकाशः अन्यानि तनोत्यादिकार्याणि तना
दिभ्यस्तथासोऽरिति आत्वेऽपि ग्रहणं सावकाशं कोऽवकाशः सनि चये विभाषा च उभयोः सावकाशयोः युक्तो विप्रतिषेधः एवमप्ययुक्तो विप्र
तिषेधः पठिष्यति ह्याचार्यः पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति एकस्य हि नामाभावे विप्रतिषेधो न स्यात् किं पुनर्यत्रोभयं नास्ति
। नैष दोषः भवतीह विप्रतिषेधः किं वक्तव्यमेतत् नहि कथमनुच्यमानं गंस्यते आचार्यप्रवृत्तिर्ज्ञापयति भवतीह विप्रतिषेध इति यदयं घु
मास्थागापाजहातिसां हलीति हल्ग्रहणं करोति कथं कृत्वा ज्ञापकं हल्ग्रहणस्येतत् प्रयोजनं हलादावीत्वं यथा स्यात् इह माभूत् गोदः कंब
लद इति यदि चात्र विप्रतिषेधो न स्यात् हल्ग्रहणमनर्थकं स्यात् आल्लोप ईत्वं ईत्वस्यासिद्धत्वाल्लोपो भविष्यति पश्यति त्वाचार्यो भवतीह वि
प्रतिषेधः ततो हल्ग्रहणं करोति॥ ॥ श्री॥ ॥

तकृत्वादित्याभावः भवतीह विप्रतिषेध इति विप्रतिषेधेनव्यवस्थायां क्रियमाणायां असिद्धत्वं न भवतीत्यर्थः गोद इत्यादावसति हल्ग्रहणे परत्वादीत्वं स्या
दिति हल्ग्रहणं क्रियते असति हि विप्रतिषेधे द्वयोः परस्परस्मिन्नसिद्धत्वात्कृतेऽपीत्वे आल्लोपे न गोदादेः सिद्धत्वादनर्थकं हल्ग्रहणं स्यात्॥ ॥

नैतदस्तीति हल्ग्रहणस्य ज्ञापकत्वं विघटयति असत्यपि विप्रतिषेधे गोद इत्यादि न सिध्यति क्वते इत्वे इयङादेशप्रसंगादिति तन्निवारणार्थं हल्ग्रहणं न ज्ञाप
कमित्यर्थः ज्ञापकवाधमाह ननु चासिद्धत्वादिति ज्ञापकभंगवाधमाह न शक्यमिति धियाविति दधातेः पिबतेश्च क्विपि लुप्तेः पिप्रत्ययलक्षणेनेत्वं भवतीति तस्या
सिद्धत्वे आश्रीयमाणे इयङ् न प्राप्नोतीति यदि अवश्यमाश्रयितव्यमीत्वस्यासिद्धत्वमित्यर्थः ज्ञापकवाधमाह नैतदीत्वमिति अभ्युपगम्यापीत्वमाह समानाश्र
यमिति धियाविसादावीत्वं व्याश्रयं गोद इ सादौ तु समानाश्रयत्वादियङसिद्धमेवेति ज्ञापकमेव हल्ग्रहणं स्थितं पुनर्ज्ञापकभंगं वाधमाह नास्ति चक्रकप्रसं

×वाधाह॰ अवस्थार्थमिति॰ ज्ञापक×१

नैतदस्ति ज्ञापकं व्यवस्थार्थमेतत्स्यात् हलादावीत्वं यथा स्यात् अजादौ मा भूदिति किं च स्यात् यद्यजादावपि ईत्वं स्यात् इयङादेशः प्र
सज्येत ननु चासिद्धत्वादेव इयङादेशो न भविष्यति न शक्यमीत्वं इयङादेशे असिद्धं विज्ञातुं इह हि दोषः स्यात् धियौ धियः पियौ पियः इति
नैतदीत्वं किं तर्हि ध्याप्योः संप्रसारणमेतत् समानाश्रयं खल्वप्यसिद्धं भवति व्याश्रयं चैतत् कथं क्वावीत्वं क्विबंतस्य विभक्तौ इय
ङादेशः व्यवस्थार्थमेव तर्हि हल्ग्रहणं कर्तव्यं कुतो ह्येतत् ईत्वस्यासिद्धत्वाल्लोपः न पुनर्लोपस्यासिद्धत्वादीत्वमिति नन्वत्र चक्रकं प्र
व्यवस्था प्रसज्येत नास्ति चक्रकप्रसंगः न ह्यव्यवस्थाकारिणा शास्त्रेण भवितव्यं शास्त्रतो व्यवस्था नत्र ईत्वस्यासिद्धत्वाल्लोपः लोपेना नाव
१वस्था न भविष्यति न खल्वपि तस्मिंस्तदेवासिद्धं भवति॥ ॥

=पुनर्लोपस्यासिद्धत्वेप्यनेन शास्त्रेण स्वकृते कार्ये ... पुनरीत्वप्रवृत्तिः।२=

गइति द्वयोरपि शास्त्रयोः परस्परं सतां पुनः प्रवृत्तिकारणाभावादित्यर्थः लोपेनावस्थानमिति अथ विपरीतक्रमः कस्मान्न भवति पूर्वमाल्लोपस्यासिद्धत्वादी
त्वमिति उच्यते अस्मिन्नपि क्रमे ईत्वस्यासिद्धत्वात्तु न णल्लोपो भविष्यति [redacted] लक्ष्यसंस्कारार्थत्वाच्छास्त्रस्य प्रवृत्तेः न ख
ल्वपीति आल्लोपे कर्तव्ये ईत्वस्यासिद्धत्वं नेत्वे कर्तव्ये अस्मिन्निदमसिद्धमिति भेदनिबंधनत्वाद्विषयविषयिभावस्य ततश्चाल्लोपो भविष्यति ननु पुनः पुन

भा०कै०६ १५७

पुनर्ज्ञापकभंगवाद्याह व्यवस्थार्थमिति नहि शास्त्रचक्षुरन्तरेणा वचनमिदमिष्टमिदमनिष्टमितिन्म्यते तदेवेति व्यक्तिपदार्थपक्षेमतिलक्ष्यंलक्षणामेदाद्विषयवि
षयिविभागोपपन्नावीत्वशास्त्रमीत्वशास्त्रे एवासिद्धमिति पुनः पुनरीत्वप्रवर्त्तनादपिचक्रे प्रसंगइत्यर्थः ज्ञापकवाद्याह एवंतर्हीति ईत्त्वभवतीति अत्रक्ङितीति

व्यवस्थार्थमेवतर्हि हल्ग्रहणं कर्त्तव्यं हलादावीत्वं यथास्यात् अजादौ माभूदिति कुतोह्येतत् ईत्वस्यासिद्धत्वाल्लोपः लोपेनाव्यवस्थानं भवि
ष्यति न पुनर्लोपस्यासिद्धत्वादीत्वमीत्वेन व्यवस्थानं स्यात् तदेव खल्वपि तस्मिन्नसिद्धं भवति कथं पठिष्यतित्याचार्यः चिणोलुक्ङित ग्रहणानन्
र्थक्यं संघातस्याप्रत्ययत्वात्तलोपस्य चासिद्धत्वादिति चिणोलुक् चिणोलुक्येवासिद्धो भवति एवं तर्हि यदिव्यवस्थार्थमेतत्स्यात् नैवायं हल्
ग्रहणं कुर्वीत अविशेषेणायमीत्वमुक्त्वा तस्याजादौ लोपमपवादं विदधीत तदेतत्कथं इदमस्ति आतो लोप इटि चेति ततः घु मास्था
गापाजहातिसां लोपो भवति इटि च अजादौ क्ङितीति किमर्थं पुनरिदम् ईत्वं वक्ष्यति तद्बाधनार्थं तत ईत् ईत्त्वं भवति घ्वादीनां ततएर्लिङि.
वान्यस्य संयोगादेः नल्यपि मयतेरिदन्यतरस्यां ततः यतियतिचेईत् भवति सोयमेवं लघीयसा न्यासेन सिद्धे सति यद्धल्ग्रहणं करोति तज्ज्ञा
पयत्यमारभ्यतेन तज्ज्ञापयत्याचार्यः भवतीह विप्रतिषेध इति सनः क्तिचि लोपश्चास्यान्यतरस्यां इहान्यतरस्यां ग्रहणं शक्यमकर्त्तुं कथं
सनः क्तिचि लोपश्च आत्वं च विभाषेति अपर आह सर्वएवायं योगः शक्योवक्तुं इह लोपोपि प्रकृतः आत्वमपि प्रकृतं विभाषाग्रहणमप्रकृ पिम०
तं तत्र केवलमभिसंबंधमात्रं कर्त्तव्यं सनः क्तिचि लोपश्च आत्वं च विभाषेति॥ ॥

सापेक्षत्वे सनः क्तिचि इहालुप्त्वत्र यं साध्यं सातिः संतिरिति तच्च सनः क्तिचि लोपश्चेत्येतावतिसूत्रेयेविभाषेत्यतो विभाषाग्रहणानुवृत्तौ सिध्यतीति मत्वाह इ
हेति सर्वएवायमिति सनः क्तिचीत्येवलोपस्य प्रकरणात्सिद्धत्वाल्लोपश्चेत्यपि न वक्तव्यमित्यर्थः बहूनांपदानां प्रत्याख्यानाच्च सर्वएवायं योगइत्युच्यते॥ ॥ एम० १५७

सतिः२

आर्धधातु अयद्वितीयाध्यायविहिता आर्धधातुकनिमित्ता आदेशा इहैव कस्मान्नोक्ताः एवं हि द्विरार्धधातुकग्रहणं न कर्त्तव्यं भवति नैवं शक्यं आभाच्छास्त्रीये कार्ये तेषां
असिद्धत्वप्रसंगात् ततश्चास्यादेशस्य भुवो वुक् न स्यात् स्नादेशस्यैव तु स्यात् तथा च रव्यतुरि साहैरव्याओ सिद्धत्वादल्लोपाप्रसंगः कानि पुनरिति कानिचिदन्यथा

धिका

आर्धधातुके कानि पुनरार्धधातुकारस्य प्रयोजनानि अतो लोपो यलोपश्च णिलोपश्च प्रयोजनं आ
ल्लोप ईत्वमेत्वं च चिणवद्भावश्च सीयुटि अतो लोपः चिकीर्षिता चिकीर्षितुं आर्धधातुक इति किमर्थं चिकी
र्षति नैतदस्ति प्रयोजनं अस्त्वत्र सनो अकारलोपः शपः अकारस्य श्रवणं भविष्यति शप एव तर्हि
माभूदिति एतदपि नास्ति प्रयोजनं आचार्यप्रवृत्तिर्ज्ञापयति नानेन शबकारलोपो भवतीति यदयं
अदिप्रभृतिभ्यः शपो लुकं शास्ति नैतदस्ति ज्ञापकं कार्यार्थमेतत् स्यात् विनो मृष्ट इति ॥ ॥

पिपासिष्यंतीति प्रश्नः चिकीर्षतीति अकारोच्चारणं तु सनः प्रतीषिषतीत्यादौ द्विर्वचनार्थं स्यात् शप एव तर्हीति शब्विधानं तु प्रत्ययलक्षणेन गुणाद्यर्थं स्यात् अतो
दीर्घो यञीति अस्य सर्वत्राकारलोपे कोवकाश इति चेत् वचनादतो लोपं बाधित्वा पचाव इत्यादौ भवत्येव नैतत् चलनार्थम् उपदेशाल्लसार्वधातुकानुदात्तत्वम् ज्ञापकं सार्वधा
तुकेऽतो लोपाभावस्य कार्यार्थमे तत्स्यादिति प्रत्ययलक्षणप्रतिषेधार्थमित्यर्थः ॥ ॥

भा०कौ०६
१५८

यत्तर्ही ति यदि श्यपोतो लोपः स्यात् याता प्रम्लतयन्त्वाकारांतानां वादिष्वेव पठेरन् नत्वदादिषु लुग्लोपयोस्तत्र विशेषाभावात् ननु श्यिंश चोद्यमिदं पाठसामर्थ्य कतृत्वे स्यात् नैष दोषः विशेषकार्यार्थत्वाद्धि शिष्टगणपाठस्य ननु यातीत्रात्र लाणि यांती त्राह्ल णि सादेशपृष्ठपनोर्निसमिति प्रत्ययलक्षणेन निसो नुम्मा भूदि सेवमर्थं तु विधानं स्यात् नैतदस्ति लुमतालुप्तेयदंगं तस्य कार्ये प्रत्ययलक्षणप्रतिषेधो न च नुमागमस्तस्यांगस्य कार्यमिति लुक्यपि क्रियमाणे प्रत्ययल क्षणप्रसंगः सर्वत्र च शपोऽतो लोपे विज्ञायमाने शपृष्ठपनोर्निसमित्यत्र प्रत्ययलक्षणं भूतपूर्वविज्ञानं वाश्रयणीयमिति नास्त्येव लुग्लोपयोर्विशे ष इति ज्ञापक एवाकारांतानां अन्ये यांचागुणवृद्धिमाजाम दहनासादीनां अदादिषु पाठः सार्वधातुकेऽतो लोपाभावस्य कथं तर्हि याती कुले इत्यादौ प्रत्य

=शिंशपाचोद्यमिति·लंकायांनी ताक्षीला शिंशपान्नेत्स्यादिति तिकेनविदुकेकश्चित्स्यानिहसांतरेषु सल्लु किंशिंशपादुपधेनेतितदिदं बोध्यमिति भावः॥ विशिष्टेति·नदजावेहि त्वादिपाठएवोचितइतिभावः॥२= कस्येति·नदंगधातुः॥ इदं च पत्रं=

यत्तर्हि आकारांतेभ्यो लुक् शास्ति याति वाति अस्तेश्च अस्तेश्च शपो लुकं शास्ति अस्ति इदं तर्हि प्रयोजनं वृक्षस्य अपतो लोपः प्राप्नो ति यल्लोपेपि प्रयोजनम् वेभिदिता चेछिदिता आर्द्धधातुके इति किमर्थं वेभिद्यते चेछिद्यते णिलोपः प्रयोजनं पाच्यते याज्यते का रणा हारणा आर्द्धधातुक इति किमर्थं पाचयति याजयति कारयति हारयति आल्लोपः पपतुः पपुः ववतुः वयुः आर्धधातुके ९ इति किमर्थं यांति वांति ईत्वं हीयते धीयते आर्धधातुक इति किं॥ ॥

=स्थपोपइति·तथाचवर्णाश्रयत्वात्प्रसमज्जक्षणमिति भावः॥४=

यलक्षणेननुमनमवृति श्रपाकारस्यविशेषणं छपोयोऽकारस्तदंतादंगादुत्तरस्य शतुर्नुम्भवतीति न च शपि लुप्ते शपोऽकारः संभवति वृक्षस्येति प्रागेवस्या दतो लोपः भूतपूर्वगत्यातुस्यादेशः ननु परत्वात्स्यादेशो भविष्यतितत्र कृते सन्निपातपरिभाषयातोलोपो न भविष्यति उच्यते कृष्टायेति निर्देशो नानित्यत्वज्ञा पनार्थनु पक्षान्तरस्याः परिभाषायाः स्यादेवातो लोपः पाचयतीति णिज्विधानं तु प्रत्ययलक्षणार्थं स्यादिदं घार्थं च पाचयितेति यांतीति ननु स्मास्प स्तयोरेवातः सार्वधातुके नास्त्येति एवं नियमाद त्र न भविष्यति विपरीतो पि नियमः किं न स्यात् सार्वधातुके एव स्मास्पस्तयोरिति पपतुरित्यादौ न स्यात् स्मा

=अप्येकाच इति प्रतिषेधः स्यात्·=नन्वत्र पक्षे आगतं यर्थमतआह·उ नरार्थमिति·लुनीतइत्यादि
=अनित्यतादिति·तेनापमानित्यमसंगो[illegible]भावः॥२=

राम०
१५८

=नदुहल्लुनमामिसनेन।८

अदातामिति लुङ् तांगातिस्थेतिसिचो लुक् प्रस्तुवीतेति कर्मेकर्त्तरि इदमुदाहरणं तत्रयकः प्रतिषेधात् कर्मणितुप्रस्तूयेतेतिभाव्यं ननु चिणोऽपिप्रतिषेधा
त्कथं चिण्वद्भावः एवं तर्हि भावकर्मणोश्चिरादर्शनादत्र चिण्वद्भावप्रसंग इत्याशयः अप्रसमाप्त्युसोदाहरणं तरमाह इदं चापीति येभ्योधातुभ्यः कर्मकर्त्तरि चिण्प्र
तिषिध्यते तेषां चिण्वद्भावस्यापि निषेधः वृद्धिरिति एतच्च एपद्धोपाविसाधुनं पेर्ष्पीकं अत्रहि चिण्वद्भावाददतोलोपोपिप्राप्नोति द्विस्त्र यावादिभ्यो हि श्यपो लु
ग्विधानेनसार्वधातुके ऽतोलोपाभावो ज्ञापित इतिसांप्रयोऽतोलोपोमाभूत् चिण्वद्भावाच्चिणितस्यादर्शनात्स्यादेव भाष्यकारेणतु प्राप्तिमात्रं वृद्धेराश्रितोक्तं
।अथवाहोषोपलक्षणं वृद्धिरतोलोपेपि रूपासिद्धिप्रसंगात् वृद्धौकृतायामाकुणश्च प्राप्नोति पुक् च तत्र वार्णादांगंबलीय इति पुक्प्रसंगः इट् प्रसंगस्तु वि

=अनपेक्ष्येति। तदपेक्षायां तु वृद्धिर्वा धितिकारलोपेनभाव्यं।२= सार्वधातुकाश्रय।१२= =ननुकर्तरि। परस्मैपदित्वात्।नापिकर्मणीसाह।कर्मणिविति।५= =असमाप्तेर्बीजमाह।सेमझति।७= चिण्वद्भावादिट्प्रसंगइति कुतोनोत्सजनतआह।८=इत्येति।९=

अदातां अघातां एत्वं ग्लेयात् म्लेयात् आर्द्धधातुक इतिकिं स्नायातस्नायातां चिण्वद्भावश्च सीयुटि चिण्वद्भावे सीयुटि कि मुदाहरणं कारिषी
ष्ट आर्धधातुक इतिकिं क्रियेत ह्रियेत नैतदुदाहरणं यकाव्यवहितत्वान्न भविष्यति इदंतर्ह्युदाहरणं प्रस्तुवीत इदं चाप्युदाहरणं क्रियेत ह्रिये [redacted]
त ननु चोक्तं यकाव्यवहितत्वान्न भविष्यतीति यक एवं तर्हि माभूदितिकिंचस्यात् वृद्धिः वृद्धौकृतायां पुक् प्रसज्येत भ्रस्जोरोपधयोरमन्यतरस्यां अयं
रमरेफस्यस्थानेकस्मान्नभवतिमिदचोंऽत्यात्पर इस नेन अचामंत्यात्परः क्रियते रेफस्यतर्हि श्रवणं कस्मान्नभवति षष्ठ्युच्चारणसामर्थ्यात्॥ ॥
तर

=सीयुडादेरिति।हिनसोमेसवर्लोदीर्घविधेर्भाव।१०=

लोपाभावान्नोक्तः भ्रस्जोरोप आदेशांतराणां स्थानितुल्यदेशानां दर्शनात्पृच्छति।अयं रमिति रेफग्रहणस्योपलक्षणा [redacted] र्थत्वादुपधाया अपीति वोद्धव्यं रेफस्य
तर्हीति स्थानांतरेप्रवृत्तेनरमाऽनिवर्जितत्वात् षष्ठ्युच्चारणसामर्थ्यादिति रोपधयोरिति स्थानषष्ठ्यातयोरविषये प्रयोगः प्रतिपाद्यते रोपधयोः प्रसंगे रम्प्रयुज्य
ते रोपधेनप्रयुज्येते इत्यर्थः रम्प्रयुज्यमानोमित्वादचोंऽत्यात्परोभवतीतिवाक्यार्थः संपद्यते यस्यतुदेशांतरेनास्ति विधानं तस्य स्थानिदेश एव भवति तत्प्रसंगेत
स्यविधानाद्विशिष्टदेशस्य स्थानिनः प्रसंग इति तद्देशे नैवादेशेनभाव्यं॥ ॥श्री॥ ॥ ॥

भारद्वाजीया इतिते हि स्मनः क्ङिचित्लोपइत्यतोलोपग्रहणमनुवर्त्त्यैरेपधयोर्लोपं रमागमं चान्यतरस्यांविदधति भज्ज्वतीति आर्धधातुकाधिकारस्तत्र रमोऽप्र
संगः रसोरिति साचकृत्स्वरेकृत्स्वस्वकारस्य चस्थशारोत्रो वा आदेशाः तत्रकृते ऽकिति गुणाः प्रवर्त्तते भर्ष्टेति स्वकारणभावपक्षेतु भृष्टेति किति तु स्वशाद्वे भृष्टमिति
भवति तदभावपक्षे ऽपिसंप्रसारणेसति भृष्टमिति नार्थः पूर्वविप्रतिषेधेनेति इतरोऽत्रापिपूर्वविप्रतिषेधो वक्तव्य इतितुल्यतां प्रतिपादयन्नाह रसोरिति॥
भ्रस्जेः सिचि स्वभावं विकल्पितं बाधित्वा परत्वान्नित्यं हलंतलक्षणा वृद्धिः प्राप्नोतीति स्वभावार्थः पूर्वविप्रतिषेधो वक्तव्य एवतेनरूपद्वयं सिध्यति अभ्रा

भारद्वाजीयाः पठंति भ्रस्जोरेपधयोर्लोप आगमो रमुविधीयत इति भ्रस्जादेशात्संप्रसारणं विप्रतिषेधेन भ्रस्जादेशात्संप्रसारणं वि
प्रतिषेधेनभवति भ्रस्जादेशस्यावकाशः भर्ष्टा भर्ष्टुं संप्रसारणस्यावकाशः भृज्जति इहोभयं प्राप्नोति भृष्टवानिति संप्रसारणंभ
वतिपूर्वविप्रतिषेधेन सतर्हि पूर्वविप्रतिषेधो वक्तव्यः नवक्तव्यः रसोर्वेनास्तिद्वं रसोर्वा स्व भवतीतिवक्ष्यामि रसोर्वर्वचनेसिद्धिर
द्धेभ्रस्जादेशोवक्तव्यः वृद्धौकृतायामिदमेवरूपं स्यात् अभ्राक्षीत् इदं नस्यात् अभार्क्षीत [redacted] सर्वथावयंपूर्व
विप्रतिषेधान्नमुच्यामहे सूत्रंचभिद्यते यथान्यासमेवास्तु ननु चोक्तं भ्रस्जादेशात्संप्रसारणंविप्रतिषेधेनेति इदमिह संप्रधार्यं॥
भ्रस्जादेशः क्रियतां संप्रसारणमिति किमत्रकर्तव्यं परत्वात् भ्रस्जादेशः नित्यत्वात्संप्रसारणं कृतेपिभ्रस्जादेशेप्राप्नोति अकृतेपि भ्र
स्जादेशेपि नित्यः कृतेपि संप्रसारणेप्राप्नोति अकृतेपिप्राप्नोति॥ ॥

क्षीदभार्क्षीदिति ननुच स्वभावो नित्यः कृतायामपिरजादेकदेशविकृतस्यानन्यत्वात्प्रसंगाद्वृद्धिस्तु शब्दजाकृतेरेकत्वान्नास्ति वृद्धेः शब्दांतरस्यप्राप्त्यांनित्यत्वमिति
द्वयोर्नित्ययोः परत्वाद्वृद्धिप्रसंगः अंतरंगस्वभावइतिचेत् नसिच्यंतरंगमस्तीति ज्ञापयिष्यते रमभावेतु क्रियमाणे परत्वाद्वृद्धौकृतायां पुनः प्रसंगविज्ञानाद्र
मिसतिसिद्धमभार्क्षीदिति॥ ॥श्री॥ ॥

× शांतरं प्रसंगादनित्या × २
सर्वाभ्रि

योसौ स्त्कारो रेफ इति ननु च स्त्कारावयवस्य रेफस्य समक्रियमाणः कथमंत्यादचः परः स्यात् माभूदंत्यादचः परः तत्र विषय आदेशो भविष्यतीति मित्वं तु भष्टे त्वाद्रेसावकाश म् उपदेश इति वर्त्तत इति भ्रस्जेरुपदेशे यो रेफस्तस्य स्थाने रमृ भवति न च स्त्कारावयव उपदेशे भ्रस्जेरेफो भवति वरीभ ज्जपत इति तन्मध्यपतितस्त इह होन गत्वत इति रीको रेफो भ्रस्जे र्भवतीति रम प्रसंगः भ्रस्जेरुपदेशो तु नासौ रेफ इति रम भावः उपनं सविकार इ सेत नु मयोजनाभावान्नोश्रितं अतो लोपः यणादेशे नेति

=ननु रीकोऽनंसस देश लापे विष्यति अत आलानं सविकारपूर्ति [illegible]

योसावृकारे रेफस्तस्य चोपधाया अचलनेपि प्राप्नोति अनित्यो भ्रस्जादेशः न हि कृते संप्रसारणे प्राप्नोति किं कारणं न हि वर्णैकदेशावर्णग्रहणेन गृ ह्यंते अथापि कथंचित् गृह्यंते एवमपि अनित्यः कथमुपदेश इति वर्त्तते न चावश्यमुपदेश यग्रहणं अनुवर्त्यं वरीभ ज्जपतेरित्येवमर्थं अतो लो पः एयच्लोपावियङ् यणगुणवृद्धि दीर्घेभ्यः पूर्वविप्रतिषिद्धं एयच्लोपो इयङ् यणगुणवृद्धि दीर्घेभ्यो भवतो विप्रतिषेधेन णिलोपस्यावकाशः का र्यते हार्यते इयङ्आदेशस्यावकाशः श्रियौ श्रियः इहोभयं प्राप्नोति आटिटत् आशिशत् ननु चात्र यणादेशेन भवितव्यं इदं तर्हि अततक्षत् अ ररक्षत् यणादेशस्यावकाशः निन्यतुः निन्युः णिलोपस्य स एव इहोभयं प्राप्नोति आटिटत् आशिशत् वृद्धेरवकाशः सखायौ सखायः णिलोपस्य [redacted] स एव इहोभयं प्राप्नोति कारयतेः कारकः हारयतेः हारकः गुणस्यावकाशः चेता स्तोता णिलोपस्यावकाशः आटि टत् आशिशत् इहोभयं प्राप्नोति॥ ॥ ॥

॥ एरनेकाच इत्यनेन ततश्च यणा बाधनादियङः संप्रधारणागोचरत्वाभावः सखायाविति सख्युरसंबुद्धाविति प्राप्ताति देशपक्षे वृद्धेरयमकाशो न तु कार्योति देशपक्ष इत्यवसेयम् णिलोपस्यावकाश आटिटत् इति यतो णिलोपेन बाधितत्वादिति भावः॥ ॥श्री॥ ॥८॥

भा०कौ०६ कारणेति ननु चात्रापि इयङो ऽपवादः एरनेकाच इति यण् प्राप्नोति परत्वात्तस्य गुणेन बाधनात् गुणस्यापि पूर्वविप्रतिषेधात् णिलोपेन त्वदोषः एकैकेन सह णिलोप
१६० स्य विचारः इयङादीनां च अन्यतमविषयोपि णिलोपस्यावकाश उपन्यस्यते सत्त्वन्नैत इति ननु कारणं कारक इत्यादौ गुणवृद्ध्योः कृतयोः अन्तरंगत्वात् दयायोः कृतयोः

कारणा हारणा दीर्घत्वस्यावकाशः धीयते स्नूयते णिलोपस्यावकाशः स एव इहोभयं प्राप्नोति कार्यते हार्यते णिलोपो भवति विप्रतिषेधे
न सतर्हि पूर्वविप्रतिषेधो वक्तव्यः न वक्तव्यः सत्त्वन्नैते विषयः एतेषु विधिषु कृते षु स्थानिवद्भावात् इग्रहणेन ग्रहणात् लोपो भविष्यति नैवं शक्यं।
इयङादेः इग्रहणे दोषः स्यात् किं अस्य लोपः प्रसज्येत अल्लोपस्य यूङ्यणोः स्त्रु नास्ति संप्रधारणा वृद्धेरवकाशः प्रियमाचष्टे प्रापयति अल्लोप
स्यावकाशः चिकीर्षिता चिकीर्षितुं इहोभयं प्राप्नोति चिकीर्षको जिहीर्षकः गुणस्याल्लोपस्य च नास्ति संप्रधारणा दीर्घत्वस्यावकाशः अ
पिकाकः अपेनायते अल्लोपस्य स एव इहोभयं प्राप्नोति चिकीर्ष्यते जिहीर्ष्यते अल्लोपो भवति विप्रतिषेधे न सतर्हि पूर्वविप्रतिषेधो वक्तव्यः
न वक्तव्यः इष्टवाची परशब्दः विप्रतिषेधे यत्परं इष्टं तद्भवतीति यस्य हलः किमिदं यलोपे वर्णग्रहणं आहोस्वित् संघातग्रहणं कश्चात्र विशेषः
यलोपे वर्णग्रहणं चेत् बालत्वतस्य प्रतिषेधो वक्तव्यः मुच्छिता मच्छिता अस्तु तर्हि संघातग्रहणं अंत्यस्यस्य लोपः प्राप्नोति सिद्धं सस्य पूर्वेण
वतन्त्रारंभसामर्थ्यात्तस्य वैस्य भविष्यति एवमपि तेनाति प्रसक्तमिति कृत्वा नियमो विज्ञास्यते यस्य हल एव नान्यतः धेर्माभूत् लोलूयिता पो

१ पूपिता॥ × ग्रहणं यदि संघात + ॥श्री॥ ॥ ॥

अंत्यस्य णिलोपः प्राप्नोति वार्णादांगं बलीय इत्ययो(यो) वा बाधित्वा णिलोपो भविष्यती सदोषः प्रापयतीति प्रियस्य प्रादेशे वृद्धौ चपुगागमः अनार्धधातुकत्वात्सिद्धो
तोरविधानात् तो लोपस्यात्र प्रसंगः यस्य हलः किमिदमिति यथागं तु नाकारेण निर्देशस्ततो वर्णमात्रग्रहणं अन्यथा तु संघातग्रहणमिति पक्षद्वय संभवः राम०
१ अस्य सस्येति अलोंसस्येति वचनात्॥ ॥श्री॥ ॥ १६०

कैमर्थक्यादिति को र्थोयस्य तत्किमर्थं कृतस्य भावं कैमर्थ्यं संभ्रम्य विषयोः संबंधोऽत्र भावप्रत्यय वाच्यः अपूर्व एव विधिरिति नियमे हि श्रुतार्थत्यागेनाश्रुतायाश्चान्यनि
वृत्तेः सामर्थ्यात्परिकल्प नेउक्तानुवादे दोषश्च प्राप्नोति एवमप्यं त्यस्येति अलोन्त्य परिभाषो पस्थानात् अपूर्वस्य विधेरसंभवाद्धि विधिनियमसंभवे च विधिरेव ज्या
यानिति अस्यत्रायस्यायमविषय इत्यर्थः संघातग्रहणसामर्थ्यादिति किं यस्य हलइत्यस्य विधिरूपत्वं वाध्यतां उतालोन्त्यस्येति परिभाषेति पाराणर्थ्यादप्राधा
न्यस्य परिभाषायास्तागोयुक्तो न तु प्रधानस्य विधिरूपबाधनं सन्निधिनेति सन्निधिर्मिच्छत्यात्मन इति क्यचं तत्तस्तच् इद्ध इहवर्णग्रहणोकारस्य विभाषेत्यत्र क्येन

कैमर्थ्यक्यान्नियमो भवतीति विधेयं नास्तीति कृत्वा इह चास्ति विधेयं किं अंतस्य लोपः प्राप्नः सर्वस्य विधेयः तत्राप्रवर्ते विधिरस्तु नियमो वेति॥
अपूर्व एव विधिर्भविष्यति न नियमः एवमप्यंत्यस्य प्राप्नोति किं कारणं न हि लोपः सर्वापहारी ननु च संघातग्रहणसामर्थ्यात्सर्वस्य भविष्य
ति संघातग्रहणं चेत्क्यस्य विभाषायां दोषः संघातग्रहणं चेत् क्यस्य विभाषायां दोषो भवति सन्निधिना सन्निधिना यदा लोपस्तदा सर्वस्य[redacted]
[redacted]लोपः यदा अलोपस्तदा सर्वस्यालोपः प्राप्नोति॥ ॥ ॥

×नापयस्येति योगविभागो व्याख्या×२ विदि मेन

यकारो विशेष्यते क्यस्य यो यकारो हलः परः तस्य विभाषा लोपो भवत्यकारस्य तु तो लोप इति यथेष्टं रूपद्वयं सिध्यति संघातग्रहणे तु यस्य हल इत्यनेनानेन प्राप्तिर्न्याये
नाती लोपो वा ध्योयल्लोपोपि क्यस्य विभाषेति विकल्पेन बाध्यत्त तस्य पक्षे संघातस्यैव श्रवणं प्राप्नोति नित्यं यल्लोपवदल्लोपस्यापि विकल्पे न बाधनात् एतच्चान
धातु लोपइत्यस्य प्रत्याख्यातत्त्वमनाश्रित्योक्तं तदाश्रये ह्यलोपस्यासिद्धत्वात् क्यस्येति कंड्वादियकोपि ग्रहणं केचिदिच्छंति किंतोयशब्दस्य ग्रहणेतास्य यत्र कारस्या
नुबंधस्यादित्वमविवक्षितमिति वदंतः एतदपरे नेच्छंति आदिभूतककारानुबंधनिर्देशे सत्यादित्वाविवक्षायां प्रमाणाभावात्लक्ष्यस्य च तथाशिष्टैरप्रदर्शनात्॥

आदेरिति ततश्च कृत्स्नविभाषेति यकारस्यैव लोपो विकल्पेनाकारस्य तु नित्यमिति सिद्धमिष्टं अंगादिति वृत्तेत इति अंगस्येति निमित्तनिमित्तिभाव संबं
धाश्रयणे पंचम्यर्थत्वाभावात् लाभे हान्सं चमीति दृशः कृतः इतरो यथोक्तमभिप्रायं अभ्युपगम्य आह नवै अंगादिति संबंध षष्ठीति अनेक संबंध संभवे

आदेः परवचनात्सिद्धं हल इति पंचमीन स्यादि सूत्रस्यादेः परस्येति यकारस्यैव भविष्यति अथ वा पुनरस्त्ववर्णाग्रहणं नुचोयत्लोपेवु
र्णाग्रहणं चेद्व्यात्वं तस्य प्रतिषेध इति नैषदोषः अंगादिति हि वर्तते नवै अंगादिति पंचम्यस्ति एवं तर्हि अंगस्येति संबंध षष्ठी विज्ञास्यते
अंगस्य यो यकारः किं चांगस्य यकारो यस्मिन्नंगमिस्येतत् भवति कस्मिंश्चैतद्भवति प्रत्यये णेरनिटि अनिटीति किमर्थं कारयि
ता कारयितुं अनिटीति शक्यमवक्तुं कस्मान्न भवति कारयिता कारयितुं निष्ठायां सेटीत्येतन्नियमार्थं भविष्यति निष्ठायामेव सेटि णे
र्लोपो भवति नान्यत्रेति क्व मा भूत् कारयिता कारयितुं अथ वा उपरिष्टात् योगविभागः करिष्यते इदमस्ति निष्ठायां सेटि जनि
तामंत्रे शमिता यज्ञे ततः अय् अय् आदेशो भवति णेः सेटि ततः आमंताल्वाय्येत्निष्णुषु अय् भवतीत्येव॥ ॥ ॥

=अतोपगतिः यद्यपि परत्वाद्यलोपे कारलोप इति कथं तस्य प्रत्ययत्वं तथापि यदि पूर्वमल्लोपः स्यात्तस्यापि प्रत्ययत्वं स्यादिति नार्किक प्रत्ययत्वाद्दोषः॥२= अनिटो निष्ठायाइति एवं तावत्नियम इति एव एतत्सोत्तरसूत्रे स्फुटी भविष्यति॥२=

प्यंतरंगत्वान्निमित्तनिमित्तिभाव लक्षण एव संबंधः परिगृह्यते प्रत्यय इति प्रत्ययहेतुकत्वादंगव्यपदेशस्य ननु च समुदायः प्रत्ययोंगस्य निमित्तं न तु य
कारमात्रं अकारेलुप्ते यकारमात्रस्य प्रत्ययत्वाददोषः णेरनिटि निष्ठायामेव सेटीति से घेव निष्ठायामिति नियमो न भवत्यनिटो निष्ठाया पा०
ऽभावात् अयादेशो भवतीति लोपापवाद इत्यर्थः॥ ॥श्री॥ ॥ १६१

=५ इत्यमितियमकत्वेणमिति सैवंपुमकत्वोनिष्ठायांसेटीसम्मानंतरं [illegible] ज्ञपेर्वैनीतिप्रसक्ते णिलोपः क्रियेत नतोऽस्य मपापः जपुसूर्वादेः आमंताञ्चार्थेति [illegible] नकर्तव्यं [illegible] भवति वादांतेसन्नोभयत्रविभाषागीकात्प्रसे [illegible] इत्यर्थं निपातनं णिलोपसेतमाष्य

संज्ञपित इति सनीवंतर्धेति सनि विकल्पविधानाद्यस्य विभाषेति इट्प्रतिषेधः सेड्ग्रहणसामर्थ्याच्च पूर्वेणापि न भवति वादान्तशान्तेत्यत्र ज्ञपेर्निपातनमाश्रीयते ज्ञप्तो ज्ञपित इति एकाचो हीति यस्य विभाषेत्यत्रैकाच इत्यधिकारात् इड्भावार्थमिति इटि कृते णिलोपो यथा स्यादकृते मा भूदिति कालावधारणार्थं सेड्ग्रहणमित्यर्थः॥

×निष्ठायांसेटि॰४२

=मारणतोषणनिशामनेषु ज्ञा इति मारणार्थत्वादिचिपुक्तिमितं [illegible] ॰२=नन्वेवं वादांतशांतेत्यत्रेडभावेऽपि प्रकरणे [illegible] निपातनं किमर्थमत आह॰ वादांतेति॰ ज्ञपेदिति॰ [illegible] पाठे कर्तव्ये पाठे न तत्रामित एवयह [illegible] निपातनम्

निष्ठायां सेट्ग्रहणं किमर्थं निष्ठायां सेट्ग्रहणं अनिटि प्रतिषेधार्थं निष्ठायां सेट्ग्रहणं क्रियते अनिटि प्रतिषेधो यथा स्यादिति संज्ञपितः प्रज्ञपुरिति निष्ठायां सेट्ग्रहणं अनिटि प्रतिषेधार्थमिति चेन्न सिद्धं निष्ठायां सेट्ग्रहणं अनिटि प्रतिषेधार्थमिति चेत् अन्तरेणापि सेट्ग्रहणं तत्सिद्धं कथं अनिड्भावात् ननु च यस्य विभाषेति तत्र पेरिट्प्रतिषेधः एकाचो हि प्रतिषेधः एकाचो हि स प्रतिषेधः ज्ञपिश्चानेकाच् इड्भावार्थं तु हि सेट्ग्रहणं क्रियते कथं पुनः सेटीत्यनेन इट् शक्यो भावयितुं तन्निमित्तत्वाण्णिलोपस्य नाकृते इटि णिलोपेन भवितव्यं किं कारणं सेटीत्युच्यते ऽवचने हि णिलोपे इट्प्रतिषेधप्रसंगः अक्रियमाणे हि सेट्ग्रहणे णिलोपे कृते एकाच इतीट्प्रतिषेधः प्रसज्येत कारितं हारितं एवं तर्हि नार्थः

इड्भावार्थेन

सेट्ग्रहणेन नापि सूत्रेण॥ ॥ ॥

=अनाश्रित्येति॰ [illegible] णिलोपस्य [illegible] ॰३=ननु पूर्वमिष्ट [illegible] णिलोपे कृते प्रतिषेधेन [illegible] आह॰ इटि विति॰२=

अक्रियमाणे सेट्ग्रहणे कारित इति स्थिते णिलोपश्च प्राप्नोति इट् च नित्यत्वाण्णिलोपः प्राप्नोति तत्र कृते एकाच इतीट्प्रतिषेधः प्राप्नोत्येकदेशविकृतस्यानन्यत्वात्स एकारो ति [redacted] भवति इतीयस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यमित्येतत्तु कार्येगतभावापेक्षायां नाश्रीयत इत्यनित्य एव इडागमः इटि तु णिलोपे क्रियमाणे न प्रवर्जते इट्प्रतिषेधो निर्दिष्टस्य प्रतिषेद्धुमशक्यत्वात् एतच्च प्रयोजनं पूर्वस्मादपि विधौ स्थानिवद्भाव इत्यनाश्रित्यो

सप्तमे योगविभाग इति णेरध्ययने वृत्तमिति योगं विभज्य योगद्वयं क्रियते क्रमविपर्ययेण च आश्रीयते णेरित्येको योगः तत्र निष्ठायां नेडिति वर्त्तते ततो वृत्तमिति द्वितीयो योगो णिलोपनियमार्थो गुणप्रतिषेधार्थश्चानेकप्रयोजनत्वान्निपातनात् अथवा वृत्तं वृत्तमित्येकशेषाश्रयणादेकस्य नियमार्थत्वमपरस्य गुणनिषेधार्थत्वं भविष्यति ततोऽध्ययन इति तृतीयो योगो वृत्तशब्दस्यार्थविशेषनियमार्थः रमणात्त्वित्यत्र येन प्राप्तस्य अथाकिंपुनरिति यद्यपि क्त्वावयामन्तात्वाय्येत्विष्णुष्विति निर्देशादुपपत्तिस्तथापि युक्तायुक्तत्वापेक्षो विचारः कः प्रसय आश्रयितुं युक्तः को न युक्त इति अथवा किंकृते डाग

×निपात्यते· णेर्निष्ठायां लोपो निपात्यते· किं×२

कथं सप्तमे योगविभागः करिष्यते इदमस्ति निष्ठायां नेट् भवति ततः णेः एयंतस्य निष्ठायां नेट् भवति कारितं हारितं ततो वृत्तं वृत्तमिति च निपात्यते किं प्रयोजनं नियमार्थं अत्रैव निष्ठायां णेर्लोपो भवति नान्यत्र क्व माभूत् कारितं इहापि तर्हि प्राप्नोति वर्त्तितमन्नं वर्त्तितामिक्षेति ततः अध्ययने अध्ययने चेद्वृत्तिर्वर्त्तते वृधिरमिशृधीनामुपसंख्यानं सार्वधातुकत्वात् वधिरमिमृधीनामुपसंख्यानं कर्त्तव्यं किं कारणं सार्वधातुकत्वात् वर्धन्तु त्वा सुष्टुतयो गिरो मे वर्धयंत्वित्ति प्राप्ते वहस्पतिष्ट्वा सुम्ने रम्णातु रमयत्विति प्राप्ते अग्ने शर्धमहते सौभगाय शर्धयेति प्राप्ते तत्र हि वक्तव्यं वृधिरमिशृधीनामार्धधातुकत्वात्सिद्धं कथं आर्द्धधातुकत्वं अन्येपि हि धातुप्रत्ययाः उभयथा छंदसि दृश्यन्ते अयामन्तात्वाय्येत्विष्णुषु किं पुनरयं क्नुः आहोस्विदित्नुः कश्चात्र विशेषः क्त्वाविधिर्णेर्गुणवचनं क्नौ सतीति इट्टि णेर्गुणो वक्तव्यः॥ गद१ यित्नुः स्तनयित्नुः अस्तु तर्हि इत्नुः इत्नौ प्रत्ययांतरकरणं यदितइत्नुः प्रत्ययांतरं कर्त्तव्यम्॥

=उभयथेति क्नो प्रत्ययस्वरेण नु विचित्स्वरेण निघातः॥३= नवक्तव्यं२

मः क्नुरिह निर्दिश्येत् यप्रत्ययएवेत्नुरिति विचारः क्त्वाविटीति स्तनिहृषीत्यत्र यदि क्नुर्विधीयते तदा तस्येटि कृते ऽनिटीति वचनान्नित्यलोपो नास्ति किंतर्हि कित्वात् गुणप्रतिषेधः प्राप्नोति गुणो विधेयः इत्न्वाविति स्तनिहृषीत्यत्रेत्नुर्विधेयः क्नुर्हनिष्यां क्नुर्विधेयः यदा तु स्तनादिभ्यः क्नुर्विधीयते स एवो नरत्रानुवर्त्तते तदा प्रत्ययांतरं न विधेयं स्वरे अपि भेदो नास्ति उभयथाप्याद्युदात्तत्वात्॥ ॥ श्री॥ ॥ ॥ ॥

=क्नुर्णिति·नेन क्नुरित्यादौ न गुणः॥२= गुणो विधेयः इति·तदा चेट् कृते च प्रत्ययान्तरं न कर्तव्यमिति भावः॥१=

राम० १६२

अयादेशो चेति । णिलोपस्य प्रसंगादुपसंख्यानशब्देनात्र सूत्रे पाठ उच्यते न पूर्ववचनं भाष्यकारो गुरुलाघवमनादृत्य यथान्यासं समर्थयितुमाह उभयमिति यद्यत्र तु
यदृष्ट्या मयादेशार्थं क्रियते तस्मादिम्पधातु कृत्वा विधीयते तदा स्थादेवलाघवं ल्यपि लघुके चिरा चार्येणालघुपूर्वस्येति षष्ठ्यन्तमध्यापिताः अन्ये तु लघुपूर्वादिति पंचम्यन्तं तत्रैष
ष्ठीमाश्रित्याह ल्यपीति प्रशमय्येति श मे णिचि वृद्धौ मितां ह्रस्व इति ह्रस्वस्तत्र णेः पूर्वं व्यंजनं न लघ्विति अयादेशो न प्राप्नोति न चात्र व्यवहितेपि पूर्वशब्दो वर्तते

=सोपपदत्वमिति भाष्यहातानालपुस्तनादिमेनापि नौ विधीयमानेनत्वकिकारणनाभाव्यादृष्ट्वपितुविसत्रणेर्थवधानेपियुणमिभेधयसंगः अन्यभाषान्तेनिदिसादिवत्तन्यादिमनातु हृत्निर्भोकादिनिवेदधिभावः

अयादेशो चोपसंख्यानं अयादेशोचोपसंख्यानंकर्त्तव्यं उभयंक्रियतेन्यासेएव । ल्यपि लघु पूर्वात् । ल्यपि लघु पूर्वस्येति चेत् व्यंजनांतेषू
पसंख्यानं ल्यपि लघुपूर्वस्येति चेत् व्यंजनांतेषू पसंख्यानं कर्त्तव्यं प्रशमय्यगतः प्रतमय्यगतः । अल्लोपे च गुरुपूर्वात् प्रतिषेधो वक्तव्यः
प्रतिचिकीर्ष्यगतः ल्यपि लघु पूर्वादिति वचनात्सिद्धं [redacted] ल्यपि लघु पूर्वादिति वक्तव्यं ॥ ॥

=लघुपूर्वात्कोपूर्वस्ये निकर्मधारयेप्रत्ययोवनादयस्याता लघुःपूर्वोयस्मादिमीति अत्राभयआप्यवधानमेवगम्यतइतिसति चिकीर्ष्यगतइत्यत्रनदोषः नचवर्णग्रहणेजातिग्रहणमेवाचतिवाच्यं धर्मिग्राहकमानेनवर्णस्यसत्वाधानराधर्मभयोनवर्णग्रहणेनतवान्येनहान्

इति शब्दमाश्रयितुं चकार ददी ददीनामपि णपंतानां अयादेशप्रसंगात् प्रचकास्य गत इति न चात्र व्यवहितं पूर्वमाश्रयितुं शक्यं ततश्च प्रगणाय्य प्रस्तनयेत्यादौ एवस्या
दत्र स्थलोपस्यासिद्धत्वाल्लघुपूर्वो णिर्भवति अथापि व्याश्रयत्वाद ल्लोपस्यासिद्धत्वं न स्यात् एवमपि भूतपूर्वगत्या लघुपूर्वोस्मयोः याददेशः स्यात् । अल्लोपे चेति । अ
ल्लोपे कृते योगुरुपूर्वस्तस्मात्परस्य णेोर्भूतपूर्वो लघुपूर्वतामाश्रित्यायादेशः प्राप्नोति लघुपूर्वादितिवचनादिति लघुपूर्वादिति पंचम्यंतं पठितव्यमित्यर्थः लघुः पूर्वोयस्मा
दिति लघुपूर्वस्तस्मात्परस्य णेरयादेशः ॥ ॥ ॥

भा० कै० ६
१६३

एवमपीति क्वतर्हि स्यान्मदमाचष्ट इति णिचुप्रकृते सेकाजिनिष्कृतिभावादि लोपप्रतिषेधः प्रमदप्यगत इत्यादौ स्यात् विभाषा ऽऽध्याप्येति क्वीङ् जीनां णाविसात्वमर्नित्युक्ते त्यादिना पुक् आगमः सानुबंधकनिर्देशादिति आपुक्तिति पठितव्यमित्यर्थः आप्लृशब्दात् च मध्ये कवचने स्वकारल्लकारयोः सवर्णविधिरितिस्त तउदिसुः उरणरपर इत्यत्र प्रत्याहारग्रहणाच्च परत्वं भाष्यकारस्त्वसंदेहार्थं अविभक्तिकं माश्रित्याह आप्लृ इति लक्षणप्रतिपदोक्तयोरि

एवमपि ह्रस्वयलोपाल्लोपानामसिद्धत्वात्स्य पिलघुपूर्वादिति इयादेशो न प्राप्नोति प्रशमप्यगतः प्रतमप्यगतः प्रचेछिदप्यगतः प्रबेभिदप्यगतः प्रगदप्यगतः प्रस्तनप्यगतः ह्रस्वादिषु चोक्तं किमुक्तं समानाश्रयवचनात् सिद्धं इति कथं णावेते विषयः णेर्ल्यप्यादेशः विभाषाप इत्यादेशस्य प्रतिषेधो वक्तव्यः प्राध्याप्यगतः आपः सानुबंधकनिर्देशः करिष्यते आप्लृ इति तेन इडादेशस्य न भविष्यति स तर्हि सानुबंधकनिर्देशः कर्तव्यः न कर्तव्यः कथं प्राध्याप्यगतः लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति॥ ॥
इति श्रीभगवत्पतंजलिविरचिते व्याकरणस्य महाभाष्ये षष्ठस्य चतुर्थे द्वितीयमाह्निकम्॥ ×आपः सानुबंधकनिर्देशादिङः सिद्धं× ॥

ति लाक्षणिकस्यानुमेयरूपत्वाद्विलंबितप्रतीतिगोचरत्वात्प्रतिपदोक्तस्य तु प्रसक्तत्वादविलंबितप्रतीतिविषयत्वादाकृतो च पदार्थे इयं परिभाषा न व्यक्तौ न तत्र हि सर्वस्यां व्यक्तौ लक्षणेन प्रवर्तितव्यं॥ ॥ इत्युपाध्यायजैय्यटपुत्रकैय्यटकृते महाभाष्यप्रदीपे षष्ठस्याध्यायस्य चतुर्थे पादे द्वितीयमाह्निकम्॥ ० राम० १६३
१८ ॥श्री॥ ॥ॐ॥ ॥ॐ॥ ॥

स्यसिचृसीयुट् कथमिति किंभावकर्मणोरित्यभिधेयनिर्देशो भावकर्मणोर्यद्वर्तते स्यादय इति अथ भावकर्माभिधायी प्रत्ययो भावकर्मण्यामभिधीयते भावकर्मणा चिणि
प्रत्यये परतो ये स्यादय इति तत्राद्ये पक्षे भावकर्मशब्दस्य मुख्यार्थवृत्तित्वं द्वितीये गौणार्थता युगपत्तु गौणमुख्यार्थवृत्तित्वासंभव इति प्रश्नः यदि विज्ञायत इति यदि प्र
सिद्ध्यनुरोधेन मुख्यार्थपरिग्रहः सीयुट् विशेषित इति आर्धधातुक इति वर्त्तते न च सीयुट आगममात्रस्य आर्धधातुकसंज्ञास्तीति सामर्थ्यात्सीयुडाद्यार्धधातु
कं गृह्यते तस्य च संभवति भावकर्माभिधायित्वमित्यर्थः स्यसिचृतासय इति भावकर्त्तृकर्मणां त्वादेशार्थत्वेन शास्त्रे व्यवस्थापितत्वात् विकरणानामतदर्थत्वात् अ

=आर्धधातुकस्य एतस्यानुत्ता भावकर्मणोर्ड नेतान्यसंभवे पिनिमित्तजः स्यादयो न संभवंत्यतः आर्धधातुकवृत्तिस्यादीनामेव विशेषणं न त्वार्धधातुकेपरतो ये स्यादय सूत्रपर्यकनपीकि॥

स्यसिचृसीयुट्तासिषु भावकर्मणोरुपदेशे कथमिदं विज्ञायते भावकर्मणोर्ये स्यादय इति आहोस्विद्भावकर्मवाचिनि पर
तो ये स्यादय इति किंचातः यदि विज्ञायते भावकर्मणोर्ये स्यादय इति सीयुट् विशेषितः उभयथा च चिण्वद्भावोऽविशेषि

×स्यसिचृतासयोऽविशेषिताः अथ विज्ञायते भावकर्मवाचिनि परतो ये स्यादय इति स्यसिचृतासयो विशेषिताः सीयुड् विशेषितः× तः॥ यथेच्छसि तथास्तु॥

येति भूयसामनुग्रहाय यद्यपि गौणार्थसंश्रयणमिति भावः सीयुड् विशेषित इति तत्र सीयुटः प्रत्ययैकदेशत्वात्समुदायावयवयोः पौर्वापर्याभावादागमेत्वप्र
जाते सागमकस्य प्रत्यया स्यादयः संज्ञाः अर्थाभिसंबंधश्च नन्तरवयवस्येति सीयुटो भावकर्मवाचिप्रत्ययपरत्वासंभवः समस्यावयवयोः पौर्वापर्यैऽतोऽनंतरं चिण्वद्भावः उ
भयथापि चिण्वद्भावोऽविशेषित इति तत्र न दोषोऽन्तरोपन्यासः किं तर्हि पक्षद्वयदोषोपसंहारः अन्यतरपक्षपरिग्रहे सर्वे विषयव्यापनादविशेषितश्चिण्वद्भाव इ

त्यर्थः॥ ॥ ॥

स्यादयोपीति स्याद्यनुवृत्तेरिदमेव प्रयोजनं भावकर्मणोः स्यादीनामप्यभिधेये यथा स्यातामिति यथा च द्वंद्वपदानि समस्येकं समुदायार्थे वाचीनि तथा स्यादयोल
देशात्सर्वभावकर्मणोःऽभिदधतीति न कश्चिद्दोषः भावकर्मवाचिनि सीयुटीति तत्राऽस्यायाश्रयणादेकं भावकर्मग्रहणमिच्छेन रूपेण यथासंभवं स्यादिभिः संबध्य
ते अथवा विषयसप्तम्येषाश्रीयते भावकर्मविषयेषु स्यादिषु चिण्वत्कार्यं भवतीति नास्ति दोषः स्यावकाशः कृस्यायविति स्यादीनामागमसंबंधेषु कृत्स्वपि

=भुतानांपक्षंतत्राभावेनागमित्वेप्रमाणाभावात्:१=

अस्तु तावद्भावकर्मणोर्ये स्यादय इति ननु चोक्तं सीयुट्विशेषितः स्यसिच्तासयो विशेषिता इति स्यसिच्तासय ख्व विशेषिताः कथं भावक
र्मणोर्ये कृ भवती यत्र स्या[stain]दयोप्यनुवर्त्स्यंते अथवा पुनरस्तु भावकर्मवाचिनि परतो ये स्यादय इति ननु चोक्तं स्यसिच्तासयो विशे
षिताः सीयुड्विशेषित इति सीयुड्विशेषितः कथं भावकर्मवाचिनि परतः सीयुट् नास्तीति कृत्वा भावकर्मवाचिनि सीयुटि कार्यं विज्ञास्यते अ
थ इट् चेत्युच्यते कस्मायमिड्भवति अंगस्येति वर्त्तते यद्येवमंगस्यादितइट् प्राप्नोति अउआद्भुत तद्यथा अडाटौ रित्वादादि नो भवतः
१ एवं तर्हि स्यादीनां भविष्यति॥ ॥श्री॥ ॥

=भुर्नोर्विनियोजकत्वाभावेप्रकरणस्यप्रयोजकत्वमाश्रित्येतिभावः।१=

देशात्प्रश्नः स एवाह अंगस्येति वर्त्तत इति प्रकरणस्य नियोजकत्वं चेदाश्रीयते तदा निष्ठप्रसंग इत्यर्थः अथवा अंगस्येति वर्त्तत इति सिद्धं तथादिवचनं अं
गस्य निमित्तं यत्तस्येडागम इत्यर्थः इतरथा त्वंगमेवानेनागमित्वेनोक्तमिति मत्वाह॥ यद्येवमिति॥ ॥श्री॥ ॥

षष्ठ्यभावादिति इच्छामात्रेण स्यादीनामागमित्वं त्वलभ्यमित्यर्थः ननु च भावकर्मणोरिति एषा षष्ठीति षष्ठीनिमित्तत्वात्षष्ठीत्युच्यते यथा न इल्लोदकं पादरोगः इह भावक
र्मवाचिनि परतो ये स्यादय इति शब्देन शब्दस्य पौर्वापर्यसंभवात्तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपतिष्ठत इत्यस्ति भावकर्मणोरित्यस्य षष्ठीसञ्ज्ञा न निमित्तभावः इत्य
स्य भावकर्मणोरित्यभिधेयसप्तमीमत्वाह नैषा षष्ठीति इतरः स्वाभिप्रायं प्रकाशयितुमाह एवं तर्हीति भावकर्मवाची प्रत्यय उपचाराद्भावकर्मशब्दवाच्यः परत्वेन सप्तम्या ३३३
प्रतिपादित इति सप्तमीसमाश्रित्य सीयुट् नास्ति तु इति सप्तम्याः कार्यातिदेशे च रितार्थायाः षष्ठी प्रकल्पयति चोदको यथोक्तमभिप्रायमप्रतिपद्याह न सिध्यती

=ननु सप्तमीनिर्देशसामर्थ्यात्षष्ठी प्रकल्पितिर्भवामरत्स आह कार्यातिदेश इति स्यादिषु परतो ऊत्यादीनां चिण्वत्कार्यं भवतीति पूर्ववाक्ये चरितार्था सप्तमीति भावः ।१२ =कथं पुनर्भावकर्मणोरित्यस्य षष्ठीनिमित्तत्वमत आह इतीति ॥=

एवमपि षष्ठ्यभावान्न प्राप्नोति ननु च भावकर्मणोरित्येषा षष्ठी नैषा षष्ठी किं तर्हि अर्थनिर्देशः एवासौ सप्तमी भावे चार्थे कर्मणि चेति एवं तर्हि भावकर्म
णोरित्येषा सप्तमी स्यादिष्विति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्येति एवमपि न सिध्यति किं कारणं न त्वर्थेन पौर्वापर्यमस्ति
अर्थे असंभवात् भावकर्मवाचिनि शब्दे कार्यं विज्ञास्यते एवमपि सीयुटो न प्राप्नोति एवं तर्हि सप्तमे योगविभागः करिष्यते आर्धधातुकस्येट् यावा
न्निणनामसस्य आर्धधातुकस्य भवतीति विज्ञेयम् ततो वलादेः वलादेरार्धधातुकस्येड् भवतीति ॥ ॥ ॥
वं१

ति तत्र हि निः शब्दस्य प्रयोजनं शब्दे सप्तमीनिर्दिष्टे परिभाषोपस्थानं यथा स्यादर्थे मा भूदिच्छब्दग्रहणात् बहिर्भूतोऽर्थस्तत्र बहिर्भूतः निःशब्दो बहिर्भाववाची पूर्वोक्ते नामि
प्रायेणाह अर्थेऽसंभवादिति एवमपीति न हि सीयुटो भावकर्मवाचिना प्रत्ययेन पौर्वापर्यमस्ति सीयुटस्तदवयवत्वात् आर्धधातुकस्येडिति परिभाषेयं क्रियतेऽन्य
त्रेड्विधीयते तत्रार्धधातुकैरिति उपतिष्ठते तेन स्यादीनामेव न तु सीयुटस्तामपि षष्ठीसञ्ज्ञा न विज्ञविष्यति रुदादिभ्यः सार्वधातुक इत्यत्र विपरीता आर्धधातुकस्येति नोपतिष्ठते ॥
स्ये

भा०कै०६ यद्येवमिति स्यादीनामागमविधावुपयोगात्पुनः श्रुतस्याभावाद्विशेषितः स्य एव इड्भावः आर्धधातुकग्रहणे त्वनुपतिष्ठमाने तेन स्यादीनां विशेषणाद्गागमसंबंधयोग्य
१६५ षष्ठ्यनुपादानादयमर्थः स्यात् अचहनग्रहदृशां वा चिण्वदिड्वा यत्र क्वचिद्यत्तु स्याद्यः संनिनेषामिडिति यथा कर्तुः कारक सलोपश्चेत्यत्रेति भावः स्यादीनेवेति
नेषामेवश्रुतत्वात्तत्सरिसागेन श्रुतकल्पनायाः प्रयुक्तत्वात्तस्यापेक्षत्वादंगस्येति सप्तमीनिर्दिष्टसामर्थ्याद्वा चिण्वदिड्भावे सर्वेषामुपयुक्तानां स्यादीनामार्धधा
तुकोपस्थानसामर्थ्यात्षष्ठ्यादितासंबंधः के पुनरिति सर्वेभ्य इष्यते न च प्राप्नोतीति मत्वा प्रश्नः स एव पराभिप्रायमाशंकते येऽनुदात्ता अथ ये उदात्तास्तेषां

यद्येवं स्य सिच्सीयुट्तासिषु इट् भवति चिण्वदिड्भावश्चाविशेषितो भवति तत्र को दोषः स्य सिच् सीयुट् तासिषु इट् भवति अचहनग्रहदृशां वा चि
ण्वदिति क्वचिदेव चिण्वदिड्भावः स्यात् एवं तर्हि स्यादीनेवापेक्षिष्यामहे स्य सिच् सीयुट् तासिष्विड्भवति अचहनग्रहदृशां वा चिण्वत्स्यादिष्विति के पु
नरिमे इडं प्रयोजयंति येऽनुदात्ताः अथ ये उदात्तास्तेषां कथं सिद्धं तेनैव परत्वादुदात्तेभ्योऽपि अनेनैव इडेषितव्यः किं प्रयोजनं कारयतेः कारिष्य
ते हारिष्यते इटोऽसिद्धत्वात् तोरनिटीति णिलोपो यथा स्यात् कथं पुनरिच्छता भवता उदात्तेभ्योऽनेनैवेट् लभ्यः न पुनरनेनाकृते नेति नैव स्याद्धि प्र

निषेधेन॥ ॥ ॥श्री॥

कथं सिद्धं तेनैव परत्वादिति किमेवं मन्यन्ते इत्यर्थः ततः सिद्धांतवाद्याह उदात्तेभ्योऽपीति अथवा शिष्याचार्यदेशीययोः के पुनरित्यादिके प्रश्नप्रतिवचने प
रत्वादिसंते आचार्य आह उदात्तेभ्योऽपीति उदात्तग्रहणं चोपलक्षणं स्वरूपेणो भयस्य अनुदात्तेभ्योऽपि द्विधानात् तुल्यत्वान्न्यायस्य तेभ्योऽप्यनेन द्विविधः इटो सिद्ध
त्वादिति ततश्चानिटीति प्रतिषेधाभावान्न सिध्यति णिलोपः अपि चेट् सन्नियोगेन विधीयमानश्चिण्वदिड्भावोऽपि भवति अन्यथैतदभावे चिण्वदिड्भावो न स्यात् सं राम०
नियोगशिष्टानामन्यतराभावे द्वितीयाभावात् अन्यथा चयेन विज्ञायमाने स्यादिष्विण्वदिड्भावः यथा कर्तुः कारक सलोपाभावेऽपि॥ ॥ ॥ १६५

नित्योयमिति वलादित्वानपेक्षणात् आकृतिपक्षेच शङ्कांतरमाशयापि नास्त्येनित्यत्वम् भावकर्मार्थापेक्षणादस्यवहिरंगत्वमितिचेत् तस्यापिवलादित्वापेक्षत्वात्
नास्त्यंतरंगत्वमित्यदोषः कानिपुनरिति प्रकरणाद्यवस्थाश्रयणादंगान्येव कार्याणिप्रयोजनान्यथाविशेषेणेतिप्रश्नः इतरेच्छणान्येवोदाहरति दृष्टिरिति विघाती

×पि॰नवस्मिन्कृते×

=इतरदिति॰प्रकरणाद्यवस्थाश्रीयते इत्यर्थः॰अन्यथापि॰णिट्यमानस्यातिदेशाकृतिणिजदेशात्आमिमुः॰घानिष्यते॰आपिष्यते॰अध्यापिष्यते॰१=

नित्योयं कृतेऽपितस्मिन्प्राप्नोत्यकृतेसप्राप्नोतिकिंकारणं अवलादित्वात्तस्मादनेनैवेड्बेषितव्यः कानिपुनरस्य [redacted] योगस्यप्रयोजनानि दृष्टि
श्विणावघुवृक्‌हंतेस्त्वघंत्वंदीर्घेच्छोक्तोयेमितांवाचिणीति दृष्टिः प्रयोजनं चेष्यते चायिष्यते पुक्‌प्रयोजनं स्नासते स्नायिष्यते हंतेस्त्वघत्वंप्रयो
जनंहनिष्यते घानिष्यते दीर्घेच्छोक्तोयेमितांवाचिणीति सचप्रयोजनं शमिष्यते शामिष्यते तमिष्यते तामिष्यते [redacted] इट्चासिद्धस्तेन
मेलुप्यते णिर्निमित्तश्चायंवल्निमित्तोविघाती इटोसिद्धत्वाणिरनिटीतिणिलोपोयथास्यात् कथमयंनित्यः कृताकृतप्रसंगित्वात् कृताकृतप्र
संगीत्ययंकृतेऽपितस्मिन्निरिसाप्नुमिके आर्धधातुकस्येड्वलादेरितिपुनरनेनायंभवति अस्मिंस्तुविहितेवलादित्वस्यनिमित्तस्यविहतत्वात्सा
प्नुमिकोनभवति निमित्तंविहतंभवति अयंतस्यनिमित्तंविहंतितस्मादयंनित्यः सत्वस्यनिमित्तंनविहंति अथोपदेशग्रहणंकिमर्थम्
चिणवद्भावउपदेशवचनं स्वकारगुणाबलीयस्त्वात् चिणवद्भावेउपदेशवचनंक्रियते स्वकारगुणस्यबलीयस्त्वात् कारिष्यते॥ ॥

ति अस्मिन्निरिसतिवलादिलक्षणस्येटोवलादित्वाभावादप्रवृत्तिलक्षणोविघातस्ततस्तस्यअनित्य [redacted] त्वमित्यर्थः अथयावल्निमित्तइड्विघातीत्य
स्येटोऽप्रतिबंधकइत्यर्थः स्वकारगुणस्येति अन्येषांतुगुणोऽजंतत्वंनविहंतीतिनित्यताचिणवद्भावः सिध्यतिचायिष्यतेलाविष्यते इतिभावः॥ ॥

भा०कै० ६ परत्वादिति द्वयोरपि नित्यत्वात् वधिभावादिति ननु चार्धधातुक इति विषयसप्तम्याश्रयणादंतरंगो वधिभावः नैतदस्ति लिङीति विशेषनिर्देशात्परसप्त
१६६ मीतद्विशेषणत्वादार्धधातुक इत्यपि परसप्तमीयत्र तु विशेषनिर्देशाभावोऽस्ते भूरित्यादौ तत्रैव विषयसप्तमीविज्ञानं भव्यादिसिध्यर्थं एकाच उपदेशेऽ
नुदात्तादिसूत्रे तु वक्ष्यति भाष्यकारः वधिषीष्टेत्यत्र निपातनस्वरं प्रत्ययस्वरो बाधिष्यते आर्धधातुकीयाः सामान्येन भवंतीत्येवं ब्रुवता लिङीति विषय
सप्तम्येवाभ्युपगता ततश्चांतरंगत्वाद्वधिभावः प्राप्नोति प्रतिपदविधेर्बलीयस्त्वान्न चिण्वद्भावो भवति हनिणिङादेशप्रतिषेधश्चेति लुङ्परे च्लि

परत्वाद्गुणोऽपरत्वे चानजंतत्वात् चिण्वद्भावो न प्राप्नोति उपदेशग्रहणाद्भवति वधिभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेन वधिभावात्सीयु
टि चिण्वद्भावो भवति विप्रतिषेधेन वधिभावस्यावकाशः वध्यात् वध्यास्तां वध्यासुः चिण्वद्भावस्यावकाशः घानिष्यते अघानिष्यत इहोभ
यं प्राप्नोति घानिषीष्ट घानिषीयास्तां चिण्वद्भावो भवति विप्रतिषेधेन अथेदानीं चिण्वद्भावे कृते पुनः प्रसंगविज्ञानाद्वधिभावः कस्मान्न
भवति सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति कृत्वा हनिणिङादेशप्रतिषेधश्च हनिणिङादेशानां प्रतिषेधो वक्तव्यः हनिष्यते
घानिष्यते एष्यते आयिष्यते अध्येष्यते अध्यायिष्यते लुङीति निर्हनिणिङादेशाः प्राप्नुवंति अंगस्येति नु प्रकरणाद्वांगशाखाद्वा निर्देशात्सि
द्धं अंगा पत्कार्यं तत्प्रतिनिर्दिश्यते नच हनिणिङादेशाः अंगा भवंति ॥ ॥ श्री ॥ ॥ ॥

र्धधातुके विधीयमाना हनिणिङादेशा अंगाणि निमित्ता भवंतीति चिण्वद्भावात्प्राप्नुवंति इह यस्य चिण्सा स्यात्तन्निमित्तं निर्दिष्टं तदप्यतिदिश्यते यथा युगा
गमः यस्यापि प्रकारांतरेण चितिनिमित्तं तदपि यथा वृद्धिरिति हनिणिङादेशप्रसंगः अंगस्येति तु प्रकरणादिति अंगस्येति तु प्रकृते सप्तकार्यं विहितं राम०
तदतिदिश्यते तस्यैव प्राकरणिकत्वात् नच हनिणिङादेशा अंगस्येति प्रकृत्य विहिता इति तेषामप्रसंगः ॥ ॥ श्री ॥ ॥ १६६

=येदाधिष्ठानतात्सत्त्वमस्येतिभावः। अजादेरिट्येऽज्ञादिप्रत्ययान्तर्गवादिति तात्पर्यं । इड्ग्रहणेन चागमस्य प्रत्ययस्य च सामान्येन ग्रहणं । २ = दासीयेति । दाधातोराशीर्लिङ्थ्यालमेनपदेऽन्नमपुरुषेसीयुट्चस्तादिदिड्संभवति । तस्य च क्ङित्वं नास्त्यार्धधातुकत्वं चा… भिचारी ति । ४ =

आतो इड्ग्रहणं किमर्थमिति इहापि चिक्लित्सार्धधातुक इति [redacted] त्रयाणां प्रकृतत्वात् द्विशेषणविशेष्यभावे च कामचारात् तेषामन्यतमेनानुभूतविशेषणे नानन्युभूतविशेषणे नत्वा इटः समुच्चये संभवात् नेकपक्षसंभवः तत्र यदित्वाविद्विशेषणसंबन्धात् प्रागेवेट् समुच्चीयते अंगाधिकारात्तस्मिन् प्रत्ययविशेषणाच्चाजादौ प्रत्यये इति विज्ञायते त त्रेड्ग्रहणमनजाद्यर्थं विज्ञायते अजादेरिटोऽजादित्वात्प्रत्ययेन समुच्चयाभावात्तदा क्ङिदार्धधातुके जादेरेव विशेषणे व्यवृतिष्ठेते नेटः हलादेरिटः क्ङित्वासंभ वादार्धधातुकत्वव्यभिचाराभावाच्च ततश्च दासीयेत्यादावाल्लोपप्रसंगः अथाजादेः प्रत्ययस्य क्ङिदार्धधातुकाभ्यां विशेषणं प्राप्तं संबन्धः पश्चादित्यासमुच्च यत्तदा ऽयमर्थः अजादौ क्ङित्सार्धधातुके इटि चाकारलोप इति तदेड्ग्रहणमनजाद्यर्थं अक्ङिदर्थं अनार्धधातुकार्थं च भवतीति दासीयपयिथपप्रसर इति

=दानेलङिःकर्तरिकर्मव्यतिहार…

=आतो लोप इटि च इड्ग्रहणं किमर्थं इड्ग्रहणमक्ङिदर्थं इड्ग्रहणं क्रियते अक्ङितिलोपो यथा स्यात् पपिथ तस्थियेति॥ सार्वधातुके चादीत्यार्धधातुकाधिकार उपसंख्यानं सार्वधातुके चादीत्यार्द्धधातुकाधिकाराद्दुपसंख्यानं कर्तव्यम्॥ ॥श्री॥ ॥

सर्वत्रेघाल्लोपः प्राप्नोति अथ क्ङितानन्युभूतविशेषणो नेट् समुच्चीयते तदा ह्यार्धधातुक इति विशेषणद्वयमविशेषात् द्वावपि क्ङिदिटावुपनिपततीति अक्ङिदर्थमेवेड्ग्र हणं विज्ञायते तेन न पपिथेत्यादावाल्लोपो भवति दासीय व्यसर इत्सन जादौ सार्वधातुके च न भवति अनुभूतविशेषणाद्द्वयसंबन्धे न तु क्ङितेटः समुच्चये पूर्ववत्सर्वत्रेघा ल्लोप[redacted] प्रसंगः अथ लार्धधातुके नानन्युभूतविशेष णोनेटः समुच्चयः आर्धधातुके चेटि चेति तदा सार्वधातुकार्थमिड्ग्रहणं विज्ञायते इति व्यसर इत्यादावाल्लोपप्रसंगः तदापि क्ङितीति विशेषणाद्वयमार्धधातुकस्यैव स्यात् न लिटः सार्वधातुकत्वेऽपि ल्लाजादित्वाव्यभिचारात् अनुभूतविशेषणो नार्धधातुके नेटः समुच्चये सर्वत्रेघाल्लोपः प्रसंगः तदेवमनेकपक्षसंभवात् प्रश्नः इतरः

१ क्ङितानन्युभूतविशेषणे नेटः समुच्चयं पश्चाद्द्वयोरपि विशेषणद्वयसंबन्धमाश्रित्याह इड्ग्रहणमक्ङिदर्थमिति॥ ॥

आदीति दाञः केवला दाङ् पूर्वो वा छंदसि लुङ् लङ् लिट इति लुङ् लङोरन्यतरः केचिदत्र पदकारा आ अदीस वग्र हं त्विति केचिच्चै कपद्यं मन्यंते तेषां आडागम इति पक्षः न च लुङि लेमें त्रे घसे ति लुङ् लङि तु छांदसत्वाच्छपो लुक् श्लौ वा सति द्विर्वचन प्रकरणे छंदसि वेति वक्तव्यमिति द्विर्वचनाभावः सिद्धं तेत्वार्ध धातुकत्वाच्छबभावः दासीयेति इटः सीयुटि तस्य तङ्युक्तत्वादजादित्वाभावः घुमा ईत्व इति वकारस्य निमित्त भावेन प्रतिषेधो वकारप्रतिषेधः वकारादा

= एवं च क्ङिति लस्यैटः सार्वधातुके संभवान्न तदर्थमिदं ग्रहणं ३ =

= उत्तमपुरुषैकवचने इडिकारः ३ =

इषमूर्जमहमित आदीति ननु यथैव क्ङितीति वर्त्तमाने इड्ग्रहणमक्ङिदर्थमेवमार्द्धधातुक इत्यपि वर्त्तमाने इड्ग्रहणं सार्वधातुकार्थं भवि ष्यति न सिध्यति किं कारणं न हि क्ङितात्र विशेष्यते अचि भवति कस्मिन्क्ङितीति किं तर्हि अचाक्ङिद्विशेष्यते क्ङिति भवति कस्मिन्न चीति किं पुनः कारणं अचाक्ङिद्विशेष्यते यथा इड्ग्रहणेन विशेष्येत अस्ति चेदानीं क्वचिदिडजादिः यदर्थो विधिः स्यात् अस्तीत्या ह दासीय धासीयेति तत्तर्हि उपसंख्यानं कर्त्तव्यं आर्धधातुकत्वात्सिद्धं कथं आर्धधातुकत्वं उभयथा छंदसीति वचनात् अन्येऽपि हि धातुप्रत्यय उभयथा छंदसि दृश्यंते घुमास्थागा ईत्वे वकारप्रतिषेधो घृतं घृतपावान इति दर्शनात् ईत्वे वकारप्रतिषेधो वक्तव्यः किं प्र योजनं घृतं घृतपावान इति दर्शनात् इहमाभूत् घृतं घृतपावानः पिबत वसां वसपावानः पिबतेति यदि तर्हि वकारे प्रतिषेध उच्यते कथं धीवरी पीवरी धीवरी पीवरीति चोक्तं किमुक्तं नेतद्धीत्वं किं तर्हि ध्याप्योरेतत्संप्रसारणमिति स तर्हि प्रतिषेधो वक्तव्यः न वक्तव्यः ॥ ॥

कर्त्तव्यं न ४

वीत्वं न भवतीत्यर्थः घृतपावान इति आतो मनिन्निति क्वनिप् वसपावान इति ङ्याप्योः संज्ञाछंदसोर्वहुलमिति वसाशब्दस्य ह्रस्वः धीवरीति चोक्तमिति जनसनखनां सञ्झलोरित्यत्रोक्तं ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥ आम० १६७

वनिवेष इति क्ङिति मुखंदसि दृष्टानुविधानान्न भविष्यति भाषायामपि अन्येभ्योपि दृश्यत इति दृशिग्रहणात्प्रयोगानुसरणार्थात्प्रयोगाभावात्पादिभ्यो नास्ति क्ङिवितिभा
ष्यकारस्याभिप्रायः तत्र वार्त्तिकारंभो ज्यायानित्याहुः छंदःकवेति क्विपि संछा इस त्रैत्वस्माद् श्नात् भाष्यकारमते न त्वीत्वं प्राप्नोति प्रसयलक्षणेन यथात् शोदि सत्रे माग
मः नमाङ्योगे कृस्मायमिति यदि क्यो रडाटोरिहानुवृत्त्यामप्रतिषेधस्ततो जादीनामट् अपि प्राप्नोति अथानंतर्योराटः प्रतिषेधः तथा सति माङ्योगे निष्पाणोप्य ट्प्रा
प्नोतीति मत्वा प्रश्नः स एवानंतर्यमाश्रित्याह आटः प्राप्नोतीति इतरः समुदायापेक्षायां दोषाभावे पि स्वरितत्वादधिकारे विशेषप्रतिविधानसंभवादाह न कृत्स्य
मिति अट् अपि प्राप्नोतीति अडाटोर्युगपदेकाप्यपेक्षायां आदित्वं न संभवतीति पर्यायप्रसंगो [redacted] पथा लेटोडाटोः ततः पक्षे आरिरसे क्षिप्र इत्यादि न सिध्यति।

वनिवेष भविष्यतिन क्ङिविति नमाङ्योगे कृस्मायं प्रतिषेधः आटः प्राप्नोति अटोपि लिख्यते नतत्र्यंटोग्रहणं कृत्स्यं न कृत्स्यं प्रकृतमनुवर्त्त
ते कृस्मकृतं लुङ्लङ्लृङ्क्ष्वडुदात्त इति यदि तदनुवर्त्तेत आट् जादीनामट् चेत्स्यत् अपि प्राप्नोति अस्तु अडिकृते पुनराट् भविष्यति इहापि अडिकृ
ते पुनराट् प्राप्नोति अकार्षीत् अहार्षीत् अट्वचनान्न भविष्यति इहापि तर्हि अट्वचनान्न स्यात् ऐहिष्ट ऐक्षिष्ट ॥ ॥

एक्षिष्टे साध्यनिष्टं प्राप्नोति इतरस्तु विकल्पेनाप्य डाटोः प्रवृत्तौ पक्षे परार्थे कृतेप्यपि शाब्दांतरत्वान्निमित्तसद्भावाच्चाटाभवितव्यं इति मत्वाह अस्त्विति इतरो यद्येकस्मिन्ना
गमे कृते परस्य प्रवृत्तिस्ततो हलादीनामप्यटि कृते आट्प्रसंग इति मत्वाह इहापीति ननु च आटि कर्त्तव्ये टोसिद्धत्वाद जादित्वाभावः यद्यपि शास्त्रापेक्षयासिद्धत्वं तथा
पि प्रयोगरूपमाश्रित्य चोद्यते यथोक्तं मार्थादीहाद्यर्थानामिति परिहारांतरसद्भावाद्वासिद्धत्वं नोक्तं अट्वचनादिति यदि हलादीनामप्यटि कृते आट् स्यात्तदा लुङ्
लङ्लृङ्क्ष्वडागममेव विदध्यात् इहापि तर्हि यद्यटि कृते आट् न भवति ततोऽत्रापि न स्यात्॥ ॥श्री॥ ॥७॥ ॥

भा० कै० ६
१६८

आर्द्धवचनादिति यथा एस्यात् द्विर्वचनमनर्थकं स्यादिसर्थः ॥ ननु विकल्पितत्वादट् आटोः अटु भाव आट् कर्त्तव्य इति अटि सति तिन प्राप्नोति नैष दोषः उत्तरार्थेन
नौत्तरीयकोपस्थानेन प्रवर्त्तनेनाप्यटाबाधितुमाटो ग्रहणत्वात् अथवा संदिग्ध प्रवृत्तिरनागमोः संदिग्ध प्रवृत्तिना आटा बाध्यत इत्येष वाक्यार्थः यथान्यत्रोक्तं
अन्यवचनाच्चकाराकरणात्प्रकृतस्याप्यवाद्यौयथोत्सर्गेणाप्रसक्तस्येति इतरस्त्वगृहीताभिप्रायो विशेषाभावं मत्वाह इहापि तर्हि इति अकृत अटीति
अजादिग्रहणसामर्थ्यात् कृते द्यादिसर्वस्याजादित्वादटो प्रथमे देन विधानसामर्थ्याद्विषयविभागावसायो हलादीनां अड् वाजादीनां कृतेः कृतेवा घा
आड्वचनाद्भविष्यति इहापि तर्हि आड्वचनात् प्राप्नोति अकार्षीत् अहार्षीत् अकृते अटियोः जादिरिसेवमेतद्विज्ञास्यते किं वक्तव्यमेतत्
नहि कथं अनुच्यमानं गंस्यते आड्वचनसामर्थ्यात् यदि हि कृते टियोः जादिस्तत्र स्यात् आड्वचनमनर्थकं स्यात् अथवोपदेश इति वर्तते अ
थवा आर्धधातुक इति वर्त्तते अथवा लुङ्लङ्लृङ्क्षु इति लकारको निर्देशः लुङादिषु लकारादिषु योः जादिरिति सर्वथा ऐज्यत औप्यत इति
न सिध्यति एवं तर्हि अजादीनामटा सिद्धम् अजादीनामटैव सिद्धं नार्थ आटा एवं तर्हि वध्यर्थं विति चेद् टः अटो वृद्धिं वक्ष्यामि यदि त
र्हि अटो वृद्धिरित्युच्यते अस्वपो हसती स्य त्र वृद्धिं प्राप्नोति ऐहिलेक्षते धातोर्वृद्धिमटः स्मरेत् धाताव टो वृद्धिं वक्ष्यामि तत्र हि धातुग्रहणं कर्त्तव्यं
। नकर्त्तव्यं योगविभागः करिष्यते अटः अचि वृद्धिर्भवति ततः उपसर्गादृति वृद्धिर्भवति ततो धातो [redacted] धाताविस्युभयोः शेषः ॥

इति अथवेति उपदेशे यान्यजादीनि तेषामाडुच्यति नचकरोतिरूपदेश्योः जादिरिति आड् भावः अथवार्धधातुक इति वर्त्तत इति तेनार्धधातुकसंज्ञकलका
रे सति कालेयोः जादिस्तस्याड्भवति सर्वथेति करोतीत्याव घ्यजादीनामटि सत्याड्भावादित्यर्थः असिद्धवदत्राभादि सत्वा सिद्धत्वप्रसाध्यानायस्यैवेया मीप्र
कारा उक्ता इह तु स्थितएवासिद्धत्व एषामुपन्यासः अस्वप इति स्वपेर्लङ्सिप अडाग्मगात्वयोरिसट्या पलुकृस कारस्य रुत्वमहशिचेत्युत्वं तत्राटुण्यो
ऐधिलावृद्धिः प्राप्नोति ॥ ॥

राम० १६८

आटीदिति नेटीतिवद्वृद्धिप्रतिषिद्धायां परत्वाद्वृद्धिं बाधित्वा पररूपं प्राप्नोति पररूपं गुणे नाट इति आट उत्तरे गुणे पररूपं नेति वक्तव्यमित्यर्थः ओमाङोश्च सिनत्समम् इति

औंकारीयदौटीयदौस्त्रीयदित्यत्र वृद्धिं बाधित्वा ओमाङोश्चेत्यपवादत्वादिति पररूपं प्राप्नोति तस्य प्रतिषेधो वक्तव्य इत्युक्तम् यद्यानुपूर्व्या पररूपविधौ नाट इत्युच्यते तदा ओमा

ङ्श्चुश्चाटः पररूपप्रतिषेधो न वक्तव्य [redacted] [redacted] इति तुल्यमेतद्भवति न तु गौर

परता

इह तर्हि आटीत् आशीत् अतो गुणे इति पररूपं प्राप्नोति पररूपं गुणे नाटः आटो नेतिवक्ष्यामि तत्र हि वक्तव्यं न वक्तव्यं ओमाङोश्च सिनत्समं यद्य

प्येतदुच्यते अथ वैतर्हि उस्योमाङ्क्ष्वाटः पररूपप्रतिषेधश्चोदितः स न वक्तव्यो भवति छंदोर्थं तर्हि आङ्वक्तव्यः आरेगुक्तस्मात्रितरेनमायुन

क् ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः छंदोर्थं बहुलं तदीर्घः छंदसि बहुलं दृश्यते नद्यथापूर्वो नारक इति एवं

तर्हि आयन् आसन् इणस्त्योर्यणलोपयोः कृतयोरनजादित्वाद्वृद्धिं प्राप्नोति इणस्त्योरंतरंगतः अंतरंगत्वाद्वृद्धिर्भविष्यति तस्मान्नार्थः आट्

ग्रहणेन अजादीनामटाविद्धं वृध्यर्थमिति चेदटः अस्तपोहस्तीमत्र धातोर्वृद्धिमटः स्मरेत् पररूपं गुणे नाटः ओमाङोश्च सिनत्समं छंदोर्थं बहुलं

दीर्घ इणस्त्योरंतरंगतः अचि श्नु इयङादिप्रकरणे तन्वादीनां छंदसि बहुलं इयङादिप्रकरणे तन्वादीनां छंदसि बहुलमुपसंख्यानं कर्तव्यं॥०॥

वर्णसंगः अंतरंगत्वादिति यणलोपौ वहिरंगौ वृद्धौ कृतायामिणो यणादेशे नियोगविभागाश्रयणात् यणो भावः रूपाश्रयणादंतादिवद्भावोपि नास्ति नारूप्यानति

देशात् श्नसोरल्लोप इति न परकरणाल्लोपाभावः एतच्च वार्णादांगं बलीय इत्यनाश्रित्योक्तं तदाश्रये वृद्धिं बाधित्वा यणलोपौ स्यातां अप्राप्तसिद्धे आड्वचनमेवज्ञा

पकं अन्ये वर्णयंति भवत्येषा परिभाषा वार्णादांगं बलीय इति तस्यां हि सत्यां यणलोपयोर्वृद्धिं बाधित्वा प्रवृत्तयोरासन्नायन् इति न स्यात् द्विधीयते अचि॥०॥

दिया

तन्वमिति वाऽऽऽइसीत्यधिकारादमिपूर्वत्वाभावाद्यणादेशः तनुवमिति अधातुत्वादप्राप्त उवङ् विधीयते विष्वमिति विसृत इति सत्सूद्विषेति क्विप् अत्र नि
त्यमोः सुपीति यणि प्राप्ते पक्षे उवङ् विधीयते सुवर्गमिति अधातुत्वादनंगत्वाच्चाप्राप्त उवङ् विधीयते एरनेकाचः आसस्य नियाविति असेभ्योपि दृश्यत इति
ताडील्यादिषु [redacted] निरुपपदः क्विप् ततः कर्मणा संबंधः सत्यपि वा पूर्वं कर्मणा संबंधे परत्वात्सोपपदं सत्सूद्विषेति क्विपं बाधित्वा ताच्छीलिकः क्विप् भवति

तन्वंपुषेम· तनुवंपुषेम· १

विष्वंपश्य विषुवंपश्य स्वर्गंलोकं सुवर्गंलोकं त्र्यंबकं यजामहे त्रियंबकं यजामहे एरनेकाचो इह कस्मान्न भवति आसस्य नियौ ब्रा
ह्मणस्य नियु इति अंगाधिकारादंगस्येति वर्तते एवमपि परमनियौ परमनियः इत्यत्रापि प्राप्नोति गतिकारकपूर्वस्येति वक्ष्यते यणादेशः
स्वरपदपूर्वोपधस्य च यणादेशः स्वरपूर्वोपधस्य पदस्यावयवो धस्येति वक्तव्यं स्वरपूर्वा च यस्योपधा पदपूर्वा च स्वरपूर्वा निन्यतुं निन्युः पर
पूर्वा उन्न्यौ उन्न्यः उग्न्यौ उग्न्यः उभयपूर्वा ग्रामण्यौ ग्रामण्यः सेनान्यौ सेनान्य इति असंयोगपूर्वस्येत्यनिष्टप्रसंगः असंयोगपूर्वस्येत्युच्यमा
ने अनिष्टं प्रसज्येत उन्न्यौ उन्न्यः उग्न्यौ उग्न्यः असंयोगपूर्वस्येति प्रतिषेधः प्रसज्येत तत्रा हि वक्तव्यं न वक्तव्यं धातोरिति वर्तते धा
तुना संयोगं विशेषयिष्यामः धातोर्यः संयोगस्तत्पूर्वस्यनेति उपसर्जनं वै संयोगः न चोपसर्जनस्य विशेषणमस्ति धातोरित्यनु

१ वर्तनसामर्थ्यादुपसर्जनस्यापि विशेषणं भविष्यति॥ ॥

गतिकारकपूर्वस्येति परमशब्दोऽत्र न गतिर्न च कारकं किं तर्हि उत्तरपदार्थस्य समानाधिकरणं विशेषणं उद्धाविति भावे कर्तरि वात्र क्विप् रकारः संयोगपू
र्वः धातोरिति अविद्यमानधात्ववयवसंयोगपूर्वस्य यणित्यर्थः उपसर्जनमिति अन्यपदार्थं प्रति न चोपसर्जनस्येति संबंधविशेषाद् उपसर्जनं पदांतर
वाच्ये नार्थे न संबंधं नोपैतीत्यर्थः॥ ॥श्री॥ ॥श्री॥ ॥७॥ ॥

दत्य· १

अस्यान्यदिति गुणप्रधानसन्निधौ प्रधानस्य ससर्थित्वे विशेषणसंबंधेन भाव्यं मनर्थित्वे प्रधानस्य गुणो विशेषणेन संबध्यते यद्य धातोरिति यथा कुमार्यो
वितिननु च मण्णी पाणी इत्यादौ अ धातोः पूर्वस्य वर्णे बाधनार्थो यणमा भूदिति धातुने वर्णस्य विशेषणे प्रयोजनमस्ति एवं तर्हि इयङ् बाधनार्थत्वाद्यणादे

=इयङ्बाधनार्थत्वादिति उत्सर्गसमानदेशा अपवादा इति न्यायादिति भावः। नन्वायं न्यायः अमम ऋज्ज्वकुपुष्यभिश्च दिनः। नेपुमित्येन भाकुटे इति पदेन च पुरस्तादिति न्यायेन चान ह्यप्रत्र तथाकल्प्य मेमानाभावात्। ११=

अस्यान्यत् धातोरित्यनुवृत्तौ प्रयोजनं किं इवर्णविशेष्यते नैतदस्ति प्रयोजनं यद्य धातोरिवर्णो भवति त्वमेव तस्य यणादेशेन इको यणचीति वर्षाभ्व
श्च वर्षाभूपुनर्भूश्च वर्षाभूइत्यत्र पुनर्भूश्चेति वक्तव्यं पुनर्भ्वौ पुनर्भ्वः इति अपरस्त्वमिदमुच्यते वर्षादृन्कारपुनः पूर्वस्य भुव इति वक्तव्ये वर्षा
भ्वौ वर्षाभ्वः दृन्भ्वौ दृन्भ्वः कारभ्वौ कारभ्वः पुनर्भ्वौ पुनर्भ्वः रुश्नुवोः सार्वधातुके रुश्नुग्रहणानर्थकं अन्यस्याभावात् रुश्नुग्रहणमन
र्थकं किं कारणं अन्यस्याभावात् नह्यन्यत्सार्वधातुके अस्ति यस्य यणादेशः स्यात् ननु चायमस्ति यातिवातीति क्रितीत्यनुवर्त्तते इहतर्हि
यानः वात इति अचीति वर्तते इहतर्हि यातिवांतीति धोरिति वर्त्तते एवमपि धियंति पियंति अत्र प्राप्नोति ओरिति वर्त्तते एवमपि सुवंति
रुवंतीत्यत्र प्राप्नोति अनेकाजिति वर्त्तते एवमपि अयुवन् अरुवन् इत्यत्रापि प्राप्नोति एतदप्युटोसिद्धत्वादेकाज्भवति एवमपि प्रोर्णुवं
तीत्यत्रापि प्राप्नोति असंयोगपूर्वस्येत्यनुवर्त्तते यङ्लुगर्थं तर्हि रुश्नुग्रहणं कर्तव्यं यङ्लुगंतमनेकाजसंयोगपूर्वमुवर्णांतमस्ति
तदर्थमिदं युवंयो युवतीनां वृषभ्रुवनु रोरुवतीनां यङ्लुगर्थमिति चेत् न च किं कारणं आर्धधातुकत्वात् सिद्धं कथमार्धधातुकत्वम् उभ
११ यथा छंदसीति वचनात् अन्येपि हि धातुप्रत्ययाः छंदस्युभयथा दृश्यंत इति॥०॥
शस्य धातोरियङ् प्रसंगाद्धातुनिवृत्त्यर्थो धातुग्रहणानुवृत्ति
र्न भवति वर्षाभ्वश्च वर्षासु भवति वर्षा वाभवते प्राप्नोतीति वर्षाभूरोषधि विशेषः दृन्भूशब्दः दृदृन्भू इति निपातितः अत्र तु भूशब्दस्यानर्थकत्वान्न भूसुधियोरित्य
११ त्र ग्रहणाभावाद्यणादेशः सिद्धः रुश्नुवोः अधिकारानुवृत्तिसामर्थ्यादतिप्रसंगाभावं मत्वाह रुश्नुग्रहण

भाषायामपीति ततो यङ्लुङ्विवसर्थे ऊ्ग्रुग्रहणमर्थवत् उडुपक्रिमर्थमिति लघुं विहाय निर्देशं कस्मात्कौरवमाश्रितमिति प्रश्नः गोहिग्रहणमिति कृतगु
णस्योत्वं यथा स्यादकृतगुणस्य मा भूदित्येवमर्थमित्यर्थः अयादेशप्रतिषेधार्थं चेति गुणे कृते तस्य स्थाने उत्वे कृते सत्यूत्वस्यासिद्धत्वेन लघूपधत्वादुत्तरेण भवति न
तु लघूपधत्वादितित्वप्ययादेशो न भवति गुहइति तु निर्देशे क्रियमाणे नित्यत्वात् द्विर्वचनाद्गुणमुकारस्य स्थाने उकारः प्राप्नोति तस्य चासिद्धत्वाल्लघूपधो उत्तरेण

×एवं तर्हि सिद्धे सति यङ्लुग्ग्रहणं करोति तज्ज्ञापयत्याचार्यः×१

भाषायामपि यङ्लुङ्भवतीति किमेतत्स्य ज्ञापने प्रयोजनं बेभिदीति चेच्छिदीतीत्येतत्सिद्धं भवति भाषायामपीति उडुपधाया गोहः किमर्थं
गुहेर्विकृतस्य ग्रहणं क्रियते न गुह इत्येवोच्येत गोहिग्रहणं विषयार्थं गोहिग्रहणं क्रियते विषयार्थं विषयः प्रतिनिर्दिश्यते यत्रास्यैतद्रूपं
उ तत्र यथा स्यादिह मा भूत् निजुगुहतुः निजुगुहुरिति अयादेशप्रतिषेधार्थं च अयादेशप्रतिषेधार्थं च विकृतग्रहणं क्रियते ह्रस्वादेशे त्वया
देशप्रसंगः उत्वस्यासिद्धत्वात् ह्रस्वादेशे हि सति अयादेशः प्रसज्येत । प्रतिगूह्य गतः उपगूह्य गत इति किं कारणं मूत्वस्यासिद्धत्वात् असि
द्धं ऊत्वं तस्यासिद्धत्वात्पिलघूपधोदित्ययादेशः प्रसज्येत विषयार्थे न तावन्नार्थो गोहिग्रहणेन प्रश्लिष्टनिर्देशात्सिद्धं प्रश्लिष्टनि
र्देशोयं ऊउत् उदिति तत्र ह्रस्वस्यावकाशः निजुगुहतुः निजुगुहुः गुणस्यावकाशः निगोढा निगोढुं इहोभयं प्राप्नोति ॥ ॥

भवतीत्ययादेशः स्यात् ऊउत् उदिति ह्रस्वदीर्घावादेशौ सूत्रे निर्दिश्येते तत्र स्थानेन्तरतमपरिभाषावशाद्ध्रस्वस्य ह्रस्वः दीर्घस्य दीर्घः निजुगुहतुरिति अत्र किलाडुण
प्रतिषेधादुकारस्यादेश उकारः निगोढेति अचीत्यधिकाराद्धकारस्यात्राप्रसंगः ॥ ॥श्री॥ ॥श्री॥ ॥७॥

निगूहयतीति उकारस्य गुणाभ्युपगमे प्राप्नोत्यूकारश्च तत्र परत्वाद्गुणे कृते एकदेशविकृतस्यानन्यत्वादूकार आदेश इति नार्थो विकृतनिर्देशेन दोषो णाविति तत्र तु लघूपदेशे न वृषणादूकारो ऽपेक्ष्यते ननु ह्रस्व इति तत्रापि न दोषः चिण्णमुलोर्दीर्घो ऽन्यतरस्यामिति चिण्णमुल्परे णौ मितां ग्लानां वा दीर्घ उच्यते तत्र यदा णौ ना घट इ. ताच्च णिच्चि धीयते तदा पूर्वं णावि चायरकारेण च व्यवधानाद्दीर्घो न प्राप्नोतीति वचनं प्रयोजितवानिति यद्यपि चित्रविषयं कर्मप्रदर्शनी

निगूहयतिनिगूहकः साधुनिगूही परत्वाद्गुणे कृते ऽन्तरतमत्वाद्दीर्घो भवति अयादेशप्रतिषेधार्थं न चापि नार्थः समानाश्रयवचनात्सिद्धं भवति व्याश्रयं चैतत् णावूठ्येणोऽल्यप्ययादेश इति दोषो णौ किमर्थं दुषेर्विकृतस्य ग्रहणं क्रियते न दुषइ सेवो च्यते तद्दोषिग्रहणे च किं अयादेशप्रतिषेधार्थं विकृतग्रहणं क्रियते ह्रस्वादेशे ह्ययादेशप्रसङ्गः दुलस्यासिद्धत्वात् ह्रस्वादेशे हि सति अयादेशः प्रसज्येत प्रदूष्यगतः किं कारणं दुलस्यासिद्धत्वात् असिद्धभूतत्वेनस्यासिद्धत्वात्स्यपित्वघुपूर्वादिस्यादेशः प्रसज्येत समानाश्रयवचनात्सिद्धमित्येव समानाश्रयमसिद्धं व्याश्रयं चैतत् णावूठ्वे णोऽल्यप्ययादेश इति चिण्णमुलोर्दीर्घो ऽन्यतरस्यां चिण्णमुलोर्णिज्यव्येतानां यङ्लोपे च चिण्णमुलोर्णिज्यव्येतानां यङ्लोपे चोपसंख्यानं कर्त्तव्यं शमयन्तं प्रयोजितवान् अशशमि अशशामि शशमं शशामं शामंशामं शंशमयतेः अशंशमि अशंशामि शंशमं शंशामं शंशामं शंशामं किं पुनः कारणं न सिध्यति चिण्णमुल्परे णौ मितां अङ्गानां दीर्घो भवतीत्युच्यते यश्चात्र णिः चिण्णमुल्परः न तस्मिन्निङ्गं यस्मिं

यं तथापि णिजुत्पत्तये हेतुमाप्यादेशेनार्थं कर्तुरुपादानं न त्वत्र कर्त्ता विवक्षितः शंशामयतेरिति शमेर्यङि नुगतो ऽनुनासिकान्तस्येति नुकि कृते शंशम्य शब्दात् णिचि अल्लोपयलोपौ लोपे कृते इति यद्यपि परस्या णिचो लोपस्तथापि प्रत्ययलक्षणेन भूतपूर्वगत्या वा चिण्णमुल्परोऽस्ति ॥ ॥

[illegible]

=ननु णपांतमत्वेऽपि दीर्घसमिते नस्थानिवदित्यस्य समाश्रयणेन दीर्घस्य...

भा०कै०६
१७१

दीर्घे विधिं प्रति नेति एतदेव हि दीर्घग्रहणस्य प्रयोजनं स्थानिवत्वप्रतिषेधो यथा स्यात् यदि तु प्रकृतो ह्रस्वो विकल्प्येत तदा णेर्णिलोपस्य स्थानिवत्वाद्विकल्पो ह्रस्वस्य न स्यात् यङ्कारलोपस्य स्थानिवद्भावान्निसंह्रस्वः श्रूयेत हेडेवेष्टन इत्यस्य च ह्रस्वाभाव पक्षे अहेडीति स्यात् दीर्घे तु ह्रस्वस्य कृते अहीडिदिति सिध्यति अंतरंगत्व लक्षणत्वादि ति णियङ्लोपो णिमात्रापेक्षत्वादंतरंगः दीर्घस्तु चिण्णमुल्परणपेक्षत्वाद्बहिरंग इति समानाश्रयत्वाभावादसिद्धत्वाभाव इत्यर्थः छादेः अद्विप्रभृत्युपसर्गस्ये ति वक्तव्यमिति इह संख्यांतरोपजने आश्रयाऽविनाशेऽपि पूर्वसंख्याविनाशान्न द्वाविति शब्दप्रवृत्तिरिति भावः यत्र त्रिप्रभृतय इति वस्तुसद्भावमाश्रित्य पी

दीर्घे विधिं प्रति न स्थानिवदिति एवमप्यसिद्धत्वान्न प्राप्नोति एवं तर्हि चिण्णमुलोर्णिज्यवेतानां यङ्लोपे चांतरंगत्व लक्षणत्वात्सिद्धं किमिदमंतरं गलक्षणत्वादिति यावत् ब्रूयात्समानाश्रयवचनं नास्ति इमिति व्याश्रयं चैतत् कथं णौ णिलोपः णौ चिण्णमुल्परे मितां मगणानां दीर्घत्वं तस्मा न्नार्थ उपसंख्यानेनेति छादेर्घे अद्विप्रभृत्युपसर्गस्येति वक्तव्यं इहापि यथा स्यात् समुपाभिछादः तत्तर्हि वक्तव्यं न वक्तव्यं यत्र त्रिप्रभृतयः सं ति द्वावपि तत्र स्तः तत्राद्व्युपसर्गस्येत्येव सिद्धं [redacted] नवै एष लोके संप्रत्ययः नहि द्विपुत्र आनीयतामित्युक्ते त्रिपुत्र आनीयते तस्माद् द्विप्रभृत्युपसर्गस्येति वक्तव्यम् घसिभसोर्हे हल्ग्रहणमर्थकं अन्यत्रापि दर्शनात्॥ ॥ ॥

हारः अद्व्युपसर्गस्येति च प्रसज्यप्रतिषेधो वा कर्मभेदेनाश्रीयते पर्युदासाश्रयणे ह्युपसर्गस्य ह्रस्वो न स्यात् न वै एष इति संख्याशब्दानामेष स्वभावो यत्संख्यांतरस्य उपजनस्य गौणस्य मुख्यस्य वा विषये न प्रवर्त्तंते तथा चोक्तं मेकाजनेकाज्ग्रहणेषु चावृत्तिसंख्या नास्तिद्धमिति नैवेयमिति चपूर्वे विधिग्रहणस्य प्रत्युदाहरणमुपन्यस्तम् स्थानिव द्भावे सति अच्त्वात् अच्त्वाभावान्न तदाश्रयो ढ्ङ् स्यादिति घसि अचीत्यधिकारात् लिनप्राप्नोतीति हल्ग्रहणं क्रियते तदुपादाने वा चिन प्राप्नोतीति च कारो चसंबंधार्थः एम०
क्रियते तत्राज्ग्रहणस्येहानधिकारादेव सर्वत्र लोपः सिध्यतीति हलि चेति न वक्तव्यम्॥ ॥श्री॥ ॥७॥ ॥ १७१

=ननु निर्दिष्टग्रहणं किमर्थं ... ॥ =ननु द्वयोरन्यतरस्य विधानार्थयोः पंचम्येव प्रकल्पिका कुतः सप्तम्याह ... अनुगुणत्वात्प्रतिपत्तिगौरवाभावात् ... ॥ =

अत्रापीति वचनाद्वृत्तिककारस्य कारं न पपाठेति लक्ष्यते वक्ष्यतीति एकवचने प्राप्ते व्यत्ययेन किं स्लौ द्विर्वचनं अदभ्यस्तादित्यदादेशः उपधालोपः खरि चेति चर्त्वं अत्र चांतरंगत्वादुपधालोपात्पूर्वं द्विर्वचनं क्रियते यदि तु आदेव लोपः पूर्वं स्यात्ततो द्विर्वचनं न स्यात् रुरुदिहीति आर्द्धातरंगत्वादुभयोरप्यनित्यत्वादिति कृते पुनः प्रसंगविज्ञानात् धित्वप्रसंगः अथ वेति यद्यपि सप्तम्यर्थचरितार्थात्तथापि दुरुत्ल्यइत्यनया पंचम्या अचरितार्थया हेरिस्येतदनुगुणा षष्ठी प्रकल्प्यते ननु षष्ठी प्रकल्प्यतां तदादिविधेरभावः यस्मिन्विधिस्तदादावल्ग्रहणा इति ह्युच्यते नैष दोषः हल्ग्रहणानुवृत्तिसामर्थ्यात् हलंतत्वासं

हल्ग्रहणमनर्थकं किं कारणं अन्यत्रापि दर्शनात् अन्यत्रापि हिलोपो दृश्यते अग्निर्वेनानिवप्स्यति शसावेवप्स्यतीति रुरुदल्भ्यो हेर्धिः इटः प्रतिषेधो वक्तव्यः रुदिहि स्वपिहि रुल इति धित्वं प्राप्नोति हेर्धित्वे हलधिकारादिटो प्रतिषेधः हेर्धित्वे हलधिकारादिटो प्रतिषेधो नर्थकः प्रतिषेधो प्रतिषेधः धित्वं कस्मान्न भवति हलधिकारात् प्रकृतं हल्ग्रहणं अनुवर्त्तते क प्रकृतं [redacted] घसिभसोर्हलीति तद्वै सप्तमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः तद्वैतत्प्रसमाख्यायते प्रसमाख्याते सत्यघयाविभक्त्या निर्दिश्यमानमर्थवद्भवति तया निर्दिष्टमिहानुवर्त्तते अथवा रुदल्भ्य इत्येषा पंचमी हलीति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति अथवा निर्दिश्यमानस्यादेशा भवंतीत्येवं न भविष्यति यस्ता हि निर्दिश्यते तस्य कस्मान्न भवति इटा व्यवहितत्वात् ॥ ॥ ॥

भवाच्च तदादिविधिर्विज्ञास्यते अथवेति यत्षष्ठ्या निर्दिश्यते तस्यैवादेशः सागमकस्त्वागमानामव्यभिचारात्छब्दांतरे श्रूयमाणे प्रतीयते ननूच्चार्यत इति तस्यादेशाभावः यस्ता हीति आगमं विहाय हि शब्दस्यादेशो भवत्वित्यर्थः इटेति तस्मादित्युत्तरस्येति वचनादनंतरस्यैव षष्ठ्याकार्येण भाव्यं तत्त्रयो निर्दिष्टो नासावनंतरो षष्ठ्यानंतरः सागमको नासौ निर्दिष्ट इति धित्वाभावः ॥ ॥श्री॥ ॥०॥ ॥०॥ ॥

=ननु सागमो निर्दिश्यत एव ... सागमकत्वमिति प्रतीयते ... इति पदं ... ॥ =

यद्येवमिति यदि निर्दिश्यमानस्यादेशास्तदाऽकृचि कृते शब्दांतरत्वाद्धित्वाप्रसंगः धित्वे कृतेऽकृजिति पुनः प्रसंगविज्ञानाश्रयणात् नैद्यमन्यथात्ताताद्यर्थो दगतिः अथवाऽत्र
स्ताताद्यर्थापेक्षत्वाद्बहिरंगोऽकृजिति पूर्वं धित्वं पश्चादकृच् अथवेति इकारेणागंतुना हेरिति निर्देशः हकारमात्रं तु स्थानित्वेन निर्दिश्यते एवं धिरिति धकारमात्रमादेश
ः इकारस्तूच्चारणार्थो व्यंजनस्य स्वररहितस्योच्चारयितुमशक्यत्वात् ततश्च हेरिदीत्सत्र हकारस्येटाव्यवधानाद्धकाराभावः स हि समुदायभक्तत्वान्नमेव न व्यवदध्यात् ॥

=पुनः प्रसंगविज्ञानाभ्रमलोहेऽत्र भाष्ये महीकिः ॥=

यद्येवं भिंधकीत्यत्र धित्वं न प्राप्नोति एवं तर्हि धित्वे कृतेऽकज्भविष्यति इदमिह संप्रधार्यं धित्वं क्रियतामकृजिति किमत्र कर्तव्यं परत्वाद्धित्वं नि
२ त्योऽकं कृतेपि धित्वे प्राप्नोत्यकृतेपि अकजप्यनित्यः अन्यस्य कृते धित्वे प्राप्नोत्यन्यस्याकृते शब्दांतरस्य च प्राप्नुवन्विधिरनित्यो भवतीति उभयोरनि
त्ययोः परत्वाद्धित्वं धित्वे कृतेऽकज्भविष्यति अथवा हकारस्यैवैतद्ग्रहणं जिनेकारेण ग्रहणमिति चिणोलुक् चिणोलुकि तग्रहणं कर्तव्यं इह
मा भूत् अकारितरां अहारितरामिति चिणोलुकि तग्रहणमनर्थकं संघातस्याप्रत्ययत्वात् चिणोलुकि तग्रहणमनर्थकं संघातस्य लु
क् कस्मान्न भवति संघातस्याप्रत्ययत्वात् प्रत्ययस्य लुक्श्लुलुपो भवंतीत्युच्यते न च संघातः प्रत्ययः ॥ ॥ ॥

वयं तु व्यवदधात्येव तथा भिंधकीत्यत्र सत्यपि पूर्वं अकचि हकारस्य धकारे कृते रूपं सिध्यति चिणोलुक् त ग्रहणमिति इदमस्मिन्न सिद्धमिति भेदनिबंध
नत्वाद्विषयविषयिभावस्य चिणोलुगिति स्थस्य लक्षणस्य भेदाभावादकारितरामित्यत्र लोपस्याप्रसिद्धत्वाभावात्तरपोपि लुक्प्राप्नोति एवं सति प्रत्ययत्रया राम०
त्मकस्य समुदायस्य तु लुक्प्रसंगः इतरः स्त्रयुगपत्प्रत्ययत्रयस्य तु लुक्प्रसंगो नेनोक्तः इति मत्वाह चिणोलुकीति ॥ ×अंततश्रामोपि× ॥श्री॥ १७२

इतरः स्वाभिप्रायं प्रकाशयति तल्लोप इति तल्लोपस्य चासिद्धत्वादिति प्रतिलक्ष्यं लक्षणभेदादिति विषयविषयिभावः अभेदपक्षमाश्रित्याह कार्ये कृतत्वाद्धेति
एकस्मिन्विषये सकृत्प्रवृत्तस्य लक्षणस्य चरितार्थत्वात्पुनः प्रवृत्त्यभावः तद्यथेति यथैकस्मिन्वसन्ते अग्न्याधानं कृत्वा वसन्तान्तरे ब्राह्मणोऽग्न्याधानं न कुरुते शास्त्र
स्यानुष्ठितत्वात् तथैकस्य प्रत्ययस्य लुकि कृते प्रत्ययान्तरस्यान्तरवादे लुक् न प्रवर्त्तते युक्तं यत्र सैवेति इहाभिन्नरूपमपि फलभेदाद्भिन्नमुच्यते अ
ग्न्याधानं तु कर्मान्तरेषु क्रतुयोग्यतोत्पादनार्थमिति फलभेदाभावात्पुनर्न क्रियते काम्यानां तु कर्मणां फलभेदात्पुनरनुष्ठानं भवति तथेहापि प्रत्ययस्य लुकि

तल्लोपे तर्हि कृते परस्य प्राप्नोति तल्लोपस्य चासिद्धत्वादसिद्धस्तल्लोपः तस्यासिद्धत्वान्न भविष्यति कार्ये कृतत्वाद्वा अथवा कृतत्वाद्गुणो लुगिति
कृत्वा पुनर्न भविष्यति ॥ तद्यथा वसन्ते ब्राह्मणोऽग्नीनादधीतेति सकृदाधाय कृतः शास्त्रार्थ इति कृत्वा पुनः प्रवृत्तिर्न भवति विषम उपन्यासः यु
क्तं यत्र सैव पुनः प्रवृत्तिर्न स्यात् यत्तु तदाश्रयं प्राप्नोति न तच्छक्यं बाधितुम् तद्यथा वसन्ते ब्राह्मणोऽग्निष्टोमादिभिः क्रतुभिर्यजेतेति अ
मित्र ग्न्याधाननिमित्तं वसन्ते वसन्ते इज्यते तस्मात्पूर्वोक्त एवैव परिहारो अथवा क्ङितीति वर्तते क्ङित्प्रकृतं गमहनजनखनघसां लोपः क्ङित्यनङीति
न द्वै तत्र सप्तमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः चिण इत्येषा पञ्चमी क्ङितीति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति उतश्च प्रत्ययाद
संयोगपूर्वात् कथमिदं विज्ञायते उकारान्तात्प्रत्ययादिति आहोस्विदुकारान्तात्प्रत्ययादिति किं चातः यदि विज्ञायते उकारात्प्रत्ययादिति सिद्धं
" तनु कुरु चिनु स्तनु इति न सिध्यति अथ विज्ञायते ॥

=सर्वोत्तरप्रात्यत्कृत्यभेदादितिभावः ॥२= तस्मादिति-तस्मत्वं अमित्रलंबा-२=

कृते तरवादे लुक् प्रसंगः अग्न्याधाननिमित्तमस्येति बहुव्रीहिः क्रियाविशेषणं चैतत् अनाहिताग्नेरनधिकाराद् अग्न्याधाननिमित्तत्वं यागस्योच्यते उतश्च क =
थमिति उतः प्रत्ययादिति अनयोर्विशेषणविशेष्यभावे कामचारात् यदोकारः प्रत्ययेन विशेष्यते तदा तदन्तविधिरभावात् उकारान्तात्प्रत्ययादिति पक्षो व्यवतिष्ठते उकारस्य वि =
शेष्यत्वात्तेन तदन्तता न संभवतीति यदा तु उकारः प्रत्ययान्तो यदा पुनः विशेष्यते उकारेण प्रत्ययो न तदन्तता आश्रीयते प्रत्ययस्य तस्मात् लक्ष्यद्वयेऽपि दोषदर्शनात्से ३६

तथेति तदंतपक्षेऽयं दोषः आद्यंते तु पक्षे उकारस्याप्रत्ययत्वात् कुक्प्रसंग एवात्र नास्तीति दोषाभावः ननूकारान्तप्रत्ययादिति विज्ञायमाने उकारस्य प्रत्ययस्य सं
योगपूर्वत्वासंभवाद् असंयोगपूर्वग्रहणं किमर्थं स्यात् उच्यते अंगविशेषणं स्यात् तथा च क्षिणु इत्यत्र न स्यादित्ययमपि दोषो वक्तव्यः तदंतविधिनेति न
नूकारस्य विशेष्यत्वात् कथं तदंतविधिः विशेषणत्वान्नु तदंतविधौ वक्ष्यमाणलक्षणादस्य भेदेन प्राप्नोति एवं तर्हि तंत्रेण सूत्रद्वयमुपगम्यते तदुच्यते त

उकारांतात्प्रत्ययादिति सिद्धं चिनुस्तनु तनु कुर्विति न सिध्यति तथा असंयोगपूर्वग्रहणेन इहैव पर्युदासः स्यात् अक्ष्णुहि तक्ष्णु
हि आप्नुहि शक्नुहीत्यत्र न स्यात् यथेच्छसि तथास्तु अस्तु तावदुकारान्तप्रत्ययादिति कथं चिनुस्तुन्विति तदंतविधिना भविष्यति अथवा
दे२ पुनस्तूकारांतात्प्रत्ययादिति कथं तनु कुरु व्यपदेशिवद्भावेन भविष्यति यदप्युच्यते तथा असंयोगपूर्वग्रहणेन इहैव पर्युदासः स्यात् अ यो२
क्ष्णुहि तक्ष्णुहि आप्नुहि शक्नुहीत्यत्र न स्यात् इति नास्माभिरसंयोगपूर्वग्रहणेनोकारान्तं विशेष्यते किं तर्हि उकारो विशेष्यते उ
कारो योऽसंयोगपूर्वस्तदंतात्प्रत्ययादिति उतश्च प्रत्ययाच्छंदो वा वचनं उतश्च प्रत्ययादित्यत्र छंदसि वेति वक्तव्यं अदक्षिणतनु
हि यातुजूनां धिनुहि यज्ञं धिनुहि यज्ञपतिं तेन माभागिनं कृणुहि उत्तरार्थं च केचिंतावदाहुः॥ ॥श्री॥

नैकस्मिन्सूत्रे प्रत्यये नोकारो विशेष्यते द्वितीये तूकारेण प्रत्यय इति दोषाभावः व्यपदेशिवद्भावेनेति आद्यंतवदेकस्मिन्निति सनेनेत्यर्थः किं तर्हि उकारो
विशेष्यते इति ननूकारस्य संज्ञात्वात् संज्ञिपरतंत्रत्वात् प्रधानस्य कथं विशेषणेन संबंधः नैष दोषः यावदस्य विशेषणत्वं न विवृत्तं तावत्संज्ञात्वं नास्तीति त्र राम०
प्राधान्याभावः तत्रासंयोगपूर्व उकारः प्रत्ययस्य विशेषणमिति विशेषणेन संबंधमनुभूय संज्ञात्वमुकारो लभते॥ ॥श्री॥ ॥ १७३

=तदंतस्येत्यर्थः। संज्ञिनि तदंते परतंत्रत्वाद् विशेषणत्वात् २= सत्त्वमनेत्यपदेशिवद्भावेनासीत्तव आद्यंतवदेकस्मिन्निति ३=

छंदोग्रहणमिति नित्यं करोतेरित्युक्तं वाक्यभेदेन छंदसि वेति संबध्यते अत उत् सार्वधातुके इति किमर्थमिति सत्यपि सार्वधातुकग्रहणे स्यांतस्य निवृत्त्यर्थोऽवग्रहं कर्त्तव्यो
यत्न इति तेनैव यत्नेनार्धधातुके न भविष्यतीति भावः स्यांतस्येति इह सार्वधातुके विकरणे कृते तेन व्यवधानात्सार्वधातुके परतः करोतेरित्यस्यार्थस्यासंभवात्सार्वधातु

=इत्येतत् तत्र च छंदोग्रहणमेव कार्यं तत्र वाक्यभेदेन छंदसि विकल्पविधानार्थं नित्यस्य कर्त्तव्ये विधानादिति भावः ॥२८

छंदोग्रहणं कर्त्तव्यमिति अपर आहुः वावचनं कर्त्तव्यमिति लोपश्चास्यान्यतरस्यामित्यत्रान्यतरस्यां ग्रहणं न कर्त्तव्यं भवति अत उत्सार्वे सार्वधा
तुक इति किमर्थं इह माभूत् संचस्करतुः संचस्करुरिति स्यांतस्य प्रतिषेधो वक्तव्यः करिष्यति करिष्यते ह्रस्व उत्व उकारांतनिर्देशात् स्यांतस्याप्रतिषे
धः अनर्थकः प्रतिषेधोऽप्रतिषेधः उत्वं कस्मान्न भवति उकारांतनिर्देशात् अशक्यः करोतावुकारांतनिर्देशस्तत्राश्रयितुं इह संपरिभ्यां भूषणस
मवाययोः करोताविति इहैव स्यात् संस्करोति संस्कर्त्ता संस्कर्त्तुमित्यत्र न स्यात् न ब्रूमः स्यादुकारांतनिर्देशाद्योयं करोतेरिति किं तर्हि उकार प्र
करणादुकारांतमंगमभिसंबध्यते उत इति वर्त्तते यद्येवं नार्थः सार्वधातुकग्रहणेन कस्मान्न भवति संचस्करतुः संचस्करुरिति उत इति
वर्त्तते उत्तरार्थं तर्हि सार्वधातुकग्रहणं कर्त्तव्यं। श्नसोरल्लोप इति श्नः सार्वधातुक एवास्तेरार्धधातुके भूभावेन भवितव्यं। उत्तरार्थमेव तर्हि
९श्नाभ्यस्तयोरात इति आ सार्वधातुक एव॥ ॥ ॥

के परतो यदंगं तदवयवस्य करोतेरित्याश्रयणीयं एवं च स्यांतस्यापि प्राप्नोतीति स्यग्रहणमुपलक्षणं तासं तस्यापि प्रसंगात् ह्रस्व उत्व इति उत इत्यस्यानुवर्त्तनादिति भावः
इतरस्तु करोतेरित्युकारनिर्देशाश्रयेणानेनोक्तं इति मत्वाह अशक्य इति उत इति वर्त्तते इति तेनोकारांतस्यांगस्यावयवस्य करोतेरत उत्सार्वधातुके क्ङिति भवती
९तिसूत्रार्थः संपद्यते॥ ॥

अभ्यस्तमपीति यत्र नेष्यते लोप इति भावः यत्रलक्तितत्र भवस्येव लोपः यथा तुर्ययुरिति यायावर इति ननु चातो लोपस्य स्थानिवद्भावात्प्राप्नोति द्वर्द्धकारलोपे वृद्धेरजादेशस्य स्थानिवत्त्वं निषिध्यते यदि चात्र अभ्यस्तयोरात इत्याल्लोपः स्यात्स्थानिवत्त्वनिषेधो नर्थकः स्यात् ईहल्यघोरिती त्वमत्र प्राप्नोतीति चेद्
दृश्यस्येव तत्प्राप्तिमितिव दृश्यमाणाद्देशाभावः एवं तर्हि भाष्यकार आल्लोपप्राप्तिमभ्युपेत्य परिहारान्तरमाह नैतदाकारान्तमिति यायइति हि स्थितेस्यपदं तस्य प्र

अभ्यस्तमप्याकारान्तमार्धधातुके नास्ति ननु चेदमस्ति अप्सु यायावरः प्रवपेत पिण्डानिति नैतदाकारान्तं किं तर्हि यकारान्तमेतत् उत्तरार्थमेव तर्हि ईहल्यघोरिति तत्रापि श्नाभ्यस्तयोरित्येव अतोप्युत्तरार्थमेव तर्हि इद्दरिद्रस्येति दरिद्रस्येतद्दरिद्राते रार्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति अतोप्युत्तरार्थमियोन्यतरस्याम् अभ्यस्तस्येत्येव अतोप्युत्तरार्थमेव तर्हि जहातेश्च अभ्यस्तस्येत्येव अतोप्युत्तरार्थमा च हौ हाविस्युच्यते अभ्यस्तस्येत्येव अतोप्युत्तरार्थमेव लोपोपि अभ्यस्तस्येत्येव अतोप्युत्तरार्थमेव घ्वसोरेद्धावभ्यासलोपश्च हाविस्युच्यते तदेव तर्हि प्रयोजनं श्नसोरल्लोप इति ननु चोक्तं श्नः सार्वधातुक एव अस्तेरप्यार्धधातुके भूभावेन भवितव्यमिति अनुप्रयोगे तु भुवात्स्य बाधनं स्मरन्ति कृञ्चानुप्रयुज्यते लिटीति अनुप्रयोगे तु भूभावे नास्तेर्बाधनमिष्यते ईहामासतुः ईहामासुः किं च स्यादेवात्र लोपः स्याल्लोपे द्विर्वचना
= [illegible] = ९ सिद्धिः लोपे कृते नच कृतत्वात् द्विर्वचनं न स्यात् स्थानिवत्त्वाद्भविष्यति॥ ॥
= [illegible]
घ्यमस्यैकाचो द्विर्वचनमिति याय इत्यस्य द्विर्वचनं ततो यायाय इत्यभ्यस्तमाकारान्तं न भवति ननु यायाय् शब्दस्याभ्यस्तसंज्ञायां यलोपे कृते भवस्येवावशिष्टस्याभ्यस्तसंज्ञा एवं तर्हि धुपदेश ग्रहणानुवृत्त्या उपदेशे य आकारान्तमभ्यस्तं तस्याल्लोपो न तु कृते यलोप इति मत्वा परिहार उक्तः अभ्यस्तस्येत्येवेति ननु च बिभीवानित्यत्रापि प्राप्नोति एवं तर्हि छान्दसः क्वसुरिति भाष्यकारस्य दर्शनं छन्दसि च दृष्टमनुविधीयते॥ ॥ श्री॥ ॥०॥ ॥

कृते द्वित्वे लोपः प्राप्नोतीति ननु च नियतकालत्वात् स्थानिवद्भावस्य कृते द्विर्वचने लक्षणस्य प्रवृत्तिनिमित्तं तरेणास्तत एवादेशरूपमवतिष्ठते इति कथं लोपप्राप्तिः उच्यते पुनः प्रवृत्तिर्लक्षणस्येति स्थानिवद्भावप्रकरणोपन्तिपादितम् अस्तु तर्हीति अनंत्यविकारेंत्यसदेशस्येति वचनात् अथवा क्रियमनंतरस्याकारस्य लोपः तत्र येन नाप्राप्ति न्यायेन ... बाधा नमित्येकवर्णव्यवहितस्य लोपः दीर्घत्वमिति अत आदेरित्यनेन प्रसंगत्वादिति वर्णाश्रयत्वात्परूपमंतरंगं तत्र कृते अप्लो पे च सत्युं सुरिति प्राप्नोति दीर्घत्व

=अपातिदेशइति भावः।२८=

स्थानिवदिति चेत् कृते भवेत् द्वित्वे स्थानिवदिति चेत् कृते द्वित्वे लोपः प्राप्नोति अस्तु तर्हि परस्य लोपः अभ्यासस्याकारस्य दीर्घत्वं भविष्यति नैवं सिध्यति कस्मात् प्रसंगत्वाद्भवेद्धि पररूपं नैवं सिध्यति कस्मात्प्रसंगत्वात् पररूपं प्राप्नोति तस्मिंश्च कृते लोपः पररूपे च कृते लोपः प्राप्नोति दीर्घत्वं बाधकं भवेत् तत्र अत आदेरिति दीर्घत्वं बाधकं भविष्यति इदं तर्हि प्रयोजनं सार्वधातुके भूतपूर्वमात्रे पियया स्यात् कुरु इति श्नसोरल्लोपः अथ आत्वपरकरणं किमर्थम् इह मा भूत् आस्तां आसन् नैतदस्ति प्रयोजनम् आटोः सिद्धत्वाद्भविष्यति इद् दरिद्रस्य दरिद्रातेरार्धधातुके लोपः दरिद्रातेरार्धधातुके लोपो वक्तव्यः सिद्धश्च प्रत्ययविधौ स च सिद्धः प्रत्ययविधौ किं प्रयोजनं दरिद्रातीति दरिद्र॥ ॥

मिति येन नाप्राप्तिन्यायेन पररूपं बाधित्वा दीर्घत्वं भविष्यतीत्यर्थः कुर्विति अत्र नलुमतांगस्येति प्रत्ययलक्षणप्रतिषेधादुत्वं नस्यादिति भूतपूर्वगत्या सार्वधातुकग्रहणाद्भवति श्नसोरल्लोपः आस्तामिति लङ् तां अ लोपे च कृते तस्यासिद्धत्वादाट् नैतदस्तीति अत्र प्रत्याख्यानं तपरकरणं परस्तानुज्ञापकत्वमस्य वक्ष्यते श्नसोर ... त्वेतकारेण ज्ञाप्यते त्वेत्यशासनमिति इद् दरिद्रस्य सिद्धश्चेति आर्धधातुके इति विषयसप्तमीत्यर्थः॥ ॥श्री॥ ॥

=पररूपं बाधित्वेति। आतनुदिसार्धे पररूपे प्राप्ते आनंतेइस्यावैस्वगुणो प्राप्ते दीर्घ आरभ्यमाणे बाध्यसामान्यचिंतयागुणम्येव पररूपस्यापि बाधकइति भावः।२८=

भा० कै० ६
१७५

आकारांतलक्षणा इति यथा धेधातुक इति परसप्तमी स्यात्तदा दरिद्रातीति दरिद्र इति रूपा यथा धेति णेः कृते द्वयोरनित्ययोः परत्वाद्युक्स्यात् लोपस्य शब्दांतरप्राप्त्या
नित्यत्वं युक्कृतलोपे कृते नेः प्राप्त्यानित्यत्वं अथाकृतिपक्षे नित्यत्वादाल्लोपस्तथाप्यदरिद्र इत्यत्र अचकावशकाविति संतोदात्तत्वं न स्यात् इवद्दरिद्रमिति आतो युजि
ति युच् प्रसज्येत दिद्दरिद्रासतीति न नियतिदरिद्राणामुपसंख्यानमिति व्यवच्छित्तविभाषा विज्ञानाल्लोपपक्षे इडागमः लोपाभावपक्षे त्विडभावः अदरि

=आमिति दरिद्रातेरार्धधातुके लोपो वक्तव्य इति लोपस्य युक शर्त्यः ... धातो इत्यासेतिः अकातेयुक्ताकारस्य रातेयुकिविशिष्टस्य ... दरिद्राग्रहणेन इट्प्रसङ्गः णयधकारस्य ... प्राप्नोतीत्यर्थः ... =नुडः संज्ञा ... १८=

आकारांतलक्षणः प्रत्ययविधिर्मा भूदिति न दरिद्रायके लोपो दरिद्राणे च नेष्यते दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा अद्यतन्यां वा अ
द्यतन्यां वेति वक्तव्यम् अदरिद्रीत् अदरिद्रासीत् अत एकहल्मध्ये नादेशादेर्लिटि णाकारेकारादेरेत्त्ववचनं लिटि णाकारककारादेरेत्वं लिटीति
वक्तव्यम् नेमतुः नेमुः सेहे सेहाते सेहिरे किं पुनः कारणं न सिध्यति अनादेशादेरिति प्रतिषेधः प्राप्नोति तत्तर्हि वक्तव्यं न वक्तव्यं लिटा
आदेशादिं विशेषयिष्यामः लिटि य आदेशादिस्तदादेर्नेति अथ तस्य ह्रिट्ग्रहणे [redacted] प्रयोजनं किं इहमाभूत् पक्ता पक्तुम् ने
तदस्ति प्रयोजनं किं तीति वर्त्तते एवमपि पक्कः पक्ववानिति अत्र प्राप्नोति अभ्यासलोपसंनियोगेन एत्त्वमुच्यते न चात्राभ्यासलोपं
पश्यामः एवमपि पापच्यते अत्र प्राप्नोति दीर्घत्वमत्र बाधकं भविष्यति॥ ॥श्री॥ ॥

द्रासीदिति यमरमेत्यत्रैकाच इत्यधिकारादेकाचः सगिटाविस्येकीयमतमित्यनेकाचोऽपि भवतः चिणि अदरिद्रि अदरिद्रायि इति भवति अत एकहल् लिटि
यत्रादेशादिरिति नत्वसत्वयोर्नैमित्तिकत्वाल्लिणिनिमित्तत्वाभावः अभ्यासलोपसंनियोगेनेति अभ्यासलोपश्चेति चशब्दः समुच्चये न त्वन्वाचये दीर्घत्वमत्रेति
अभ्यासविकारेषु बाधका न बाधंतरस्येत्युपयन्त्र सर्वेषां प्रवृत्तिस्तत्राश्रीयते यद्यपि कृते दीर्घत्वे एत्त्वाभ्यासलोपप्रसंगस्तथाप्येत्वाभ्यासलोपयोः कृतयो रामे०
॥ दीर्घत्वाप्रसंग इति विरुद्धत्वाद् बाधकत्वाभावः॥ ॥श्री॥ १७५

=इसेत लिटि सर्वेषां प्रवृत्तसाम्यचाविशेषस्त्वायं भ्यायोभ्यापादनर्नीत्याद्यधुरदले कृतादयः क्रियंते इत्युविशेषाधर्व्यं भ्यायोनेतिभावः। तमेव विशेषं दर्शयति यद्यपीति १९=

नाप्राप्ते इति क्वचिद्ध्रस्वः क्वचिद्दत्वादि विशेषश्च प्राप्नोति ज्येष्ठमध्यमकनीयांस इति मध्यमापेक्षयोत्सर्गे सम्प्रकर्षे सद्भावात्कनीयानुत्सर्गोऽल्पतरदेशत्वार्थे मध्यमोयः कस्यचिद्बाधकः कस्यचिद्बाध्यः ज्येष्ठोयो बाधकस्सापि बाधकः असिद्धत्वादिति पूर्वत्रासिद्धमिति लक्षणेन चकारात् तुरित्यादावेव तु प्रतिषेधः स्यात् पेचतुरिति प्रकृति

=तत्र दीर्घस्यावकाशोऽपाप्यर्थं तेएत्वस्य पेचतुरिति पापप्यत त्रत्यनो भयप्राप्तौ दीर्घत्वेनायं विधिर्बाध्यते इति भावः ।१९= =ननु विनाबाधं ज्येष्ठत्वादिकं न सम्भवतीत आह मध्यमेति प्रकर्षोऽदुर्बलत्वरूप बाध्यत्वमात्रकृतः ।२०= × च रांप्रकृतिच रः प्रकृतिज शांप्रकृति ×

नाप्राप्ते अभ्यासविकारेष्वत्वमारभ्य ते तद्यथा असावन्यान् अभ्यासविकारान्बाधते एवं दीर्घत्वमपि बाधेत सत्यमेवमेतत् अभ्यासविकारेष्वपि तु ज्ये
ष्ठमध्यमकनीयांसः प्रकारा भवन्ति तत्र ह्रस्वत्वादिशेषा उत्सर्गो तयो दीर्घत्वमपवादः एत्वं च अपवादविप्रतिषेधाद्दीर्घत्वं भविष्यति इहतर्हि ब =अनोदेशादिरिसत्वं निषेधत्व
भणतुः बभणुः इत्यभ्यासादेशस्यासिद्धत्वादेत्वं प्राप्नोति फलिभजिग्रहणं तु ज्ञापकम् अभ्यासादेशासिद्धत्वस्य यदयं फलिभज्योर्ग्रहणं करोति तत =त्वीतिनिषेधेन्ति प्राप्नुवाति यत्नेन =अमेयभ्यासिरत्वं देशादेरत्वकि २२=
ज्ञापयत्याचार्यः अभ्यासादेशः सिद्ध एत्व इति यद्येवं प्रथमततीयादीनामादेशादित्वादेत्वाभावः प्रथमततीयादीनामपि तद्धि देशादित्वा
देत्वं न प्राप्नोति पेचतुः पेचुः देभतुः देभुः न वा शसिदद्योः प्रतिषेधो ज्ञापको रूपाभेदस्यैत्वविज्ञानस्य न वा एष दोषः किं कारणं शसिदद्योः प्र
तिषेधो ज्ञापको रूपाभेदे एत्वविज्ञानस्य यदयं शसिदद्योः प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः रूपाभेदेन ये आदेशादयः न तेभ्यः प्रतिषेधो भ
वतीति देभे एत्वं वक्तव्यम् देभतुः देभुः किं पुनः कारणं न सिध्यति नलोपस्यासिद्धत्वात् असिद्धो नलोपस्तस्यासिद्धत्वादेत्वं न प्राप्नोति नशि
१९ मन्योरलिघेत्वं । नशिमन्योरलिट्येत्वं वक्तव्यम् ॥ ॥ ॥

=रेत्वमिति अत्र जयत्वचर्त्वेन न्लोः आवादिति भावः ।१= रकृतत्वमेत्वनेनोल्लोतस्यानेकाल्त्वमपि नियमस्यातिवातिमाहरंमकृति ।२=

जशादस्यादेशादित्वम् वचनं तु रेणतुर्येमतुरित्यादौ सावकाशं अभ्यासे चर्चेति जश्त्वचर्त्वे प्राप्नयोः स्थानेऽन्तरतम इति परिभाषाया व्यापारदर्शनमिदं प्रकृ
तिचरां प्रकृतिचरः प्रकृतिजशां प्रकृतिजश इति ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

=अतएवानुकृ॰३=

भा॰कै॰६ अनेशमिति लुङ् मिपोम् भावः पुषादित्वादङ् आदेशः छंदसीति पूर्वेणापि सर्वं धातुभ्यो याभेत्वाभावः एवं तु मेनकेस्यपि भाषायाम् प्राप्नोति यदि लिष्यते पृषोदरा

१७६ दित्वाद्भविष्यति मेनेणशिषिचेति वुन्प्रत्ययः नयासयोरिस्वाशिषि चोपसंख्यानमिती त्वाभावः व्योमानमिति विपूर्वादमतेस्ताछील्यादिषु चानश् छंदसः प्रा

पोलुक् पेचिरन्निति पचेरन्निति प्राप्ते छांदसे एत्वहूस्वले क्रियेते आयेजे इति लङ् इट् शप् छंदस्यपि दृश्यत इति आट् देभ एत्वमलक्षणमिति लक्षणे

न न प्राप्नोति न लोपस्य असिद्धत्वादित्यर्थः असोरत्व इति अतिद्धत्वस्य अनित्यत्वज्ञापनायतकारः कृतः नित्ये त्वसिद्धे आसन्निपाते आदेशसिद्धत्वात् लोपे

न भविष्यतीति किं तन्निवृत्यर्थेन तकारेण तेनासिद्धत्वस्याभावादेभ एत्वं सिध्यतीत्यर्थः थलिच सेटि थलग्रहणमिति क्ङिति सेटि एत्वस्य सिद्धत्वात्सेट्ग्रहण

छंदस्यमिपच्योरपि छंदसि अमिपचोरपीति वक्तव्यम् किं प्रयोजनम् अनेशम्मेनकेसेतत् व्योमानं लिङि पेचिरन् यजायेजे वपावेये यज

आयेजे वप आवेपे देभ एत्वमलक्षणम् असिद्धत्वान्न लोपस्य देभ एत्वं न सिध्यति असोरत्वे तकारेणाज्ञायते त्वेत्व शासनम् अनित्यो यं विधि

रिति थलि च सेटि थलग्रहणं किमर्थम् थलग्रहणम् क्ङिदर्थं थलग्रहणं क्रियते अक्ङिदर्थमक्ङिति एत्वं यथा स्यात् पेचिथ शेकिथ नै

तदस्ति प्रयोजनम् सेट्ग्रहणमेव अत्र अक्ङिदर्थं भविष्यति इदं तर्हि प्रयोजनम् समुच्चयो यथा स्यात् थलि च सेटि क्ङिति च सेटि इति किं

प्रयोजनं पेचिव पेचिम तत्र पचादिभ्य इडुवचनमिति वक्ष्यति तन्न वक्तव्यं भवति इहकस्मान्न भवति॥ =ननु कादित्वस्य नियमार्थत्वेन पेचिवेत्यादावपि इटः सिद्धत्वात्किमनेन वचनेन=

मेवा क्ङिदर्थं भविष्यति थलेव च सेट् क्ङि दिति प्रश्नः क्ङिति च सेटीति यथा पेचिव पेचिमेति इदं वचनं नियमार्थं सेट्येव क्ङितीति नियमे हि पेचतुरित्यादौ न स्यात् किं तर्थे

त्वस्य कालावधारणं क्रियते यथा निष्ठायां सेटीत्यत्र तेन पेचिवेत्यादाविटि कृते एत्वाभ्यासलोपौ भवतः अन्यथैकाच इतीट् प्रतिषेधः प्रसज्येत यद्योपदेशग्रहणमनुद

त्त विशेषणं नैकाज्विशेषणं तदा श्रूयमाणादेकाच इट्प्रतिषेधेन भाव्यमिति कृस्भ्रिति सूत्रं विध्यर्थं भवति ननु नियमार्थं तत्र पचे रेत्वाभ्यासलोपयोः कृतयो

रेकाच्त्वादिट्प्रतिषेधप्रसंगे पचादिभ्य इडुवचनमिति वक्ष्यते क्ङिति च सेटीति तु कालावधारणार्थे सति पूर्वमिट् ततः एत्वाभ्यासलोपाविति स्यानुपूर्व्या सिद्धम रम॰

१७६

॥ वतीति नार्थो वचनेन॥ ॥श्री॥ ॥ ॥

=रसम्भा॰भवे॰ति॰२॰=

लुलविथेयेति अवादेशेकृते एकहल्मध्यगतोकार इत्येत्वप्रसंगः समुदायग्रहणेलक्षणप्रतिपदोक्तपरिभाषोपतिष्ठते न वर्णमात्रग्रहणे नचायमका
रोगुणशब्दाभिनिर्वृत्त इति नशसददेतिप्रतिषेधोपि नास्तीति प्रश्नः गुणस्ययोकार इति वैयधिकरण्येन संबंध आश्रीयते लुलविथेयेत्यादौ ओकारस्या
वादेशविधानाद्गुणस्याकार इति प्रतिषेधः प्रवर्त्तते पेचिथेत्यादौ तु गुण एवाकारो न तु गुणस्येति प्रतिषेधाभावः एवमपीति गुण एवात्राकारो न तु

यो
लुलविथगुणस्यनेति प्रतिषेधात् इहापि तर्हि न प्राप्नोति पेचिथ शेकिथ गुणस्य कार इत्येवमेतद्विज्ञायते एवमपि राशरिथ अत्र प्रा
प्नोति गुणस्यैवोऽकारः कथं वृद्धिर्भवति गुणो भवतीति रेफशिरा गुणवृद्धिसंज्ञको निर्वर्त्तते अथवा आचार्यप्रवृत्तिर्ज्ञापयति नैवंजाती
यकानामेत्वं भवतीति यदयं तृफलभजत्रपश्चेति तृग्रहणं करोति राधो हिंसायाम् राधादिषु स्थानिनिर्देशः कर्त्तव्यः एकहल्मध्य कर्त्तव्यः
इति वर्त्तते यद्येवं त्रेसतुः त्रेसुः रशब्दस्यैत्वं प्राप्नोति अस्तु अलोन्त्यस्य विधयो भवन्तीति अकारस्य भविष्यति अनर्थके अलोन्त्यविधिर्न
स्येवं न प्राप्नोति नैतस्याः परिभाषायाः संति प्रयोजनानि अथवा अत इति वर्त्तते एवमपि राधेर्न प्राप्नोति आकारग्रहणमपि प्रकृतमनुवर्त्त
ते क्वप्रकृतं आम्प्रत्ययोऽत इति अथवा अस्तोर ल्लोप इत्यत्र तपरकरणं प्रत्याख्यायते तत्प्रकृतमिहानुवर्त्तिष्यते यदि तदनुवर्त्तते अत एक
९ हल्मध्येनादेशादेर्लिटि अभ्यासस्येति अवर्णमात्रस्यैत्वं प्राप्नोति न बाधे ॥०

गुणस्येति प्रतिषेधाप्रसंगः गुणस्येति अवयव इत्यर्थः उः स्थाने अण्प्रसज्यमा
न एव रपरो भवति पूर्वभक्तश्च रेफ इत्ययं गुणः राधो हिं राधादिषु स्थानिनिर्देश इति अलोन्त्यस्येति वचनादेत्वं अस्यस्य प्राप्नोतीत्युपधाया इति वक्तव्यमित्यर्थः
अपवात इति ततो धमादीनामेव एत्वम् अकारस्य भवति [redacted] ॥श्री॥ ०:

अकारेणेति समुच्चये अत इत्यनर्थकं स्यादिति विशेषणाविशेष्यमावा अयं अर्वणां छांदसमिति छन्दसी वनिपाविति वनिवस्ति मतुप्चेति प्रसंद्वयेन रूप
द्वयस्य सिद्धत्वात्वार्थः सूत्रद्वयेन तत्रैतत्स्यात्सर्वेन रूपद्वयप्रसंगोः तत्राह दृष्टानुविधिरिति भाषा प्रा दृष्टा अपि नियतविषयाः किंपुन श्छांदसाः तत्र त्र इत्य
स्य विचित्रगुणो अरिति रूपं तस्मान्मतुप्पूर्वं तावित्यादि भवति वनिप्पूर्वेण इत्यादि भवतिमघशब्दादपि प्रसर्येय यथा विषयं रूपं सिद्धं एवं चार्वं मघवच्छब्दस्य [illegible]
भाषायां नास्ति प्रयोग इत्युक्तं भवति॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे षष्ठाध्यायस्य चतुर्थे पादे तृतीयमाह्निकम्॥ ॥

६पे२

अकारेणातपरेण अवर्णाविशेषयिष्यामः अस्य अत इति इहेदानीमस्येत्यनुवर्त्तते अत इति निवृत्तं अर्वणास्त्रसावनञः मघवा बहुलं अर्वण
स्तमघोनश्च न शिष्यं छांदसं हि तत् अर्वणस्तमघोनश्च न शिष्यं किंकारणं छांदसं हि तत् दृष्टानुविधिश्छंदसि भवतीति मतुब्वन्भोर्विधाना
च्च मतुब्वनीखल्वपि छंदसि विधीयेते छंदस्युभयदर्शनात् उभयं खल्वपि छंदसि दृश्यते इमान्यर्वणः पदानि अनर्वाणं वृषभं मंद्रजिह्व
म्॥ ॥इति श्रीमहाभाष्ये षष्ठाध्यायस्य चतुर्थे पादे तृतीयमाह्निकम्॥ ॥पादः पत् पाद उपधाद्रस्वत्वं वक्तव्यम् द्विपदः पश्य आदे
शे हि सर्वादेशप्रसंगः आदेशे हि सति सर्वादेशः प्रसज्येत सर्वस्य द्विपाच्छब्दस्य पच्छब्दः आदेशः प्रसज्येत येनविधिस्तदंतस्येति तत्र द्विवक्तव्यम्
॥ न वा निर्दिश्यमानस्यादेशत्वात्॥ ॥ श्री॥ ॥

पादः पत्॥ ॥आदेशे हीति पादंतस्यांगस्य पदादेशो विधीयमानो अनेकाल्त्वात्सर्वादेशः प्राप्नोति नवेति यद्यपि पाच्छब्दे नतदंतः समुदायः प्रत्याय्यते तथापियो निर्दिश्यते
यतः षष्ठी श्रूयते तस्यैव षष्ठीस्थानेयोगेति वचनादादेशो न तु प्रतीयमानस्य यद्यप्युच्चार्यमाणस्यादेशेन संबंधाभावः तथाप्यनुकार्यानुकरणयोर्भेदस्याविवक्षि
तत्वादेवमुक्तं तत्रयथालोमस्येति वचनात् डुहः पइत्युक्ते हकारस्य पकारो भवति एवं पाच्छब्दप्रत्यापिततदंतसमुदायावयवस्य पाच्छब्दस्य पदादेशः॥ ॥

=[illegible]विवक्षितत्वादिति वचनेन दिवक्षाभावादनुकार्यानुकरणयोरत्र [illegible] यद्यपि [illegible] भेदाविवक्षायांस्वरूपेणान्यरूपेण [illegible] विषयाति [illegible] इति सूत्रे प्रदीपे॥ २=

नदोषोभवतीति तत्रैवंवक्तव्यं यो निर्दिश्यते तस्यागमैर्व्यवधानात् आमनप्राप्नोतीति अतएवपरत्वाश्रयेण व्यवधानं कर्तुमाह इदमिहेति आद्रादीनाम

वकाशः रवढ्वायाः कुमार्याः सर्वस्याइति आमोवकाशः कृते धाड़ादिषुवंचनाद्व्यवधानेपिभवत्तेनात् यदितुं प्राप्नेधाड़ादिषु आदेशआरभ्यतइत्युच्यतेततो

नवावक्तव्यम् किंकारणंनिर्दिश्यमानस्यादेशाभवंतीति एषापरिभाषाकर्त्तव्या कः पुनरत्रविशेषः एषावापरिभाषाक्रियते उपधाहृस्वत्वंवोच्य

ते अवश्यमेषापरिभाषाकर्त्तव्याबहूनेतस्याः परिभाषायाः प्रयोजनानि कानिपुनस्तानिप्रयोजनानि प्रयोजनंस्तुभित्रिङादेशेषु स्तु

प कुमार्यो [redacted] किशोर्यो रवढ्वायां मात्वायां तस्यां यस्याम् आआट्स्या घुकृतेषुसाड्याट्स्याढ्कृस्यान्नप्राप्नोतीतिनिर्दिश्यमानस्या

देशाभवंतीतिनदोषोभवति इदमिहसंप्रधार्यं आआट्स्याटः क्रियंतामामितिकिमत्रकर्त्तव्यं परत्वाट्टाम् नित्या आआट्स्याटःकृते

प्याभिप्राप्नुवंलकृतेपि अनित्या आट्याट्स्याटः कथमन्यस्यकृते आमिप्राप्नुवंसन्यस्याकृतेशब्दांतरस्यचप्राप्नुवन्विधिरनित्योभव

ति उभयोरनित्ययोः परत्वाद्दाम् इदंतर्हिनस्मैयस्मै स्मादिकृतेस्स्याढ्कृस्यस्मैभावः प्राप्नोति निर्दिश्यमानस्यादेशाभवंतीतिनदोषो

भवतीति यस्तर्हिनिर्दिश्यते तस्यकस्मान्नभवतिस्याटाव्यवहितत्वात् स्तुपतिङ्‌ आरूदितां आरूदितं आरूदितेतिइरि कृतेसेढ्कृस्यतांतंतामादेशाःप्रा

प्नुवंतिनिर्दिश्यमानस्यादेशाभवंतीतिनदोषोभवति इदमिहसंप्रधार्यं इट्क्रियतांतंतामइतिकिमत्रकर्त्तव्यंपरत्वादिडागमः॥ ॥७॥

पवादत्वाद्दामातेषांबाधःप्राप्नोतीत्यागमानामादेशस्यचात्रसमावेशएष्टव्यःसेढ्कृस्येति प्राग्यादेशेभ्योधात्वधिकारइत्यस्मिन्पक्षेऽव्यधनुपादाना व्यवधाना

नामादीनामप्रसंगइतिनोच्यते॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥ॐ॥

=स्वतादिति ॥ कर्त्रीत्यादावादेशप्रसङ्ग इत्यर्थः अन्तरङ्गत्वादिति ॥ ...इति भावः ॥ १=

भा० कै० ६
१७८

अन्तरंगा इति प्राप्नोत्यादेशोऽभ्योधाविधिकारान्तानामादयोः तरंगाः क्रियास्तामिति परत्वादन्तरंगत्वाद्वा यास्तु रिकृते तामादयः त्वांतस्येति प्रत्ययग्रहणपरिभाषया
धातुप्रत्ययसमुदायस्य लुपः प्रसंगः छन्दुहणोगतिकारकपूर्वस्यापि ग्रहणमिति सेषा तु परिभाषा नञ्पूर्वे इति वचनात् नोपतिष्ठते सामान्य शब्दस्यापि लुपः
प्रकरणाद्यपेक्षस्य विशेषावसायहेतुत्वस्यात् अतिस इति शोभनः स इत्युत्तरपदार्थप्रधानस्तत्पुरुषो द्रष्टव्यः उपसर्जनेन तु सदाद्यत्वाभावः अत्र पदं

=त्यदादि कि ॥ तत्र...इति ...इत्यर्थः ॥ ...सामान्यस्य सर्वसामान्यस्य...व्यापीति ॥ २=

अन्तरंगास्तां तां तामः इदं तर्हि क्रियास्तां क्रियास्तं क्रियास्तं क्रियामं यास्तु रिकृतेस्य यास्तु द्रष्टतां तं तामः प्राप्नुवंति निर्दिश्यमानस्यादेशा भवं
तीति न दोषो भवति त्यब्रूवेच प्रयोजनम् प्रहृत्य प्रकृत्य त्वांतस्य ल्यप् प्राप्नोति निर्दिश्यमानस्यादेशा भवंतीति न दोषो भवति त्रिचतुर्षु
युष्मदस्मदादिविकारेषु प्रयोजनम् अतितिस्रः अतिचतस्रः त्रिचतुरंतस्यातिस्रचतस्रभावः प्राप्नोति निर्दिश्यमानस्यादेशा भवंती
ति न दोषो भवति युष्मत् अस्मत् अतियूयम् अतिवयम् युष्मदस्मदंतस्य यूयवयौ प्राप्नुतः निर्दिश्यमानस्यादेशा भवंतीति न दो
षो भवति त्यदादिविकारः अतिसः उत्तमस्यः अस्य सो उत्तमा सौ त्यदाद्यंतस्य त्यदादिविकाराः प्राप्नुवंति किमंतस्य कादेशः प्राप्नोति अति
कः परमकः निर्दिश्यमानस्यादेशा भवंतीति न दोषो भवति उदः स्थास्तंभोः पूर्वस्य प्रयोजनम् उदस्थात् उदस्थानं अपि कृते सादृश्य

=न्यमिति तकारादकारादेव...=
=...इति सूत्रकार्यः ॥ २=

१९ पूर्वसवर्णः प्राप्नोति उदः स्थास्तम्भोरिति ॥ ॥ ॥

गाधिकार इति वचनात्तदंतस्य समुदायस्यातिशब्दतकारस्यापि तदोः सः सावितिसत्वप्रसंगः अत्वं त्वलोंसस्येति वचनादंतस्यैव भवतीति तत्र विशेषा रा[?] ४०
भावः परमक इति अनेकाल्त्वात्सर्वादेशः कः प्राप्नोति ननु नसत्वविधौ त्यदादीनामिति स्थानषष्ठी कातर्हि तदो रितसेष्वेतिकृष्यं सत्वमतिशब्दतकारस्य प १७८
रिह्रियते एवं तर्हि त्यदादीनां गणसंनिविष्टानां यौ निर्दिष्टौ तेतकारदकारौ तयोः सत्वविधानादतिप्रसंगाभावः ॥ ॥श्री॥ ॥

=एवं तर्हीति परिभाषा...निर्दिश्यमानस्य...निर्दिश्यमानं निर्दिश्यमानावयवं...इति तात्पर्यं ॥ २=

वाहउठ्गादिरिति यद्यपि छ्वोः शूडिसत्रात्सठिलं प्रतिपादितं तथापि यथाश्रुतं ग्रहीतात्प्रश्नः संप्रसारणमित्सनेनेति वाक्यस्यभाविवर्णस्यवासंप्रसारणसंज्ञा
यांविज्ञायमानायांयणः स्थानउठ्भवति अथ यणश्चादिष्टः कस्मान्नभवति संप्रसारणप्रदेशांतरेषु यण इतिस्थानषष्ठ्याश्रयणादिहापिस्थानषष्ठ्ये
वयुक्ता यथोक्तं संप्रदर्शादेशः स्थानेयोगत्वंप्रयोजयंतीति दिङ्ग्रहणंतु वैयर्थ्यं यद्येवमिति प्रष्ठ वाहश्चस्य इतिछितेवकारस्यसंप्रसारणेप्राप्ते

=तिपश्ची(?)पत्र.१= =एथेषसद्विसत्रविशेषणार्थं.१=

निर्दिश्यमानस्यादेशाभवंतीतिनदोषोभवति यस्माद्धिनिर्दिश्यतेतस्यकस्मान्नभवति अटाव्यवहितत्वात्सातत्यैषापरिभाषाकर्त्तव्या उ
क्तं षष्ठीस्थानेयोगेत्यस्ययोगस्यवचनेप्रयोजनं षष्ठ्यंतस्थानेनयथायुज्येतयतः षष्ठी उच्चारितेति वाहउठ् उठादिः कस्मान्नभवति
आदिष्टिद्भवतीत्यादिः प्राप्नोति संप्रसारणमित्सनेनयणः स्थानेक्रियते यद्येवं वाहउठ्च नानर्थकं संप्रसारणेनकृतत्वात्वाह
उठ्च नप्रनर्थकं संप्रसारणेनकृतत्वात् संप्रसारणेनैवसिद्धम् का रूपसिद्धिः प्रष्ठौहः प्रष्ठगुणः प्रत्ययलक्षणत्वात्प्रत्ययलक्ष
णेनगुणोभविष्यति एजग्रहणाद्वृद्धिः एजग्रहणाद्वृद्धिर्भविष्यति॥ ॥श्री॥ ॥७॥

कादेशेचकृतेगुणश्चौकारोएविप्रत्ययाश्रयः तथावृद्धिरेचीतिवृद्धौप्रकृतायांप्रष्ठौहइत्यादिसिध्यति अनकारांतेचोपपदेछंदसिण्विनेदृश्यतइतिशाल्य
हइत्यादिसिध्यर्थमपूर्वविधानंनोपपद्यते सत्यपिवाप्रयोगेवत्यर्थेवर्त्तमानस्योहतेःक्विपिशाल्यहइत्यादिर्भविष्यति उपसर्गेष्वुपपदेवहेःण्विःछंदसि
नास्तियतोवृद्धेर्बाधकंपररूपंप्रसज्येतेत्युद्विधानंसार्थकंस्यात्॥ ॥श्री॥ ॥श्री॥ ॥०॥

एवं तर्हीति संप्रसारणं यजादिप्रत्ययनिमित्तं भसंज्ञाश्रयत्वाद्बहिरंगमंतरंगेणान्याश्रयेणोकारत्वेनासिद्धमिति गुणो न स्यात्तदभावे रूपं न सिध्येदिति द्विधान
मसिद्धपरिभाषां ज्ञापयति ननु नैतत् ज्ञापकसाध्यं लोकतः सिद्धत्वात्प्रसंगवती हि लोकः नैतदस्ति यत्र युगपदंतरंगबहिरंगयोः प्राप्तिस्तत्र लौकिकन्याया
श्रयणाद्व्यवस्थितं रंगः इह तु बहिरंगनिमित्तमंतरंगमिति लौकिकन्यायानवतारः श्वयुव श्वादीनामिति मघवाबहुलमिति चादेशे कृते एकदेशविकृ

एवं तर्हि सिद्धे सति यद्वाहः उठमिति तत् ज्ञापयत्याचार्यः भवत्येषा परिभाषा असिद्धं बहिरंगलक्षणमंतरंगलक्षणे इति किमेतस्य ज्ञापने प्रयोजनम् पचावेदं पचामेदम् असिद्धत्वाद्बहिरंगलक्षणस्याद्गुणस्यांतरंगलक्षणमेत्वं न भवति श्वयुवमघोनामतद्धिते श्वादीनां संप्रसारणे नकारांतग्रहणमनकारांतप्रतिषेधार्थम् श्वादीनां संप्रसारणे नकारांतग्रहणं कर्त्तव्यम् किं प्रयोजनम् अनकारांतस्य माभूत् मघवता मघवते तथा प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणं भवतीति यथेह भवति यूनः पश्येति एवं युवतीः पश्येत्यत्रापि स्यादिति यत्तावदुच्यते नकारांतग्रहणं कर्त्तव्यमिति न कर्त्तव्यं उक्तं वा किमुक्तं उक्तमेतत् अर्वणस्त्रमघोनश्च न शिष्यं छांदसं हि तदिति यदप्युच्यते तथा प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणं भवति यथेह भवति यूनः पश्य एवं युवतीः पश्येत्यत्रापि स्यादिति लिंगविशिष्टस्य ग्रहणे चोक्तं न वा विभक्तौ लिंगविशिष्टाग्रहणमिति अथवा योगविभागः करिष्यते श्वयुवमघोनामतद्धिते अल्लोपः अकारस्य च लोपो भवति॥ ततोऽन इत्युभयोः शेषः श्वयुव॥

तस्मान्नस्तान्मघवते त्याद्यौ संप्रसारणप्रसंगः अर्वणस्त्विति मघवच्छब्दो मतुबंत इत्यर्थः नवा
विभक्ताविति यद्यपि विभक्तिमाश्रित्य संप्रसारणं न विधीयते तथापि विभक्तौ विधीयत इति लिंगविशिष्टपरिभाषानुपस्थानम् अन इत्युभयोः शेष इति
समुदायापेक्षणात् न चत्वादेशे कृते अन्नंतत्वमस्ति एकदेशविकृतस्यानन्यत्वेनाप्यन्नंतत्वं न्यास्तिसामान्यानिर्देशो विशेषाननतिदेशात् युवतिशब्दोप्यन्नंतो न भ
वतीति तस्यापि न संप्रसारणाभावः॥ ॥ ॥

= ननु यद्यविशेषेण प्रकृतिभावस्तदा प्रकरणं तत्र स्यादिति गणे दोषदर्शनम् इति प्रसज्यत इत्यत आह एवमिति। १२

[redacted] भावः साम न इति साम्नो देवने साम अत्रान्तिम प्रकृतिभावादिलोपाः। २

षपूर्वे अथेति किमिदं विध्यर्थम् अथ नियमार्थमिति प्रश्नः। यद्यविशेषेणेति अल्लोपे तैकाजित्यादिः प्रकृतिभावः प्राकरणिकविध्यपेक्षो न तु वृद्धिगुणापेक्षः। तत्र प्राकरणिकार्याणि भेदेनापेक्षेरन्न भेदेन वेति पक्षद्वयोपपत्तिः। अविशेषेणेति अल्लोपटिलोपसमुदायमपेक्ष्य प्रकृतिभावो विधीयते ताक्ष्णएप इति न क्षणोपत्यमिति सेनान्तलक्षणेति एयः ये चाभावकर्मणोरिति प्रकृतिभावादिलोपाभावे अल्लोपप्रसंगः अपीति तत्रस्यादन्ते वो श्वयणात् सामन्य

कानि॥ = अचेति अदेनापेक्षावामनन्तरस्येनिव्यायादिलोपस्यैव प्रकृतिभावइतिपक्षः। १२ = तेन सामविणमिता दोरूप्या देशिलन्तस्य विधीयमान प्रकृतिभावेन न विलनिरे तेन प्रकरणस्थ वा आ ना त। २

षपूर्वे हन्धृतराज्ञामणि अथ किमिदं षपूर्वादीनां पुनर्वचनमल्लोपार्थमाहोस्विन्नियमार्थं कथं वा अल्लोपार्थं कथं वा नियमार्थम् यद्यविशेषेण अल्लोपटिलोपयोः प्रकृतिभावः ततो विध्यर्थं अथ हि अणि टिलोपस्यैव प्रकृतिभावः ततो नियमार्थम् अत उत्तरं पठति षपूर्वादीनां पुनर्वचनमल्लोपार्थम् षपूर्वादीनां पुनर्वचनं क्रियते अल्लोपार्थं अविशेषेण अल्लोपटिलोपयोः स प्रकृतिभावः अवधारणे ह्यन्यत्र प्रकृतिभावउपधालोपप्रसंगः अवधारणे हि सति अन्यत्र प्रकृतिभावे उपधालोपः प्रसज्येत कथं यदि तावदेवं नियमः स्यात् षपूर्वादीनामेवाणीति एवमपि भवेदिह नियमात्तु स्यात् सामनो वैमन इति ताक्ष्णएप इति च प्राप्नोति अथाप्येवं नियमः स्यात् षपूर्वादीनामणेव इति एवमपि भवेदिह नियमात्तु स्यात् [redacted] ताक्ष्णएप इति साम नो वैमन इत्यत्र तु प्राप्नोति अथाप्युभयतो नियमः स्यात् षपूर्वादीनामेवाणि अणेव षपूर्वादीनामिति एवमपि सामन्यो वैमन्य इति प्राप्नोति तस्मात्सुष्ठुच्यते षपूर्वादीनां वचनं अल्लोपार्थमवधारणे ह्यन्यत्र प्रकृतिभाव उपधालोपप्रसंग इति आतो धातोः आतोः नापः आतोः नाप इति वक्तव्यम् इहापि यथा स्यात् समासे नञ्पूर्वे क्त्वो ल्यबिति अनाप इति किं खट्वायां मालायाम् यद्यनाप इति तत्र साधुरिति यत् आतोसमास इति ननु सौत्रोऽयं निर्देश इति किं तदर्थेन योगविभागेन एवं तर्हि यदा वैयाकरणा अनुकरणशब्दैर्व्यवहरन्ति तदर्थो योगविभागः ॥ ते हि साधु भिर्व्यवहरमाणाः अभ्युदयभाजो भवन्ति [redacted] ॥ ॥

भा० कै० ६
१८०

त्वायामिति निपातनाल्लोपाभावो यागमश्च सामान्यापेक्षं च निपातनं न सप्तम्यपेक्षमिति त्वायाइत्यपि भवति ततो धातोरिति इदं नित्यार्थं सप्त
म्येण विकल्पं ज्ञापयति सा च व्यवस्थितविभाषेत्यावं तस्यास्त्वोपाभावो ऽन्यस्य यथाप्रयोगं विकल्पः केचित्त्वी लिंगपुल्लिंगाश्रयं त्वायाः त्वइत्यादि रूपद्वयं
व्याचक्षते मंत्रे आदि- तिपूर्वाचार्यप्रक्रिययात्तृतीयैकवचनग्रहणाद्व्याप्तिमत्वाह मंत्रेष्विति त्यन्येति सप्तम्येकवचनस्य स्थाने याशब्द आदेशः छां

त्वायाम् निपातनादिति निपातनादेतत्सिद्धं किं निपातनम् त्वायां च प्रतिषेध इति यद्येवं नार्थोऽ नापइत्यनेन कथं समासे ऽनञ्पूर्वे त्वोऽस्य
विति निपातनादेतत्सिद्धं कथं हलः श्नः शानज्झाविति एतदपि निपातनात्सिद्धम् अथवा योगविभागः करिष्यते आतः आकारलोपो भवति त
तो धातोः धातोश्चाकारस्य लोपो भवतीति मंत्रेष्वाङ्यादेरात्मनः मंत्रेष्वात्मनः प्रत्ययमात्रे लोपः प्रसंक्तव्यः इहापि यथा स्यात् त्मन्यासमंज
न त्मनोरंतरस्थ इति यदि प्रत्ययमात्रे लोप उच्यते कथमात्मन एव निर्मिमीषेति तस्मान्नार्थः प्रत्ययलोपेन कथं त्मन्यासमंजन् त्मनो मात्रे ४
ऽन्तरस्थ इति छांदसत्वात्सिद्धम् दृष्टानुविधिश्छंदसि भवति आदिग्रहणानर्थक्यमाकारप्रकरणात् आदिग्रहणं चानर्थकं किं कारणं आका
रप्रकरणात् आत इति वर्तते मंत्रेष्वाङ्यादेरात्मनः तिविंशतेर्डिति तिग्रहणं किमर्थं न विंशतेर्डितिलोप इत्येवोच्येत नैवं शक्यम् विंशतेर्डि
तिलोप इतीयत्युच्यमाने त्य इत्यप्रसज्येत सिद्धो यस्येति लोपेनैवं तत्रारंभसामर्थ्यात्तिशब्दस्य भविष्यति कुतोनु खल्वेतत् अनंत्यार्थे आरंभे
तिशब्दस्य भविष्यति न पुनरंगस्येति तस्मात्तिग्रहणं कर्त्तव्यम् अथ क्रियमाणेपि तिग्रहणे त्यस्य कस्मान्न भवति॥ ॥ ॥

दसत्वादिति यथा शिवाय दस्येति प्राप्ते शिवाय द्ध्स्येति रेफलोपः एवमिहाकारलोपः एवं च श्रुवता सूत्रमेव प्रत्याख्यातं सति त्वारंभे नार्थ आदिग्रहणेन आतो
धातोरित्यत आत इत्यनुवर्तनात् तिविंकुतोनु खल्विति वचनसामर्थ्यादलोंत्यपरिभाषाया अनुपस्थानात्समुदायस्यैव षष्ठीनिर्दिष्टशात्त्वोपः प्रसज्येत न त्व एम०
॥ संशाद्धितस्यति शब्दस्य तिग्रहणेनानुसतितेर्लोपो भवति॥ ॥ श्री १८०

निर्दिश्यमानस्यादेशा भवन्तीति नानेन परिभाषाया व्यापारः कथ्यते न हि निर्दिश्यमानपरिभाषा ऽलोऽन्त्यस्यादेः परस्येत्येतयोर्बाधिका एतयोर्निर्विषयत्वप्रसंगात् तस्मा
त्रियहणसामर्थ्यादलोऽन्त्यस्यानुपस्थानेन सर्वस्यन्ते लोपो भवतीत्ययमस्य भाष्यस्यार्थः। टेः इति सभस्यापीति चुटू इति वचनादित्संज्ञाभावात् इकारस्य प्रवर्तते दीर्घकाशातु
षण्णाष्ट्रवंरंज इति निर्देशात् ततश्चानुबंधकरणसामर्थ्यादस्येति प्रकरणमिह बाध्यते। नस्त नकारांतस्येति इनण्यनपत्ये इत्यस्मिन्निति चप्रकृतिभावे प्राप्ते वचन

निर्दिश्यमानस्यादेशा भवन्तीति न भविष्यति टेः इभसोपसंख्यानं कर्तव्यम् इहापि यथा स्यात् उपसरजो मंडुरज इति तन्न हि वक्तव्यम् नवक्तव्य
म् कथमुपसरजो मंडुरज इति दित्सभस्याप्यनुबंधकरणसामर्थ्यात् इभस्याप्यनुबंधकरणसामर्थ्याद्भविष्यति। नस्तद्धिते नांतस्य टिलोपे
सब्रह्मचारिपीठसर्पिकलापिकुथुमितैतिलिजाजलिलांगलिशिलालिशिखंडिसूकरसद्मसुपर्वणामुपसंख्यानम् नकारांतस्य टिलोपे सब्रह्मचा
रिन् पीठसर्पिन् कलापिन् कुथुमिन् तैतिलिन् जाजलिन् लांगलिन् शिलालिन् शिखंडिन् सूकरसद्मन् सुपर्वन् इत्येतेषामुपसंख्यानं कर्तव्य
म् सब्रह्मचारिन् सब्रह्मचारिण इमे साब्रह्मचाराः सब्रह्मचारिन् पीठसर्पिन् पैठसर्पाः पीठसर्पिन् कलापिन् कालापाः कलापिन् कुथुमिन्
कौथुमाः कुथुमिन् तैतिलिन् तैतिलाः तैतिलिन् जाजलाः जाजलिन् लांगलिन् लांगलाः लांगलिन् शिलालिन् शैलालाः शिलालिन् शिखंडि
न् शैखंडाः शिखंडिन् सूकरसद्मन् सौकरसद्माः सूकरसद्मन् सुपर्वन् सौपर्वाः सुपर्वन् चर्मणः कोश उपसंख्यानम्॥ ॥

म् सब्रह्मचारिण इम इति तस्येदमित्यण् पीठेन सर्पतीति पीठसर्पी पूर्ववदण् कलापिना प्रोक्तमधीयते कालापाः कलापिनोऽणित्यण् ततोऽध्येतृवेदितृ ओरण्तः प्रोक्ता
ल्लुगिति लुक् कुथुमिना प्रोक्तमधीयते कौथुमाः तेन प्रोक्तमित्यण् पूर्ववद्द्वितीयस्याणो लुक् तैतिलिजाजलिलांगलिप्रोक्तमध्ययनं साहचर्याज्जैतिल्यादि शाब्दैस्त्य
ते तेभ्यस्तदधीत इत्येतद्देशेऽणप्रत्ययः तेन प्रोक्तमित्यत्रानु शेषिके थेव छाच्छः प्रसज्येत केचित्तु तितिलि शब्दमत्राधीयते॥ ॥श्री॥ ॥

=नन्वत्र टिलोपेष्टि विषयाभावेन तन्निषेधसन्नियोगशिष्ट एज्नस्यादं न आह॥ =ननु तस्येदमित्यत्र स्वग्रामेत्यादि दिगादीनाम् ...संकोचादुर्भोत आह॥ अत्रेति॥ ननु पुनः संकोचात् ... अपवादत्वमिति वाच्यं ... टिलोपो विधीयते पितुः प्रमाणभाव ...

चार्म इति तस्य विकार इत्यण् शौव इति स्येदमित्यण् स्वे ग्राम जनपद मनुष्येभ्यः इत्येतत्तु भाष्याख्यातम् अत्र परत्वाद् वृद्धौ प्राप्तायां द्वारादीनां चेति तत्प्रतिषेधे ऐजागमे च कृते टिलोपः क्रियते संकोचात् अत्र शौव न इति विकारावयवयोरुक्तं प्राण्योषधिवृक्षेभ्य इति भावाभावाच्छौव इत्येव भवति सायंप्रातिक इति सायंप्रातः शब्दात् कालाट्ठञिति ठञ् प्रत्ययः यथा कथं चित्कालशब्दात् पिठञ् भवतीति कालसमुदायवाचिनोऽपि ठञ् भवति पौनःपुनिक इति पूर्ववट्ठञ् आदिशब्दः प्रकारे टिलोपदर्शनेन च सादृश्यमाश्रीयत इति अराजीयः शाश्वतिक इत्यत्र च टिलोपाभावः निपातनादिति अत एव निपातनात् तान्तादिति कादेशाभावः शाश्वतमिति भाष्यकारवचनप्रामाण्यात् प्राग्दीव्यतोऽण् प्रत्ययः यस्येति च सवर्णदीर्घत्वे लोपे वा नास्ति विशेष इति मत्वा पृच्छति इवर्णस्येति हे दाक्षीति दाक्षि

=अन्यथा...स्मात्.५=

चार्मेः कोशः अश्मनो विकार उपसंख्यानम् अश्मनो विकार उपसंख्यानं कर्तव्यं अश्मनो विकारः आश्मः भुनः संकोचे शौवः संकोचः अव्ययानां च सायंप्रातिकाद्यर्थम् अव्ययानां चो[redacted]पसंख्यानं कर्तव्यम् किं प्रयोजनम् सायंप्रातिकाद्यर्थम् सायंप्रातिकः पौनःपुनिकः शाश्वतिके प्रतिषेधो वक्तव्यः न वक्तव्यः निपातनादेतत्सिद्धम् किं निपातनं येषां च विरोधः शाश्वतिक इति एवं तर्हि शाश्वते प्रतिषेधो वक्तव्यः शाश्वतम् नस्तद्धिते यस्येति च इवर्णस्य ई इति किमुदाहरणम् हे दाक्षि दाक्ष्या दाक्षेयः हे दाक्षि ई इति यदि टिलोपो न स्यात् परस्य ह्रस्वत्वे कृते सवर्णदीर्घत्वं प्रसज्येत दाक्ष्या इति यदि टिलोपो न स्यात् परस्य यणादेशे कृते पूर्वस्य श्रवणं प्रसज्येत दाक्षेय इति यदि टिलोपो न स्यात् परस्य लोपे कृते प्र

शब्दादित्तो मनुष्यजातेरिति ङीषि कृते तस्य संबुद्धौ ह्रस्वे कृते सवर्णदीर्घत्वे सति सवर्णदीर्घस्य श्रवणप्रसंगः नु चांतरंगत्वात् सवर्णदीर्घत्वे कृते ह्रस्वो भविष्यति एवं तर्हि वार्णादांगं बलीय इति ह्रस्वत्वं मन्यते दाक्षि ई आ इति स्थिते शब्दपरविप्रतिषेधात् परस्य यणादेशे कृते पूर्वस्य श्रवणप्रसंगः सवर्णदीर्घस्य पूर्वविधित्वात् तत्र कर्तव्ये परयणादेशस्य नास्ति स्थानिवत्त्वम् यणादेशोऽपि कर्तव्य एव र ई इतीकारप्रश्लेषाद् दीर्घविधिं प्रति स्थानिवत्त्वनिषेधः दाक्षि ई इति स्थिते ह्रीप्यां ठगिति ढकि कृते परस्य लोपे कृते पूर्वस्य श्रवणप्रसंगः परलोपस्य स्थानिवद्भावात् द्वितनिमित्तलोपस्याप्रसंगात्॥ ॥श्री॥ ॥श्री॥ ॥

राम०
१८१

=ननु सवर्णदीर्घस्य स्थानिवत्त्वाभावे पियण्देशे स्थानिवत्त्वात् कथं पूर्वस्य श्रवणप्रसंगो न आह॥ यणादेशेऽपीति॥ २=[redacted]

नैतानीति यत्राङ्गवर्णयोर्युगपत्प्रसङ्गस्तत्र वार्णादाङ्गं बलीयो भवतीति भावः । यणः ठक्कौत्वाङ्गागावेव न भवतः । इदं तर्हीति सखिशब्दात्सख्यशिश्वीति भाषायामिति ङीषि कृते सखीमतिक्रान्त इति प्रादिसमासे कृते लिङ्गविशिष्टपरिभाषया अनिसत्वादसति टचि गोस्त्रियोरिति ह्रस्वः तत्रासतीकारलोपे एकादेशस्य पूर्वं प्रसंगे तव ह्रस्वाभा त् घिसंज्ञाप्रतिषेधः स्यात् प्रसज्यप्रतिषेधे चायं दोषो न तु पर्युदासे नं दं तस्य सखिशब्दादन्यत्वात् घिसंज्ञायाः सिद्धत्वात् ङीषि तु लोपे कृते ह्रस्वले च कृते लाक्षणिक

नैतानि संतिप्रयोजनानि सवर्णदीर्घत्वेनाप्येतानि सिद्धानि इदं तर्हि अतिसखेरागच्छति अतिसखेः स्वं यदि लोपो न स्यात् उपसर्जनह्रस्वत्वे कृते अ सखीति प्रतिषेधः प्रसज्येत यस्येत्यादौ श्यांप्रतिषेधः यस्येत्यादौ श्यांप्रतिषेधो वक्तव्यः काण्डे सौर्ये नाम हिमवतः शृंगे सत्तर्हि प्रतिषेधो वक्तव्यः नवक्तव्यः इह श्यापामित्यपि प्रकृतं तेन स्यपितत्राभिसंबंधमात्रं कर्तव्यं यस्येत्यादौ लोपो भवति श्यां न इयङुवङ्भ्यां लोपो विप्रतिषेधेन इयङुव ङ्भ्यां लोपो भवति विप्रतिषेधेन इयङुवङोरवकाशः श्रियौ श्रियः भ्रुवौ भ्रुवः लोपस्यावकाशः कामण्डलेयः भाद्रबाहेयः इहोभयं प्राप्नोति वात्सप्रेयो लैखाभ्रेयः लोपो भवति विप्रतिषेधेन गुणवृद्धी च गुणवृद्धी च इयङुवङ्भ्यां भवतो विप्रतिषेधेन गुणवृद्ध्योरवकाशः चेता गौः इयङुवङोः स एव इहोभयं प्राप्नोति चयनं चायकः गुणवृद्धी भवतो विप्रतिषेधेन न वेयङुवङादेशस्यान्यविषयवचनात् न वार्थो

॥ विप्रतिषेधेन किं कारणं इयङुवङादेशस्यान्यविषयवचनात् ॥ ॥ श्री ॥

त्वात्सखिरूपस्य घिसंज्ञायाः प्रतिषेधाभावः । काण्डे इति यचि भमिति भत्वाल्लोपः प्राप्नोति सौर्ये इति सूर्येण एकदिगिति तेनैकदिगित्यण् तत्र यस्येति चेत्यकारलोपः प्राप्नोति सूर्येतिष्येति यलोपश्च यथानुवक्ष्यते सूर्यमत्स्ययोर्ङ्यामिति तथात्र यलोपस्य प्रसंगः इह श्यामिति विभाषाडि श्योरिसतः शीग्रहणं न संयोगाद्बमन्तादि सतो नेति चानुवर्तते तेन वाक्यभेदेन श्यांकार्यं न सिध्यते कामण्डलेय इति चतुष्पाद्भ्यो ढञिति ढञ् एवं वात्सप्रेय इति लैखाभ्रेय इति गृष्ट्यादिभ्यश्चेति ढञ् ॥

इयङुवङादेश इति आदेशनमादेशो विधानं इयङुवङोरादेश इति षष्ठीसमासः यथेयङुवङौ सर्वत्रानन्यपूर्वको नैवं गुणावृद्धी इति प्रतिषेधानुपपत्तिरित्यर्थः
सर्व्यं सौरीति तेनेकदिगीत्यण् तदन्तान्ङीप् ईकारे परतो सूर्यशब्दाङ्गं न भवति किं तर्ह्यणन्तमिति यकारलोपाप्रसंगः पुंयोगविवक्षायां तु देवतायां चाविधाना
दन्यत्र ङीषि कृते सूर्यशब्दो ङ्गमीकारे भवतीति तत्रैव लोपः स्यात् सूरीति अंगान्यत्वादिति राजदन्तादित्वात् परनिपातः यलोपविधिमिति उपधाविधिं प्रतितु प्रति

= नन्वियङुवङादेशविधिवा... एकवचनमयुक्तमत आहादेशनमिति ॥ = अंगान्यत्वादिति ... [illegible]

इयङुवङादेशश्चान्यविषये आरभ्यते किं विषयेयणादेशविषये यथैव यणादेशं बाधते एवं गुणवृद्धी अपि बाधेत तस्मात्तत्र गुणवृद्धिविषये प्रति
षेधः तस्मात्तत्र गुणवृद्धिविषये प्रतिषेधो वक्तव्यः न वक्तव्यः मध्येपवादाः पूर्वान्विधीन्बाधन्त इत्येवमियङुवङादेशो यणादेशं बाधिष्यते गुणवृद्धी
न बाधिष्यते यस्येति च सूर्येति ष्यागस्त्यमत्स्यानां यउपधायाः सूर्यादीनामणन्ते प्रसिद्धिरंगान्यत्वात् सूर्यादीनामणन्ते प्रसिद्धिः सौरी बला
का किं कारणमंगान्यत्वात् अणन्तमेतदंगमन्यद्भवति लोपे कृते नांगान्यत्वं भवति सिद्धं तु स्थानिवत्प्रतिषेधात् सिद्धमेतत्कथं स्थानिवत्प्रतिषे
धात् प्रतिषिध्यते त्र स्थानिवद्भावः यलोपविधिं प्रति न स्थानिवद्भवतीति एवमपि न सिध्यति किं कारणमंगान्यत्वात् अन्यो हि सूर्यशब्दः अन्यः
नर सौर्यशब्दः नैष दोषः एकदेशविकृतमनन्यद्भवतीत्येवं भविष्यति उपधाग्रहणानर्थक्यं च स्थानिवद्भावे चेदानीं प्रतिषिद्धे उपधाग्रहणमनर्थकं किं का
रणमेस एव हि सूर्यादीनां यकारः किं यातमेतद्भवति सुष्ठुयात साधुचयातं परिस्राम्यादृसिद्धत्वं ॥ × स्थानिवद्भावादंगान्य... ॥

षेधः प्रत्ययविधावेवस्थानिवत्वनिषेधे चावशिष्टस्यांगसंज्ञायामेकदेशविकृतस्यानन्यत्वात् यलोपसिद्ध्यति अंत्यएवेति अकारद्वयलोपे सति यकारस्यांत्यत्वान्नत्वयां
तानां सूर्यादीनां लोपो भवतीत्युच्यमाने लोपस्येति यकारस्यैव भविष्यति यग्रहणं तु न प्रत्याख्यायते तदन्तरेणायां तत्वां भावादुत्तरार्थत्वाच्च यग्रहणस्यां यातमिति
गतं ज्ञातं सिद्धमित्यर्थः साधुचयातमिति अनेन न सिद्धेदीर्घं प्रतिपाद्यते परिस्राणिति अकारद्वयलोपस्य सिद्धत्वादंत्यो यकारो भवति ॥ ॥ श्री ॥ ॥

= अंगान्यत्वामिति ... [illegible] ... भवति ॥ विशेषणाभावे ... ॥ २
... [illegible] ...

=पत्वणिचस्येति णौ पत्वस्य आश्रयत्वात् सिद्धत्वाभावः ॥४=यंप्रत्ययेदेवतार्थमणिसौर्यमासः ॥४=

ऽप्रत्ययेति ई इति ऽकारल्लोपस्य समानाश्रयत्वासिद्धत्वाद्यांतत्वाभावः ततश्चोपधायहणं कर्त्तव्यम् यद्यपीति नचोपधाग्रहणं क्रियते नापि सूर्यादीनमंगत्वे
नविशेषणंतत्रत्यर्थः इतितद्धिते च य इंगमनाश्रितरूपविशेषणं तस्य यकारस्य लोपः स चेद्यकारः सूर्यादिषु य यवो भवतीति सूत्रार्थः सूर्येचरीति सूर्ये स्पस्त्रीसू
रीभूतप्रवेचारट् प्रत्ययः तसिलादिष्विति पुंवद्भावः सूर्येमत्स्ययोरिति मत्स्यस्य ङ्यां सूर्यागस्त्ययोश्छे चेत्येवं सिद्धेः यथप्रधानं परत्वाद्बाधवेनादरः कृतः
सौरीय इति सौर्यस्यापमिति वृद्धाच्छः ऽगस्त्यस्यापत्यमिति स्त्रष्वणत रंतान्ङी पृष्ठश्च नक्षत्राणीति नक्षत्रसंबंधिन्यणो र्थः तिष्यपुष्ययोरिसुभयो

ऽप्यसहतेनासिद्धत्वं ऽसिद्धत्वात्लोपस्यानंत्सोयकारोभवति यद्यपि सहतेनासिद्धमेव मयिनदोषः नैवंविज्ञायते सूर्यादीनामंगानां यकारलोपउ
ति कथं तर्हि ऽगस्त्यल्लोपो भवति स चेत्सूर्यादीनां यकार इति एवमपि सूर्येच री ऽत्र प्राप्नोतित स्मादुपधाग्रहणं कर्त्तव्यम् विषयपरिगणनं च वि
षयपरिगणनं च कर्त्तव्यम् सूर्यमत्स्ययोर्ङ्याम् सूर्यमत्स्ययोर्ङ्यामिति वक्तव्यम् सौरीमत्सी सूर्यागस्त्ययोश्छे चङ्यां चेति वक्तव्यम् सौरी सौरीयः
ऽगस्ती ऽगस्तीयः तिष्यपुष्ययोर्नक्षत्राणि तिष्यपुष्ययोर्नक्षत्राणि यल्लोपो वक्तव्यः तैषम् पौषम् ऽंतिकस्य तसिकादि लोपश्च ऽद्युरन्त
लंच ऽंतिकस्य तसिकादिलोपो वक्तव्यः ऽद्युदात्तत्वं च वक्तव्यम् ऽंतितः आगतो नदूरात्तमतारेश्च लोपो वक्तव्यः ऽग्रेत्वन्तो ऽंतमः ऽंति
तमे ऽवरो हति तसी सेषु नवक्तव्यो दृष्टो हाशतये पिहि घोलोपोतिषदिसत्र ऽंतिषत् ॥ ॥श्री॥ ॥७॥

पादानासिद्धशब्दस्य लोपाभावः ऽंतितः इति ऽपादाने चाहीय रुहोरिति तसिः तादेश्चेति चकारात्तादेश्च यहाता देस्तदंतमः कादिलोपे ऽंतितमः तसीसेषु इतिकादि
लोपश्च बहुलमिति सेवविषयमनुपाद्य पठितव्यमित्यर्थः दाशातय इति दशावयवाय स्पदशतयस्तत्रभवो दाशातयः चतुःषष्ठ्यां स्वोग्रंथः घौलोप इति घुशब्दे नोत्त
रपदं दर्वाचार्यमसिद्धोच्यते ऽंतिके सीदतीति सत्सूद्विषेति क्विप् पूर्वपदादिति षत्वं ॥ ॥श्री॥ =बहुवचनमंगिहिते सर्यः। ॥ ॥७॥ ॥

=भंऽलाल मआदपवात्राप्यस्य=१=

अघ्याविति अनुत्तरपदइसर्थः येयत्प्रत्यये परतोऽतीतिकृतकादिलोपोऽतिकशब्दोगृह्यते अथर्ववेदे अंतिकेमवृइतिभवेछंदसीतियतिकृतेऽतियइतिभ
वति कादिलोपस्यासिद्धत्वात्मादिमसिद्धलाद्यस्येतिलोपोनभवति बिल्वच्छयहणमितिकृतकुगागमस्यनिर्देशाच्छएवगृहीष्यतइतिभावः बिल्वकेभ्य
इति बिल्वशब्दात्प्राग्दीव्यतीयेऽर्थे कप्रत्यये सतिछयहणेकुगागमनिर्देशादेवननिष्पद्यीयेतेतिकप्रत्ययांतादपिपरस्यप्रत्ययस्यलुक्प्रसंगः भस्येतिवर्त्ततइति
तत्रार्थाद्विभक्तिविपरिणामेसतिभसंज्ञकेभ्यःपरस्यलुग्भवति बैल्वकइति अनुदात्तादेश्चेत्यञ् तद्धितइति नतद्धितइतिवर्त्ततेनविल्वकादिभ्योभ
ते

तथा [illegible] घौयेंऽसथर्ववेसु अंतियेचद्धके सूर्येबिल्वकादिभ्यश्छस्यलुक् छयहणंशक्यमकर्त्तुमइहकस्मान्नभवति बिल्वकेभ्यःभस्ये
तिवर्त्तते एवमपिबिल्वकायेत्यत्रप्राप्नोति तद्धितएतिवर्त्तते एवमपिबिल्वकस्यविकारःअवयवोवाबैल्वकःअत्रप्राप्नोति तद्धिते तद्धि
तस्यइतिवर्त्तते एवमपिबिल्वकीयायांभवो बैल्वकः बैल्वकस्यकिंचिद्बैल्वकीयं अत्रप्राप्नोति नसबिल्वकात् बिल्वकादिभ्योयोविहित
इत्युच्यतेनचासौबिल्वकशब्दाद्विहितः किंतर्हि बिल्वकीयशब्दात्॥ ॥श्री॥ ॥श्री॥ ॥

तद्धितस्य० =कथणेत्सुकाोपेनवानिश्चौविशेषाभावोऽत्रआह तनश्चेति आश्रयवाङ्गपूर्वत्सुकोनासिद्धत्वं २= नत्कप्रत्ययांतबिल्वप्रकृतिकविकाराद्यर्थकाणंतबैल्वकशब्दादिदमर्थेछेबैल्वकीयमृत्साधोलुक्स्यात्मस्यात्णोबिल्वकादि

संज्ञकेभ्यःपरस्यतद्धितेपरतोलुग्भवतीतिसूत्रार्थःसंपद्यते एवमपीति बिल्वादिभ्यंतेस्यामितिअण्णादिभ्यश्छः कुगागमश्चततस्तत्रभवइत्यण् तस्मिन्परतश्छस्यलु
क् ततोवृद्धाच्छः अससतिछयहणेछेपरतोऽणोलुक्प्रसंगः ततश्चनलुमतांगस्येतिप्रत्ययलक्षणप्रति षेधात्वृद्ध्यभावेरूपंनसिध्येत् नसबिल्वकादिति विहितइति
शेषः बिल्वकादिभ्योयोविहितइति बिल्वकादिभ्यइत्यागंतुनाकारेणकृतकुगागमनिर्देशः तेनायमर्थः भाविकुगागमेभ्योबिल्वादिभ्योयोविहितःप्रत्ययस्तस्य
तद्धितेलुग्भवति नचछात्प्रागभाविकुगागमेभ्योबिल्वादिभ्यःप्रत्ययोविधीयतइतिनार्थश्छयहणेन॥ ॥श्री॥ ॥

एवं तर्हि इति छमात्रस्य लुग्यथा स्यात् कुमारगोमानिवृत्तरिति सेवमर्थं क्रियते यदि चैषा परिभाषा न स्यात्तदा कुको नैव निवृत्तिः प्राप्नोतीति किं तदभावार्थेन छग्रह
णेन न्वचिन्त्येषा परिभाषा नाश्रीयते यथा श्येनेय इत्यादौ यस्येति लोपेन निवृत्तेऽपीकारे तत्सन्नियुक्तो नकारो न निवर्तते तथा च स्त्रियाः पुंवदित्यत्रोक्तमेतभाष्ये इ
त्यत्र पुंवद्भावेन स्त्रीप्रत्ययमात्रस्य निवृत्तिः क्रियते ऽर्थस्य त्व निवृत्तत्वान्नकारस्य श्रवणं प्रसज्येतेति तथा च श्रोत्रियस्य घलोपश्चेति घे विनिवृत्तेऽपि श्रोत्रभावो
न निवर्तत इति तत्रानित्या परिभाषेति प्रतिविधेयम् तुरितुः सर्वस्येति सर्वस्य तद्ग्रहस्य लोपो न त्वलोऽन्त्यस्येत्यर्थः अंतस्य लोप इति टेरित्येवांत्यलोपस्य सि
वचन

एवं तर्हि सिद्धे सति यच्छग्रहणं करोतीति तत् ज्ञापयत्याचार्यः भवत्येषा परिभाषा सन्नियोगशिष्टानामन्यतराभावे उभयोरप्यभाव इति तत्स्याच्छग्रहणं कर्त
व्यं छस्यैव लुक् यथा स्यात् कुको मा भूदिति तुरिष्ठेमेयस्सु तुः सर्वस्य लोपो वक्तव्यः अंतस्य मा भूदिति सत्तर्हि वक्तव्यः न वक्तव्यः सर्वलोपविज्ञान
मंतस्य वचनानर्थक्यात् तुः सर्वलोपो विज्ञायते कुतः अंतस्य वचनानर्थक्यात् अंतस्य लोपवचने प्रयोजनं नास्तीति कृत्वा सर्वस्य भविष्यति
अथवा लुक्प्रकृतः सोऽनुवर्तिष्यते अशक्यो लुगनुवर्तयितुं किं कारणं विजयिष्ठयोगे गुणादर्शनात् विजयिष्ठकुरिष्ठयोगे गुणो दृश्यते विजयि कुरि२
ष्ठ आसुतिं करिष्ठः टेः णाविष्ठवत्प्रातिपदिकस्य णौ प्रातिपदिकस्येष्ठवद्भावो वक्तव्यः किं प्रयोजनं पुंवद्भावरभावटिलोपयणादिपरार्थम् पुं
वद्भावार्थं एनीमाचष्टे एतयति श्येतयति ॥ ॥श्री॥ ॥

=तदंतादिति एवं च न लोके तिक्तिदे यादस्तु निमित्तिकस्याभावे द्वितीयाजवतीति भाष्यः ... प्रयोजनापरस्मार्थेन

कुलात् विजयिष्ठ इति विजेतृशब्दात्तृन्नच्छंदसीति इष्ठन्प्रत्ययः टेः णाविति प्रातिपदिकग्रहणं प्रत्ययकार्यो णामतिदेशो मा भूदित्येवमर्थं तेन बहून् आचष्टे भावयतीति णि
चो यिणा न भवति तद् भावे भूभावे नापि न भवितव्यं संनियोगशिष्टत्वादिति वक्ष्यतीति भवितव्यमिति केचित् एतयतीति तसिलादिष्वादिष्टे पुंवद्भावो विहित इति णावपि
भवति टिलोपे नैवमं संनियोगशिष्टत्वान्नकारनिवृत्तौ सिद्धायां पुंवद्वचनं संनियोगशिष्टपरिभाषाया अनित्यत्वज्ञापनार्थं तेन श्येनेय इत्यादि सिद्धं भवति ॥ ॥
×इष्ठन्प्रत्ययः तत्र नु किंसति नुमतं गस्य तिप्र [illegible] त्ययलक्षणप्रतिषेधात् गुणेन स्यात् सर्वत्र गुणेन प्रवर्तते अंतरंगमपि विधीन् बहिरंगो लुग्बाधत इति वचनात् कुरिष्ठ इति तत्रैव ×

भा०कै०६ विन्मतोरिति स्रग्विणमाचष्टे स्रजयति अंगवृत्ते इति वृद्धिरत्र न भवति यत्र त्वनिष्ठितमंगं तत्र वृद्धिर्भवत्येव आपयति स्थापयतीति युवानमाचष्टेऽल्पमाचष्टेक
१८४ नयति इष्ठस्य किमयमिति किमिकारांतः समुदाय आगमोऽथ यकारमात्रमिकारस्तूच्चारणार्थः इति प्रश्नः किं चातः इति उभयथा दोषाभाव इत्यर्थः तत्र
तिपारयति यदीति ज्यादादीयसः ज्यात्परस्येयस आदेः परस्येत्याकारः क्रियते तत्रोच्यते किमर्थमिति अकृद्यकार इति कृतीति तत्रानुवर्तत इति भावः
उऽपेत्या दोषाः दसलादीर्घो भावः अंगवृत्ते इति अंगेवृत्ते निष्पन्ने यत्कार्यं तस्मिन्सति पुनरन्यस्यांगस्य प्रवृत्तावविधानं भवति राजनोर्जेस्तत्रापीयं परि

रमावार्थे पृथुमाचष्टे प्रथयति म्रदयतीति टिलोपः पटुमाचष्टे पटयति यणादिपरार्थे दूरमाचष्टे दवयति किं पुनरिदं परिगणनमाहोस्विदुदाहरण
मात्रम् उदाहरणमात्रमित्याह प्रारयो पिहीयंते प्रियमाचष्टे प्रापयति इति भारद्वाजीयाः पठंति णाविष्टवत्प्रातिपदिकस्य पुंवद्भावरभावटिलो
पयणादिपरप्रादिविन्मतोर्लुक्च न विध्यर्थमिति इष्ठस्य पिट्च किमयं पिशब्दः आहोस्विद्यकारः किं चातः यदि लोपोऽप्यनुवर्तते तेन तोपि शब्दः
अथ निवृत्तं ततो यकारः ज्यादादीयसः किमर्थं ज्यात्परस्येयसः आत्वमुच्यते न लोपः प्रकृतः सोनुवर्तते का रूपसिद्धिः ज्यायान् अकृद्यकार
इति दीर्घत्वं भविष्यति एवं तर्हि सिद्धे सति यत् ज्यात्परस्येयसः आत्वं शास्ति तत् ज्ञापयत्याचार्यः भवत्येषा परिभाषा अंगवृत्ते पुनर्वृत्तावविधि
रिति किमेतस्य ज्ञापने प्रयोजनं पिवेर्गुणप्रतिषेधश्चोदितः स न वक्तव्यो भवति अथ किमर्थं ज्यात्परस्येयसः दीर्घ उच्यते न अकार एवोच्ये
त का रूपसिद्धिः ज्यायान् आंतर्यतः दीर्घस्य दीर्घो भविष्यति एवं तर्हि सिद्धे सति यद्दीर्घग्रहणं नेति र ऋतो हलादेर्लघोः कथमिदं विज्ञायते हला

भाषाज्ञापिता तत्रास्मिन्स्थिते ज्ञापके जाइत्यादेशविधानं दीर्घश्रवणार्थं तस्मिंश्च ज्ञापके सति ज्यायानिति सिध्यर्थमाद्वचनम् अन्यथा टिलोपे कृते परिभाषावशा
द्दीर्घो न स्यात् पिवेरिति पाघ्रादिसूत्रेण पाशब्दस्य पिबादेशो हलंतः क्रियते तदा गुणप्रसंगः परत्वदेंतस्तदा गुणप्राप्त्यभावः र ऋ कथमिदमिति इहांगस्येति प्रकृते ऋतइ णम० १८४
ति च श्रुतं तत्र विशेषणविशेष्यभावे कामचारात्प्रश्नः॥ ॥श्री॥ ॥९॥

युक्तंपुनरिति घात्वादेरित्यादेरवयववाचिन आदिशब्दस्य दर्शनादवयवापेक्षत्वाच्चावयवांतरेण संबंधाभावादिति भावः अन्यस्यान्य इति आसंतमेदारसंबंधपर स्परस्यावयवयोर्दर्शयन्नित्यत्र भेदविवक्षा वृक्षाणां वनं वृक्षवनमिति तत्रावयवावयविभागो नान्यत्रेत्यर्थः दधिभोजनमिति यद्दृष्टोपनीतं दधिभोजनं कार्यमिति हेतुः सू चकत्वात्समीपमित्यर्थः अपथीयानिति अष्टपुशब्दात्पटुसदृशगुणवचनाद्दीपस्तुम्र्यत्ययः अनचीयानिति न संसृचोयेषां तेन चाभावणवक्तास्तेसं नियस्मिन्देशेसोऽनचकांस्ततईयस्तुनविन्मतोरितिमतुब्लुक् तत्रांगं हलादिनं भवति स्वकारस्तु हलादिरिति रादेशप्रसंगः स्वचीयानिति स्वचवच्छब्दाय

=अवयवावयविनोःसुतरांसंबंधेदर्शनात्=पत्रेति॰=विस्मतोर्लुग्विधानादेवागुणवचनादीयसुन्निति भावः॥= वयस्याः॥ =स्यवस्थ्यादिलिपाजानमष्ठनादिति निर्मेधेनसमासंताभावात्स्त्रचेसकारपाठेतुतस्यकथनेपुरायमतीतेःसे=

आहोस्विद्धलादेरस्वेकारस्येति युक्तंपुनरिदं विचारयितुं नन्वनेनासंदिग्धेनांगविशेषेण भवितव्यं कथं स्वकारस्य नाम हलादिः स्यात् अन्यस्यान्यः अ पमादिशब्दोऽस्येवावयववाची तद्यथा स्रगादिः अर्धर्चादिः श्लोकादिरिति अस्ति सामीप्ये वर्त्तते तद्यथा दधिभोजनमर्थे सिद्धे रादिः दधिभोज नसमीपे घृतभोजनमारोग्यस्यादिः घृतभोजनसमीपे यावता सामीप्ये पि वर्त्तते जायते विचारणा हलसमीपस्य स्वकारस्येति अथवा हलादेरंगस्ये ति किंचातः यदि विज्ञायते हलादेरंगस्येति अमथीयान् अम्रदीयान् अत्र न प्राप्नोति अथ विज्ञायते हलादेः स्वेकारस्येति अनचीयानत्रापि प्राप्नो ति उभयथा स्वचीयानित्यत्र प्राप्नोति॥ यथेच्छसि तथास्तु अस्तु तावद्धलादेरंगस्येति कथममथीयानिति न द्धितांते न समासोपविष्यति न मथीयान् अमथीयानिति भवेत्सिद्धं यदा तद्धितांते न समासः यदा तु खलु समासात्तद्धितोत्पत्तिस्तदा न सिध्यति नवैसमासात्तद्धितोत्पत्त्याभवितव्यं किं कार

॥णं बहुव्रीहिणोक्तत्वान्मत्वर्थस्य भवेद्यदा बहुव्रीहिस्तदा न स्यात्॥ ॥

सुनमतुपोलुक् यथेच्छसीति वक्ष्यमाणपरिगणनादिति प्रसंगनिरासादिति भावः नवैसमासादिति प्रकृताभिप्रायेणेदमुच्यते ईदृशात्समासादीदृशस्तद्धितो नोत्पद्यते तथाहि अ ष्टपुशब्दस्यात्सुरूपो बहुव्रीहिर्वा गुणवचनो न भवतीति ततईयसुन्नभवत्येव अथमत्वं तारीयस्तुनउत्पत्तिः तत्र बहुव्रीहिणोक्तत्वान्मतुपोऽभावात् नापि नसुरूपान्म तुबुत्पत्तिः लाघवाद्बहुव्रीहेरेवोपस्थानात् भवेद्यदेति सत्यंन्यपदार्थप्रधानत्वात् गुणवचनो न भवति॥ ॥श्री॥ ॥७॥ ॥

भा०कै०६
१८५

यदा त्वितिय था अब्राह्मण इति ब्राह्मणसदृशः क्षत्रियादिरुच्यते तथा अपृथुरिति [redacted] पृथुत्वसदृशगुणान्तरयुक्तोऽभिधीयते न च समासेतिगुणमुक्तवानगु
णवचनोयः शब्दो गुणमभिधाय [redacted] गुणोपसर्जने द्रव्ये वर्त्तते तस्मादजादिभ्यां भाव्यम् न च समासः केवलेगुणे कदाचित् प्रयुज्यते नित्यं द्रव्यवाचित्वात् अपृथु
शब्दः पृथुसदृशगुणवाचित्वेऽपि विशिष्टगुणवचनो न भवति पृथुशब्दवत् अपृथव एव न सन्तीति मतुप् प्रकृतय इति शेषः समाने चैव बहुव्रीहिणा भाव्यं
न तु मत्वर्थीयार्थे न तत्स्वरूपेण भिन्नार्थत्वे तु भाव्यमेव गौरखरवदरण्यं कृष्णसर्पवान्वल्मीक इति अत्र हि जातिविशेषेणतद्वत्ता प्रतिपादयिषिता नातरेण
तत्स्वरूपं मत्वर्थीयार्थे बहुव्रीहिमात्रेण प्रतिपादयितुं शक्यते अन्ये त्वाहुः अविद्यमानापेक्षपृथवस्तेसंतीतिविरोधात् स्वपाधिकत्वाभावान्मतुब्न भवतीति ए

यदान्तु तत्स्वरूपस्तदाप्राप्नोति न पृथुः अपृथुः अपमपृथुः अयमप्यपृथुरयमनयोरतिशयेनापृथुरप्रथीयान् इति न समासादजादिभ्यां भवित
व्यम् किंकारणम् गुणवचनादिस्तुच्यते न च समासो गुणवचन इति यदा तर्हि समासाद्विन्मतुपौ [redacted] विन्मतुबन्तादजादीतदा प्राप्नुतः अवि
द्यमानाः पृथवः अपृथवः अपृथवोऽस्य सन्ति अपृथुमान् अयमपृथुमान् अयमप्यपृथुमान् अयमनयोरतिशयेनापृथुमान् अ
प्रथीयानिति नैष दोषः अपृथव एव न सन्ति कुतोऽस्यापृथव इति इहकस्मान्न भवति मातयति भ्रातयति लोपोऽत्र बाधको भविष्यति इदमिह
संप्रधार्यं लोपः क्रियतां रभाव इति किमत्र कर्त्तव्यं परत्वाद्रभावः यदि पुनरवशिष्टस्य रभाव उच्यते नैवं शक्यमिहापि प्रसज्येत रुतमाचष्टे रुतयतीति॥

तदपेक्षमंते पृथुत्वगुणरहिताः स्वरूपेणाविद्यमानाः पृथव एवापृथव उच्यन्त इति कथं सत्वोपाधिकत्वं न स्यात् ननु च यथा नचीयानित्यत्र बहुव्रीह्यर्थे न तद्वत्ताविवक्षायां मत्वं
तादीयस्तुन्न भवति तथा पृथुशब्दादपि मतुपा तदन्तात्त्वेयसुना भाव्यम् एवं तर्ह्यनभिधानाद्बहुव्रीहेः कुतश्चिन्मतुपा न भवितव्यमिति मन्यन्ते तदेवमप्रथीयानिति तद्धितान्ते न स
मास इति स्थितम् स्त्वचीयानित्येतस्यापि परिहारः पचोद्यमुपन्यस्यति इहकस्मादिति मातयतीति उणादयोऽव्युत्पन्नानि प्रातिपदिकानि इति पक्षाश्रयणाच्चुरिष्ठेमेय
स्तु इतीष्ठवद्भावात् शब्दस्य लोपाभावः यदि पुनरीति टिलोपो प्रवर्त्तेते ततश्चान्त्यस्य तत् शब्दस्य टिलोपेनान्त्यस्य तु रभाव इति मातयतीत्यादौ रादेशाभावः॥ मातयतीति भ्रातं

अथवा२
रामं०
१८५

एवंतर्हि किं प्रतिपदं गणने च सति हलादेर्न घो रिति न कर्तव्यं ॥ १

प्रकृतौ किमिष्टमेयस्त्विति किं प्रत्ययस्याश्रये रोष्टमेयसोपे स्यन्तेः यथा स्वाश्रये णात द्धित इति प्रश्नः स्वीति स्वशब्दादिनि कृते प्रकृतिभावाद्यस्येति लोपो न प्राप्नोति श्रौवमिति श्रुनो विकारावयवयोः प्राण्यत्रि कृते नस्तद्धित इति टिलोपो न प्राप्नोति अधुनेति इदमो धुनाप्रत्यये परत इशादेशस्तस्य यस्येति लोपो न प्राप्नोति श्रौवमिति टिलोपं बाधित्वा परत्वाद् वृद्धिः प्राप्ना द्वारादीनां चेति प्रतिषिध्यते ऐजागमश्च क्रियते तत्रैकाच्त्वाभावाद् टिलोपप्रभावः अधुनेति इदमो ऽश्भावो धुनाप्रत्ययश्च नि

एवं तर्हि परिगणनं क्रियते एषु मृदुक्रम शब्दठ परिवृढानामिति वक्तव्यम् प्रकृत्यैकाच् प्रकृत्यैकाजिति किमिष्टमेयस्तु आहोस्विदविशेषेण किं चातः यद्यविशेषेण स्वी स्वी श्रौवं अधुना अत्रापि प्राप्नोति स्विस्विनावेव न स्तः कथमुक्तमेतदेकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ स्व वान् एव वान् इत्येवं भवितव्यम् श्रौवमिति परत्वादैजागमे कृते टिलोपेन भवितव्यम् अधुना इति सप्रकृतिकस्य प्रत्ययकस्य स्थाने निपातनं क्रियते इदं तर्हि प्राप्नोति द्व्यम् यस्येत्यादौ प्रकृतिभावः यस्येति यस्य लोपप्राप्तिस्तस्य प्रकृतिभावः न चैतानि यस्येत्यादौ एवमपि श्रियै हितः श्रीयः ज्ञादेवतास्य स्थालीपाक स्यात् स्थालीपाक इत्यत्र प्राप्नोति तस्मादिष्टमेयस्तु प्रकृतिभावः अथ इष्टमेयस्तु प्रकृतिभावे किमुदाहरणम् प्रेयान्
१ प्रेष्ठः नैतदस्ति प्रादीनामसिद्धत्वान्न भविष्यति ॥ ॥श्री॥ ॥

प्रास्यते द्व्यमिति द्रोर्विकारो द्रोश्चेति यत्प्रत्ययः ओर्गुण इति गुणो ऽत्र न प्राप्नोति यस्येत्यादाविति यस्येत्यादीनि कार्याणि पेक्ष्य प्रकृतिभावो विधीयते ओर्गुणस्तु कृते प्यः प्रवे इति प्रकृतिभावाभावः श्रियै हित इति प्राक्क्रीताच्छ इति छः तत्र यस्येति लोपो न प्राप्नोति इयङुः प्रसंगः प्रादीनामिति अस्ति द्वत्वादेव एकाच्त्वाभावात् प्रकृतिभावो ऽप्यत्र नास्ति नापि टिलोपः स्थाने श्रय टिलोपः प्राप्नोतीति चेत् विप्रतिषेधे तावदसिद्धत्वाभावस्य ज्ञापितत्वात् परत्वात् आदिवृद्धौ कृते पुनः एषामसिद्धत्वेनाविद्यमानत्वात् स्वाश्रयो
१ नापि पराश्रय टिलोपः प्राप्नोति ॥ ॥श्री॥ ॥

=शास्त्रासिद्धत्वाश्रयणादिति भावः ॥ १=

=तस्याभावादिति भावः ॥ १=

=मामदिन्तपुंसकं प्रकृतिभावत्वस्य विरोधप्रसंगः २= अभिद्यतत्वमसंख्यानेतु भेदादेव प्रकारोच्चारणसामर्थ्यादेव टिलोपाभाव इति बोध्यं १=

भा० कौ० ६
१८६

श्रेयानिति इत्यसिद्धाधिकारादुद्दिः इत्यादि विधानाद् सिद्धत्वाभावः एकाच उच्चारणसामर्थ्यादिति अकारउच्चारणार्थो न प्रतिज्ञातोऽपि तु अवर्णार्थः विन्मतो र्लुगर्थ मिति लुक इति अर्थो य स्तत्सत्त्वगर्थ्यं लुङ्कि कृते टिलोपाभावार्थ मिस्यर्थः कथमन्यस्ये ति विन्मतुबन्तस्य यष्टि लोपस्तं लुग्बाधतां तस्मिन् कृते यष्टि लोपः प्राप्नोतीति कथं बाधतेन हितस्मिन्नप्राप्ते लुगारभ्यत इत्यर्थः यथैवेति लुको बाधकत्वाभ्युपगमेऽतिप्रसंग इत्यर्थः ब्रह्मीयानिति अतिशयेन ब्रह्मवानितीयसुनि मतु लुकि च न स्तद्धित इति टिलोपः नाप्राप्त इति यद्यपि विषयभेदेन टिलोपो भिन्नस्तथाप्यनपेक्षित विषयभेदं टिलोपप्राप्तिः पटिष्ठगौ सावकाश लुका बाध्यते तत्र विन्नन्तस्य नान्तत्वान्नस्तद्धित इत्ययमपि टिलोपो लुका बाध्यते
×शास्त्रभेदेन नाप्राप्तिन्यायेन लुका बाध्यते तेन स्त्रजीयानित्येतस्मिन् अंगे संप्रतिकी[redacted]ना विनी च टिलोप×

इदं तर्हि श्रेयान् श्रेष्ठः प्रकृत्यैकाजिष्ठेमेयस्सु चेदेकाच उच्चारणसामर्थ्यादवचना[redacted]प्रकृतिभावः प्रकृत्यै काजिष्ठेमेयस्सु चेत्तन्न किं कारणं एकाच उच्चारणसामर्थ्यात् अन्तरेणापि वचनं प्रकृतिभावो भविष्यति विन्मतोर्लुगर्थे प्रकृतिभावो वक्तव्यः स्त्रग्वितरः स्त्र जीयान् स्त्रग्वितमः स्त्रजिष्ठः त्वग्वत्तरः त्वचीयान् त्वग्वत्तमः त्वचिष्ठः ननु च विन्मतोर्लुकि टिलोपं बाधिष्यते कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात् असतिखल्वपि संभवे बाधनं भवति अस्ति च संभवो यदुभयं स्यात् कथमन्यस्योच्यमानमन्यस्य बाधकं स्यादिति इदं तावदयं प्रष्टव्यः यदि तर्हि विन्म तोर्लुङ्नोच्येत किमिह स्यादिति टिलोप इत्याह टिलोपश्चेन्नाप्राप्ते टिलोपे विन्मतोर्लुगारभ्यते स बाधको भविष्यति यदप्युच्यते असति खल्वपि संभवे बाध नं भवति अस्ति च संभवो यदुभयं स्यादिति सत्यपि संभवे बाधनं भवति तद्यथा दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधि दानस्य तक्र
=कथं तर्हि नान्तस्य टिलोपे येन नाप्राप्ति न्यायाभाव उक्तो ऽत आह मतोरित्विति १= ×नयं स्यात् यथैव खल्वपि विन्मतोर्लुक् टिलोपं बाधत एवं नस्तद्धित इत्येतदपि बाधेत यत्तरोर्मो ब्रह्मीयान् अस्त्वत्र इति यत्तावद्×२
मतो र्लुका नस्तद्धित इति टिलोपो न बाध्यते ननु किमुच्यते नस्तद्धित इत्यस्मिन्पुनः प्राप्ते चाप्राप्ते चेति यावता मतोर्नान्तत्वाभावादप्राप्त एव नस्तद्धित इति टिलोपः नैष दोषः म तुप्प्रत्ययो न कारान्तो नाद्य विधीयते तत्र यद्युपप्लुते मतुलुकि नस्तद्धित इति टिलोपो न प्राप्नोति तत्प्राप्ते मतुलुकि प्राप्नोति एकदेशविकृतं चानन्यवदिति यदेवांगं ब्रह्मव दिति तदेव ब्रह्मन्निति तदेवमभेदाश्रयेणेदमुक्तं ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥ राम० १८६

कारान्तादन
=नान्तमतन्तयोरभेदाश्रयेणेति भावः १=

प्राप्ते चाप्राप्ते चेति अपथवेति ननु विन्मतोर्लुगित्येतस्य नस्तद्धित इत्ययमेव योगोऽनंतरः टेरित्ययं तु व्यवहितः तत्र केचिदाहुः पाठक्रमादर्थक्रमो बलीयानि
ति टेरित्येष योगः सर्वविषयस्य व्यापनादनंतरो भवति यद्येवं पूर्वमेवायमर्थ उक्तो येन नाप्राप्त इति किमर्थं पुनरुच्यते पूर्वं तु उत्सर्गापवादन्याय उक्त इदानीं त्वर्थ
क्रमप्रतिपत्त्याश्रयेणोच्यते येन हि सर्वो विषयो व्याप्तः स एव बाधितुं युक्तो यस्तु विषयविशेषे प्रवर्त्तते तेन तस्य बाधायुक्ता सामान्ये हि पूर्वं प्रतिपत्तिरुदेति पश्चा
द्विशेषेषु अन्ये तु व्यासभेदाश्रयेण व्याचक्षते टेरित्यस्य पश्चान्नस्तद्धित इति पठितव्यम् पयिष्ठ इति पयस्विन् इष्ठन् इति स्थिते विन्मतोर्लुकि कृते अस्सो लो

=विन्मतोर्लुक् पंचमाध्यायस्य ॥ आर्थः क्रमः बुध्यारोहविषयः क्रमः ॥ १ = अत्रार्थपौनरुक्त्यं शंकते यद्येवमिति ॥ २ = [illegible]

निवृत्तेकं भवति एवमिहापि सत्यपि संभवे विन्मतोर्लुकि टिलोपं बाधिष्यते यदप्युच्यते यथैव खल्वपि विन्मतोर्लुक् टिलोपं बाधते एवं नस्तद्धित इत्येतम
पि बाधेत न बाधते किं कारणम् येन नाप्राप्ते तस्य बाधनम् नाप्राप्ते टिलोपे विन्मतोर्लुगारभ्यते नस्तद्धित इत्येतस्मिन् प्राप्ते चाप्राप्ते च अपथवापु
रस्तादपवादा अनंतरान् विधीन्बाधंते इत्येवं विन्मतोर्लुकि टिलोपं बाधिष्यते नस्तद्धित इत्येतन्न बाधिष्यते यदि तर्हि विन्मतोर्लुकि टिलो
इति [illegible] पं बाधते पयिष्ठ इति न सिध्यति पयसिष्ठ प्राप्नोति यथालक्षणमप्रयुक्त इति प्रकृत्याके राजन्यमनुष्ययुवानः राजन्यमनुष्ययुवानः
अके प्रकृत्या भवंतीति वक्तव्यम् राजन्यकम् मानुष्यकम् यौवनिका नमपूर्वोऽपत्येऽवर्मणः मपूर्वोऽत्यति षेधे वा हितनाम्न इति वक्त
व्यम् हैतनामः हैतनामनः आरोहितो वै हैतनामः आरोहितो वै हैतनामनः समानो हैतनामः समानो हैतनामन इति ॥ ॥

योन प्राप्नोति यथालक्षणमिति न भवति टिलोप इत्यर्थः तत्रस्थ राजस्विनमाचष्टे रजसयति आयुष्मंतमाचष्टे आयुषयतीति भवितव्यम् राजन्यकमिति समूहे
र्थे गोत्रोक्षोष्ट्रेति वुञ् आपत्य च तद्धिते नातीति यलोपाभावार्थं प्रकृतिभावविधानं युस्येति लोपे सति वा विशेषाभावान्नानर्थः प्रकृतिभावः यौवनिकेति
यूनो भाव इति मनोज्ञादित्वाद्वुञ् तत्र नस्तद्धित इति टिलोपः प्राप्तः प्रकृतिभावान्न भवति नमहैतनामन इति हितनाम्नोऽपत्यमित्यण् अञ्निति प्रकृतिभावस्य
॥ हेरिति लोपाभावः ॥ ॥ ॥

=तदर्थप्रतिः २ = चमानुष्यकमित्यत्रापि [illegible] राजन्यमनुष्ययोः [illegible] सत्यत्र [illegible] प्रकृतिभावेनेति [illegible] ॥ २ =

ब्राह्मो ब्राह्मशब्दोऽपत्ये नपत्येचेष्यते ब्राह्मोमुहूर्त्तो ब्राह्मोनारदो ब्राह्मःस्थालीपाक इति जातौत्वपत्ये ब्राह्मण इतीष्यते अनपत्ये तु जातौ ब्राह्मी ओषधिरिति टिलोपइ
ष्यत एतच्च यथाभिधानं न सिध्यतीति मत्वा पृच्छति अथ किमिदमिति यदि तावदिति [redacted] ब्रह्मणोऽपत्यमित्यण् अल्लोपोन इत्यकारलो
पः प्राप्तो न संयोगाद्वमन्तादिति प्रतिषिद्धः न स्तद्धित इति टिलोपे प्राप्ते अन्निति प्रकृतिभावः प्राप्तो नमपूर्वोपत्ये वर्मण इति प्रतिषिद्धस्ततष्टिलोपे प्राप्ते नियमार्थमिदं अ
जातावेवापत्ये टिलोपो भवति ब्राह्मो नारद इति जातौ त्वपत्ये न भवति ब्राह्मण इति एवमपत्ये सिध्यति अपत्ये त्वन्निति प्रकृतिभावाद्ब्राह्मशब्दो न सिध्य

ब्राह्मोऽजातौ अथ किमिदं ब्राह्मस्याजातौ अनोलोपार्थं वचनमाहोस्विन्नियमार्थम् कथं वा नोलोपार्थं स्यात् कथं च नियमार्थं यदि तावदपत्य
इति वर्त्तते ततो नियमार्थं अथ निवृत्तं ततो लोपार्थं अत उत्तरं पठति ब्राह्मस्याजातौ लोपार्थं वचनं क्रियते अपत्य इति निवृत्तम् तत्रा
प्राप्तविधाने प्राप्तप्रतिषेधः तत्राप्राप्तस्य टिलोपस्य विधाने प्राप्तस्य प्रतिषेधो वक्तव्यः ब्राह्मणः न वा पर्युदाससामर्थ्यात् न वा वक्तव्यः किं
कारणं पर्युदाससामर्थ्यात् पर्युदासोऽत्र भविष्यति अस्त्यन्यत्पर्युदासे प्रयोजनम् या जातिश्चेन्नापत्यं ब्राह्मी ओषधिरिति नवै अत्रे

म२

१ष्यते॥ ॥

ति अथ निवृत्तमिति अपत्यग्रहणे निवृत्ते विधिनियमसंभवे विधिरेव ज्यायानिति अनपत्ये न्निति प्रकृतिभावे प्राप्ते जातौ टिलोपा[redacted]र्थं निपातनं भवति तत्र ब्राह्मो मुहूर्त्तो
ब्राह्मः स्थालीपाक इति सिध्यति ब्राह्मी ओषधिरिति न सिध्यति अजाताविति प्रतिषेधात् ब्राह्मणी ओषधिरिति तु प्राप्नोति अपत्ये जातौ ब्राह्मण इति न सिध्यति नमपूर्वोप
त्ये वर्मण इति प्रकृतिभावप्रतिषेधात् टिलोपप्रसंगात् न वेति वक्ष्यमाणोऽभिप्रायः इतरस्त्वेतमभिप्रायमबुध्वाह अस्त्यन्यदिति ब्राह्मी ओषधिरित्यत्र कृतार्थः पर्युदासो
ब्राह्मण इत्यत्र पूर्वसूत्रविहितप्रकृतिभावप्रतिषेधप्राप्तं टिलोपं न निवर्त्तयेत् नवै अत्रेष्यत इति अजाताविति पर्युदासः न चानिष्टार्थं प्राप्तस्य प्रकृतिरिति पर्युदास ग्राम०

१सामर्थ्यात् ब्राह्मण इत्यत्र टिलोपो न भविष्यतीत्यर्थः॥ ॥ १८७

इतस्तल्लक्षणमुपालब्धुमाह् अनिष्टं च प्राप्नोतीति ब्राह्मणी औषधिरिति प्राप्नोत्यजाताविति पर्युदासात् इष्टं च न सिध्यति ब्राह्मण इति एवं तर्हीति योग
विभागः क्रियत इति भावः तत्र ब्राह्म इत्यत्र सामर्थ्यादपत्य इति न संबध्यते अपत्ये टिलोपस्य सिद्धत्वात् तेनानपत्ये सर्वत्र जातावजातौ च ब्राह्म इति नि
पात्यते अपत्ये पित्राह्लोनादि इत्यत्र परत्वाद्ब्राह्म इत्यत्र नैव टिलोपो भवतीति ततो जाताविति तत्रापत्य इत्यनुवर्तते तेनायमर्थो भवति अपत्ये जा

अनिष्टं च प्राप्नोति इष्टं च न सिध्यति एवं तर्ह्यनुवर्तते अपत्य इति नात्रापत्य इत्यनेन निपातनमभिसंबध्यते ब्रा
ह्म इति निपात्यते अपत्ये जाताविति किं तर्हि प्रतिषेधोऽभिसंबध्यते ब्राह्म इति निपात्यते अपत्ये जातौ नेति । कार्मस्ता
च्छील्ये किमर्थमिदमुच्यते न स्तद्धित इत्येव सिद्धं न सिध्यति अन्नणीति प्रकृतिभावः प्रसज्येत आणीत्युच्यते णाख्यायम् ए
वं तर्हि सिद्धे सति यन्निपातनं करोति तज्ज्ञापयत्याचार्यः ताच्छीलिके णे कृतानि भवन्तीति किमेतस्य ज्ञापने प्रयोजनम्
२ चौरी तापसीति अणन्तादितीकारः सिद्धो भवति॥ ॥श्री॥

तौ ब्राह्मणशब्दे टिलोपो न भवति अजाताविति प्रसज्यप्रतिषेधो भवति नानञः संबन्धादिति सर्वेष्टसिद्धिः कार्मेः किमर्थमिति कर्मशीलमस्य छत्रादिभ्यो ण इति णे कृ
ते सिद्ध टिलोप इति भावः ताच्छीलिक इति एवं च छत्रादिभ्यो ण इति लाघवाय कर्तव्यं ण वचने प्रयोजनाभावात् प्रज्ञाश्रद्धेति ज्वलितिकसंतेभ्य इति तत्संख्य हर
=प्रकृत्यर्थमिति· पर्युदासपक्षेऽनुजातिभिन्नेऽपत्येऽर्थेऽस्त्यर्थे विधिभेदान्निर्देशादप्रतिपत्तिः अपत्यमात्रमस्यानुवर्तते एवमपि विधेयसाधनं· नियमवि[illegible] २ णमिति णवचने ङीबभावः प्रयोजनम्॥ ॥श्री॥ ॥
[illegible] प्रतिषेध इति भावः॥२= ज्ञापयत्याचार्य इति· अन्येत्तु ज्ञापकसिद्धस्याचार्यत्रिकालेन छात्रेत्यादिप्रयोगसिद्ध्यर्थं णवचनमिति कृत्स्नं ज्ञापनसामर्थ्यमाहुः॥२=

दंडिना यकारादावितिं भ्रूणघ्नो भावइति ब्रह्मणादिलात् ष्यन् ज्ञापकं त्विति धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमित्यनपेक्ष्य ज्ञापकमुक्तं तदपेक्षायां तत्वस्याप्रसंगात् ननु टिलोपाभावार्थं निपातनं स्यादिति सति प्रयोजने ज्ञापकत्वमनुपपन्नम् नैष दोषः उभयोरनित्ययोः परत्वाट्टिलोपं बाधित्वा तत्वं भविष्यति अनेकप्रयोजनत्वाद्वा निपातनानाम् अत एव कुत्वप्रतिषेधार्थमपि निपातनम् ऐक्ष्वाक इति इक्ष्वाकोरपत्यमिति जनपदशब्दादित्यञ्

=अप्रसंगादिति न बाधनेदं प्रयत्नमुत्तार्थं ज्ञापकं किं तु ज्ञापकाविरुद्धतिभावार्थं करोत्यनुवादमिति तात्पर्यमिति भावः १=

दांडिनायन अत्र भ्रौणहत्ये किं निपात्यते यकारादौ तद्धिते तत्वं निपात्यते भ्रौणहत्येतत्वनिपातनानर्थक्यं सामान्येन कृतत्वात् भ्रौणहत्येतत्वनिपातनमनर्थकं किं कारणं सामान्येन कृतत्वात् सामान्येनैवात्र तत्वं भविष्यति हनस्तोऽचिण्णलोरिति ज्ञापकं तु तद्धिते तत्वप्रतिषेधस्य एवं तर्हि ज्ञापयत्याचार्यस्तद्धिते तत्वं न भवतीति किमेतस्य ज्ञापने प्रयोजनं भ्रौणघ्नो वार्त्रघ्न इत्यत्र तत्वं न भवति ऐक्ष्वाकस्य स्वरभेदान्निपातनं पृथक्कृतेन ऐक्ष्वाकस्य स्वरभेदान्निपातनं पृथक् कृतेन कर्तव्यम् ऐक्ष्वाकः ऐक्ष्वाकः एकश्रुतिनिर्देशात्सिद्धम् एकश्रुतिः स्वरसर्वनाम यथा नपुंसकं लिंगसर्वनाम॥ ॥श्री॥ ॥

उकारलोपो निपात्यते त्रिस्वाद्यायुदात्तत्वं इक्ष्वाकुषु जात इत्यणि प्राप्ते ओर्देशे ठञ्जितिठञि प्राप्ते तत्परत्वाद्बाधित्वाजनपदतद्वध्योश्चात्रद्धात्प्रपि बहुवचनविषयादिति वुञि प्राप्ते कोपधादित्यण् एतज्ञातो दान्तत्वं तत्र भिन्नस्वरयोरेकस्मिन्निपात्यमाने परस्यासंग्रहात् उभयमपि निपात्यम् एकश्रुतिनिर्देशादिति स्वरभेदप्रयुक्तमयेन निपातनं सर्वस्वरलौकिकप्रयोगसंग्रहार्थमित्यर्थः यथा नपुंसकमिति सामान्यच्छिता याविर्भावतिरोभावच्छितिविशेषाणामंतर्भावात्॥ राम०
१८८

मैत्रेयइति मित्रयोरपत्यमितिगृष्ट्यादिभ्यश्चेतिढञ्मित्रयुएयइतिस्थितेओर्गुणइतिगुणापवादेढेलोपोकद्र्वाइतिलोपेप्राप्तेकेकयमित्रयुप्रलयानांयादेरियादेशेप्राप्तेलोपोनिपात्यतेतच्छ्लोपस्यासिद्धत्वाद्यस्येतिलोपाभावादेओर्गुणइतिपररूपमेकारः द्वितीयइति मित्रयवइतिबह्वचेषुलुगर्थः पाठः सप्तमइति ढञोऽन्यत्रेयादेशः मित्रयोरिदंमैत्रेयमिति मैत्रेयकइतिमित्रयूनांसंघइतिगोत्रेलुगचीतिलुक्प्रतिषिद्धेढञन्ताद्गोत्रचरणाद्वुञितिवुञ् यदित्तु सं

=तद्बुलोपेप्रवृत्तिरेवेतिद्रष्टव्यः आभातीत्याह अतोगुणइति अस्सिद्धवदत्राभादित्यानेतुपरस्यैतिलोपेवेदलोपोपिनेतिवोध्यं २=

अथमैत्रेयेकिंनिपात्यते मैत्रेयेयादिलोपनिपातनं मैत्रेयेढञियादिलोपोनिपात्यते इदंमित्रयुशब्दस्यचतुर्ग्रहणंक्रियते गृष्ट्यादिषुप्रत्ययविध्यर्थंपाठः क्रियते द्वितीयेध्यायेयस्कादिषुलुगर्थंक्रियते सप्तमेध्यायेइयादेशार्थं इदंचतुर्थेयादिलोपार्थम् द्विर्ग्रहणंशक्यमकर्तुंबिदादिष्वप्रत्ययविध्यर्थंपाठःकर्तव्यः तत्रनैवार्योलुकानापियादिलोपेनइयादेशोनैवसिद्धम् नैवंशक्यम्पि हि हि मैत्रेयेकः संघइतिसंघांकलक्षणोवञ्प्रत्ययआमपत्तिःस्यातामतप्रसज्येत हिरण्मयेकिंनिपात्यते हिरण्मयेयलोपवचनंहिरण्मयंकलशंबिभर्षिकर्त्य अथहिरण्ययेकिंनिपात्यतेहिरण्ययेछंदसिमलोपवचनात्सिद्धम् हिरण्ययेछन्दसिमलोपोनिपात्यते हिरण्ययीनौरभवत्हिरण्ययाः पंथानआसन् हिरण्ययमासनम्॥ ॥इतिश्रीमद्भगवत्पतंजलिविरचितेव्याकरणमहाभाष्येषष्ठाध्यायस्यचतुर्थपा

=बीलीति विदादिषुकमियादेशार्थमपरंअप्रियेवार्थस्तीयं नञासहात्रापिन्यासे= १ देचतुर्थमान्हिकंपादश्चचतुर्थः॥ ॥इतिषष्ठाध्यायःसमाप्तः॥ ॥ ॐ

=चत्वारिग्रहणानिइतिप्रदर्शनार्थमोवान्यथानेकं १=

घांकेसत्रनमैत्रेयादित्युच्यतेतदार्चीणिग्रहणानिस्युरितीहनिपातनंकर्तव्यंस्यादिष्टस्यसिद्धत्वात्॥ ॥इत्युपाध्यायजय्यटपुत्रकय्यटकृतेमहाभाष्यप्रदीपेषष्ठाध्यायस्यचतुर्थेपादेचतुर्थमान्हिकम्॥ ॥पादश्चचतुर्थः॥ ॥इतिषष्ठाध्यायःसमाप्तः॥ ॥संवत१८२७मितिफाल्गुन ॐ



॥ षष्ठाध्याय समाप्तः॥
पत्र १८९

